न्यायरत्नमाला

नं. ४२५९

न्यायरत्नमालास्मृत ५

२२०

न्यायरत्नमाला वस्ता ५



श्रीगणेशाय नमः आनंदमनंतं ज्ञानमजं साक्षिणं माश्वरं। ब्रह्म सर्वमसर्वं सदसद्वंदे विभुं हरिं। मीमांसार्णवसंभूतैः कुमारस्वामिना
१ हृतैः। न्यायरत्नैरहं मालां संग्रथ्नामि मनोरमां॥ तत्र स्वाध्यायविध्यर्थः प्रथमं तावदुच्यते। आचार्येऽदृष्टिमाश्रित्य प्रतिपक्षनिरासतः ३ त
त्र तावदिमं केचित्पूर्वपक्षं प्रचक्रिरे। आचार्यकनियोगार्थः स्वाध्यायस्तत्प्रयुक्तितः। ४। प्रथमावगतत्वेन तद्धि युक्तं प्रयोजनं। न तु वा
क्यार्थविज्ञानं तद्धि पश्चात्प्रतीयते ५ तेनाविवक्षितार्थत्वाद्वेदस्यार्थे विचारणं। न कर्तव्यमतः शास्त्रं मीमांसाख्यमनर्थकं। ६। आचार्य सा
करणविधिप्रयुक्तस्य हि स्वाध्यायाध्ययनस्य प्रयोजनापेक्षायां पुरुषांतरगामित्वेन बहिरंगमपि प्रथमावगतत्वेन तत्सिद्धिरेवास्य
प्रयोजनं युक्तं न त्वर्थज्ञानं पश्चाद्भावित्वात्। तेनानन्यार्थत्वाद्वेदाध्ययनस्याविवक्षितोऽर्थः। अविवक्षितार्थश्च न निर्णेतव्यः प्रयोज
नाभावात्। अकर्तव्ये च निर्णये। न विचारः कर्तव्य इति तदात्मकमीमांसाशास्त्रमनर्थकत्वादनारंभणीयमिति। कथमाचार्यकरणवि
धिप्रयुक्तमध्ययनं न स्वविधिप्रयुक्तं॥ उच्यते। न स्वाध्यायविधावस्ति नियोज्यस्तत्र चासति। न प्रयोजकता युक्ता प्रयाजादिनियो
गवत् ७ न त्वनधिकारस्य विधेर्विषयानुष्ठापकत्वं संभवति प्रयाजादिविधिवत्। न च स्वाध्यायाध्ययनविधावधिकारी श्रूय १
द्वे ते। तस्मात्तस्य प्रयोजकत्वं संभवति न च कल्पयितुं शक्यो नियोज्यः पितृयज्ञवत्। अकल्पितेऽपि तस्मिन्यदनुष्ठानं प्रसिद्ध्यति॥ ८॥
स्यादेतत्। अश्रूयमाणोऽपि नियोज्यः पितृयज्ञादिवत्कल्प्यत इति। न। अकल्पितेऽपि नियोज्ये यस्मादनुष्ठानं सिद्ध्यति। सिद्धे तस्मि

न्नासौ कल्पयितुं शक्यते अनुपपत्त्यभावात्। अनुष्ठानाधीनसिद्धिर्हि नियोगः तस्मिंश्चाध्ययनमनुष्ठातारमाक्षिपत्यनधिकारिणोऽनुष्ठा
तृत्वासंभवात् अनियोज्यस्य चाधिकारासंभवान्नियोज्यं कल्पयति। यदा तु विध्यंतरानुष्ठापितेनैव विषयेण आत्मसिद्धिं पश्यति
तदानुपपत्त्यभावान्न नियोज्यं कल्पयति प्रयाजादिनियोगवत्। संभवति चेदाचार्यकरणविध्यनुष्ठापितेनैवात्मविषयेणाध्य
यननियोगस्य सिद्धिरिति न नियोगसिद्धिरिति न नियोज्यकल्पनासंभवः। कथं पुनराचार्यकरणविधिरध्ययनं प्रयुंक्ते। तदुच्यते। उ
पनीयाध्यापनादाचार्यकं भवति। न चाध्यापनमध्ययनमंतरेणासंभवतीति तदाक्षिपति। उपनयनमपि त्वर्थप्रत्ययेनाध्यापन
समानकर्तृकमवगम्यमानं तदंगमेव विज्ञायते। तस्य च द्वारापेक्षायामुपनेयासक्तिरेव लिंगाद्द्वारमवगम्यते। उपनेयोपि नाकिंचि
यनमध्या त्करोऽगमिति तद्व्यापारापेक्षायामुपनयनप्रक्रमाधीनमध्ययनोपकारित्वात्तद्व्यापारत्वेनाध्यवसीयते॥ एवं च वेदाध्ययनं कुर्वन्मा
णवको ध्यापनस्य उपकारी इत्यवगमात्तद्विषयमेवाध्ययनमाचार्यकसाधनमिति तद्द्वारेण सर्वस्याध्ययनांगस्य व्रतादेस्तत ए
वानुष्ठानसिद्धिः। तस्मादाचार्यकरणविधिप्रयोजनत्वादध्ययनस्याप्यविवक्षितत्वार्थत्वाद् दृष्टसन तदर्थनिर्णयार्थं शास्त्रमारब्ध
व्यमिति। सिद्धांतस्तु। न त्वमाचार्यकरणविधिप्रयुक्तमध्ययनं न तु तत्सिद्धिरेवास्य प्रयोजनं युक्तं। बहिरंगत्वात्। कर्तृगामित्वे
नांतरंगत्वात् अर्थज्ञानं प्रयोजनत्वेन स्वीक्रियते। ननु प्रथमावगतत्वेन प्रयोजनापेक्षमध्ययनमाचार्यकमेव तावत् स्वीकरोति। स्वी

सिद्धि

कृते च तस्मिन्वये त्राभावात्तु पश्चादवगतमर्थज्ञानमनन्तरङ्गमपि न प्रयोजनं भवितुमर्हतीति मैवं प्रथममाचार्यकस्य प्रयोजनत्वायरिक
२ ल्पनात् । यद्यकल्पिते तस्मिन्नध्ययनस्यानुष्ठानं न सिध्येत् ततः कल्प्येत । न त्वेतदस्ति । अकल्पितेऽपि तस्मिन्ननुष्ठानलाभात् । अ
नुष्ठिते त्वध्ययने प्रयोजनापेक्षायामनन्तरङ्गत्वादर्थज्ञानमेवाङ्गीक्रियते । ननु नियोग एव शाब्दत्वादवगतः प्रयोजनं स्यान्नार्थज्ञानं ।
न । अर्थज्ञानस्यापि प्रतीयमानस्य त्यागायोगात् । तेनोभयोरपि प्रयोजनत्वं युक्तमवगतत्वादर्थज्ञानस्य नियोगस्य च तत्रार्थज्ञानमू
र्धं प्रयोजनं न विचारमन्तरेणाध्ययनेन संपादयितुं शक्यत इतीत्थमध्ययनविधिरेव तत्सिद्ध्यर्थमपि विचारमाक्षिपतीति तदात्मकं मीमां
साशास्त्रमारब्धव्यमिति । अत्राभिधीयते नायं विचार उपपद्यते । अध्ययनप्रयुक्ते हि स्वाध्यायाध्ययने सति ॥ ९ ॥ विचारो युज्यते कर्तुं
न तु तेन प्रयुज्यते । स्वकीयेनैव विधिना प्रयोक्तुं शक्यते यतः ॥ १० ॥ यदि त्वध्ययनमध्यापनविधिप्रयुक्तमभविष्यत् ततः किं त
स्मिन्विचारे वास्य प्रयोजनमुतार्थज्ञानमिति विचार उपपद्यत । न तु तत्प्रयुक्तं ॥ स्वकीयेनैव धिना प्रयुक्तिसंभवात् । नियोज्याभा
वतो यत्तु प्रयोक्तृत्वनिवारणं । अध्यापनेऽपि तत्तुल्यं न हि तत्राप्यसौ श्रुतः ॥ ११ ॥ नियोज्याभावादध्ययनविधिरध्यापनस्य प्रयोज
को भवितुं क्षममिति यदुक्तं तदध्यापनविधावपि तुल्यं । न ह्यष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्यत्र उपनीय तु यः शिष्यं वेदमध्या २
पयेद्द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षत इत्यत्र च कश्चिन्नियोज्यः श्रुतः । तेनाध्यापनेऽपि न तावत्प्रयोजकत्वं स्यात् कुत एवा

ध्ययने। अथाचार्यककामस्य नियोज्यत्वं प्रकल्प्यते। ज्ञानकामस्य किंत्वेवमन्यत्रापि प्रकल्प्यते १२ यदि त्वध्यापनविधावाचार्यकका
मो श्रुतोपि नियोज्यः कल्प्यते। तर्ह्यध्ययनविधावपि अर्थज्ञानकामकल्पना तुल्यत्वमेव। ननु नार्थज्ञानकामः संभवति यो नियुज्य
ते। ज्ञातस्तावदर्थो ज्ञातत्वादेव न ज्ञातुमिष्यते। नाथज्ञाते अर्थे ज्ञानेच्छा संभवति। कथं हि त्वध्यानान्तरमहमिममर्थं जिज्ञासेयमिति ज्ञा
तुमाशंसीत। तस्मात् नार्थज्ञानकामस्य नियोज्यता संभवतीति। उच्यते। अहो बत भवानात्मानं शिष्यान् सकलं च लोकमतिसंधातु
मुपक्रान्तः। कथं तर्हि दुर्गवर्त्मगामिनं दस्युसरीसृपकण्टकव्यालव्याघ्रकण्ठीरवादिसदसद्भावजिज्ञासया तत्तत्रेदृशं चारयन्तमा
त्मानं वेदार्थबुभुत्सया चात्मानमुपधावतः शिष्यान् प्रियादिसदसद्भावजिज्ञासया संतन्तमपवरकादिदेशमवलोकयमानं
शास्त्रश्रवणपुस्तकनिरीक्षणादौ तन्तदर्थज्ञानार्थं घटमानं सकलं च लोकमनतिसंधाय ज्ञानेच्छा यदृवः शक्यते कर्तुं।
अथवास्य नेदृशो यद्भवो विस्मयपदः अयं त्वागोपालं सकलो लोकप्रसिद्धं हि चेन्द्रादिज्ञानं धर्माधर्मानुष्ठानादेश्चार्थानर्थ
हेतुत्वं निह्नुते। तानेव तु वयं शोचामः ये एनं वेदार्थबुभुत्सयोपधावन्तो बुभुत्साम नाम नास्तीति सकललोकविपरीताभिधा
यिनं न विजहति॥ सूत्रकारश्च कथं विहाय स्तुमनस्त्वेदृशां जिज्ञासां कर्तव्यत्वेन प्रतिपादयति। भाष्यकारेण चैषा प्रसिद्धा प्रसि
द्धत्वेनाक्षिप्य समाहिता। कथं पुनः समाधानं उच्यते॥ यद्यपि नात्यन्तापरिज्ञातोऽर्थो ज्ञातुमिष्यते नापि सर्वात्मना ज्ञातः तथा

पिकेनचिरात्मनावगतः केनचिरात्मना जिज्ञास्यते। तथा दर्शनात्। यथोद्भिदादियं दंगुणकर्मान्यतरामभिधायित्वेनावगतं विशे
३ षत्वेण जिज्ञास्यते। यथा वाल्लोकेन कुड्यादिव्यवहितेदेशे छायाचलनादिनावस्तुसत्तामात्रमवगम्य गवाश्वादिविशेषं जि
ज्ञासते। तथा धर्माधर्मवर्थानर्थहेतुत्वमात्रेण त्वृद्धेभ्यः पित्रादिभ्योवगम्य विशेषरूपेण परिज्ञातयोस्तयोर्हानोपादाना
शक्तेस्तत्परिज्ञाने च्छासंभवतीति युक्तमेवैतज्ज्ञानत्कामस्य नियोज्यत्वं। धर्माधर्मज्ञानकामः स्वाध्यायमधीयीतेति। यस्तु वद
ति नवर्यज्ञाने च्छामपनु महे। तस्याः सर्वलोकप्रसिद्धत्वेनाशक्यनिह्नवत्वात्। इष्टानिष्टप्राप्तिपरिहारोपायज्ञानं हि सर्वैः
प्रार्थ्यते। कस्तत्र विप्रतिपद्यते। वेदार्थज्ञाने तु नास्तिकामनेत्युच्यते। यदि हि सकलस्य वेदार्थस्येष्टानिष्टप्राप्तिपरिह
रार्थता भवेत् ततस्तज्ज्ञानं पुरुषेणार्थ्येत। न त्वसावस्ति नैमित्तिकनिषेधाधिकारयोर्विध्यनुष्ठानमात्रपरिनिष्ठितत्वात्। तस्मा
न्नार्थज्ञानकामस्य नियोज्यत्वमिति। स वक्तव्यः। किमिदानीं नैमित्तिकवाक्यार्थज्ञानमनपेक्षितमेव। यद्येवं तर्हि का करदर्श
न विमर्शसदृशास्तद्विमर्शः किं सर्वशक्तो प्रवृत्तिः स्यादपि वा यथैकदेशे। तथा कालमपि किमनादृत्य यजस्वेत्येव यथा व्यं उत
काल एव। मुख्याभावे द्रव्यान्तरं प्रतिनिधेयमुत तत्सदृशमुतासदृशं इत्यादिर्न कर्तव्यः। निर्णयार्थत्वाद्विमर्शस्य तदर्थस्य वा ३
निर्णीनाषितत्वात्। अतोवश्यममन्यपिफले विध्यर्थानुष्ठानसिध्यर्थमेव तद्वाक्यार्थज्ञानमपेक्षितव्यमिति युक्तमर्थज्ञान

कामस्य नियोज्यत्वं। एवं तर्हि प्रागेव वेदाध्ययनाद्धर्मजिज्ञासोत्पादादथातो धर्मजिज्ञासेत्यनुपपन्नं स्यात्। न। जिज्ञासाभेदात्॥ यथाह्य
जिज्ञासे कोपनीतस्य द्वितीया पठितश्रुतेः। ज्ञातविद्यान्तरस्यान्या यामीमांसा पुरस्सरीति। प्रथमं तावद्धर्मो धर्मो ज्ञोजिस्या विति वंशवृ
द्धेभ्यः श्रुत्वा तज्ज्ञानमिच्छन् स्वाध्यायविधिना तादर्थ्येन विहितमध्ययनं तेभ्य एवावधार्याधीते वेदं ततो। व्युत्पन्नस्याधीताद
पि वेदात् तज्ज्ञानानुदयात् किमनेनोच्यत इति पुनरन्यादृशी जिज्ञासा जायते तद्दर्शने च घटत्यनुयाये निगमनिरुक्तव्याकर
णादिश्रवणाय तेते। ततश्च पदार्थज्ञानाद्वाक्यार्थः प्रतीयमानोऽन्यायानवधारणात्संशयितो भवति। ततः पुनर्वाक्यार्थविशेष
जिज्ञासा भवति। तदिदं यश्चात्तनं जिज्ञासाद्वयमभिप्रेत्याथातो धर्मजिज्ञासेत्युक्तं॥ यथोऽभाष्यकारेण॥ न जिज्ञासामात्रेणोदमु
च्यते। किंतु तादृशी धर्मजिज्ञासामधिकृत्याथशब्दं प्रयुक्तवानाचार्यः। या वेदाध्ययनमन्तरेण न संभवतीति। आमारायाम्नाराप
जिज्ञासा तु यद्यथाध्ययनात्प्रागपि संभवति। तथाप्यध्ययनकालादतिपन्निभयात्पश्चादेवकरिष्यते। तदलमतिदूरं गत्वा। सिद्धं
तावदर्थज्ञानकामस्याध्ययने नियोज्यत्वमिति। प्रत्युताध्यापन एव नियोज्यो न संभवति। आचार्यकस्य सामान्यतोऽपि प्रागस्मा
द्वचनादनवगमादित्यनंतरमेव वक्ष्यामः। अथा नियोगजन्यत्वान्नियोज्यस्य विषयेषणा। न युक्तमर्थविज्ञानं। तुल्यमाचार्यके
पि तत्॥ १३॥ यदेव हि नियोगफलं तदेव काम्यमानतया नियोज्यमवच्छेत्तुमलं। न विषयफलं। तुषविमोकादिवत्। ज्ञानं

तु विषयभूताध्ययनफलं। न नियोगजन्यमिति न तत्कामस्य नियोज्यत्वं संभवतीति चेत्। तदर्थेनैनैव हेतुनाचार्यकामस्यापि नि
४ योज्यविशेषणं स्यात्। तस्यापि विषयफलत्वात्। किंच। प्रमाणान्तरविज्ञाते कामनोत्पद्यते प्रिये। आचार्यकं तु न ज्ञातं मानेनान्येन के
5 नचित्॥ १४॥ आहवनीयादिवद् लौकिकमाचार्यकं प्रमाणान्तरेण चानवगतमध्यापनविधायकेनैव वचनेनावगम्यत इति
भवतां दर्शनं। न चानवगते कामना संभवतीति न तत्कामस्य नियोज्यत्वसंभवः। अनेनैव तु वचनेन ज्ञात्वा काम्यत इत्याप्र
माणे परस्पराश्रयदोषापत्तिः। सिद्धं तत्कामम् उद्दिश्य विधिरेष प्रवर्त्तते। विधावस्मिन् प्रवृत्ते च तत्कामस्य निरूपणं॥ १५॥
स्यादेतत्। अधिकाराद् अनुष्ठानं विद्यते सा विहापि च। असत्यपि नियोज्यत्वे तत्सिद्धा तावत्साधनं॥ १६॥ नियोगं प्रति हि नियोज्य
तानास्ति सा तावद्विषयानुष्ठानसाधनं किंतु नियोज्यत्वेन संबद्धस्य पुरुषस्य नियोगः कर्त्तव्यो भवति। स एव हि नियोज्यः यो नि
योगं ममेदं कार्यमिति बुध्यते। यस्य च नियोगः कर्त्तव्यः तस्य तत्साधने कर्मण्यपि अधिकारो भवति स्वकार्यसाधनत्वात्। अधि
काराच्चानुष्ठानं यत्र चान्तरेणापि नियोज्यत्वम् अधिकारो भवत्यवगतः। तत्र तत एवानुष्ठानसिद्धेः किं नियोज्यत्वेन। विद्यते चा
ध्यापने ऽधिकारः। आचार्यकसाधनत्वात्। आचार्यकसाधनत्वेनाध्यापनवचनेन प्रतिपादिते तदर्थिनस्तत्राधिकारवि ४
धानेनानुष्ठानसिद्धिः। तदा तत्सिद्धानुष्ठानेनैवाध्यापनेन तत्त्वात्मको ऽध्यापननियोगो न नियोज्यं परिकल्पयतीति। एवं तर्हि। अ।

धिकारादनुष्ठानसिद्धेरध्ययनस्य च। अध्यापनप्रयुक्तत्ववाचोयुक्तिरनर्थिका ॥ १७ ॥ विनापि नियोज्यमर्थज्ञानसाधनेध्ययने।
स्वाधिकारादेव तदर्थिनोनुष्ठानसिद्धेरध्यापनप्रयुक्तत्वानुपपत्तिः। भवद्भिरपि चेष्यत एवाध्ययनेधिकारः। नियोज्यमात्रं तु नेष्यते।
न तावता परप्रयुक्तत्वमनुष्ठाने भवति। स्वीयादेवाधिकारादनुष्ठानलाभात्। सत्यपि नियोज्ये फलसाधने कर्मणि तत एवानुष्ठानं।
न नियोगात्। कामाधिकारवत्। फलं चासत्यपि नियोज्ये साधनानुष्ठानं प्रयोक्तुं क्षममिति किं नियोज्यसदसद्भावविचारेण। यत्र तु
नियोज्याधीनेव फलावगतिर्विश्वजिदादौ तत्र भवतु नियोज्यापेक्षा। अत्र त्वन्तरेणापि नियोज्यमर्थज्ञानसाधनत्वेनाध्ययनमव
गम्यत इति तत एवानुष्ठानसिद्धेर्नाध्यापनस्याध्ययनप्रयुक्तत्वसंभवः। ततश्च। अप्रयोजकता तुल्या नियोज्याभावतो द्वयोः। अ
धिकारात्प्रयोक्तृत्वं समानमुभयोरपि ॥ १८ ॥ यदि नियोज्याभावादप्रयोजकत्वमध्ययनविधेः ततोध्यापनविधेरपि तदभावाद
प्रयोजकत्वे भेकत्वं भवति अथाधिकारसद्भावात्तस्य प्रयोजकत्वं। अध्ययनविधेरपि तत्सद्भावात्प्रयोजकत्वं युक्तमित्युभयोरपि तर्हि
तुल्यत्वान्नाध्यापनप्रयुक्तत्वमध्ययनस्य संभवति। विचारस्य प्रयुक्तिश्च नाचार्यकविधानतः। स्वेनैव त्वधिकारेण तद्वदध्ययन
स्य सा ॥ १९ ॥ आचार्यकं ह्यध्यापनसाध्यं अध्ययनमात्रमाक्षिपेत् न विचारं। विचारमन्तरेणाप्याप्त्यलाभात्। तेनावश्यमध्ययनज
न्येनैवाधिकारेण विचारमन्तरेणानुपपद्यमानेन तत्प्रयुक्तिरास्थेया। तद्वदेवाध्ययनस्यापि तेनैव प्रयुक्तिः संभवतीति न प्रयोज

कांतरंमृग्यं।येनहिफलेनार्थज्ञानाख्येनेतिकर्त्तव्यतामूत्तोविचारःप्रयुज्यतेप्रयुज्यतेतरांतैरोमनेनकरणम्तमध्ययनं।अथो
५ च्येत।अध्यायनविधिरेवविचारस्यापिप्रयोजकःसहिविशिष्टप्रयोजनाध्ययनगोचरमध्यायनंविदधत्।तत्सिद्ध्यर्थेनादृश
मध्ययनंप्रयुंक्ते।तादृक्त्वंचाध्ययनस्यविचारमंतरेणानुपपन्नंइतितेनैवासावाक्षिप्यतइति।।तदयुक्तंविशिष्टस्ययद्यप्यध्य
5 यनस्यसः।अनुष्ठानंप्रयुंक्ते।नज्ञानस्यानंगभावतः।।२०।।यद्यपिउपनयनद्वारेणाध्ययनंप्रयुंजानोध्यापनविधिरुपनयन
प्रक्रमाधीतस्वाध्यायोध्येतव्यइत्येतद्वाक्यविहितंयदर्थज्ञानार्थमध्ययनंतस्यैवानुष्ठानंप्रयुंक्तेतथापितत्स्वरूपमात्रमेवो
पकारकत्वात्प्रयुंक्तेनत्वर्थज्ञानंअनुपकारकत्वाद्यदित्वर्थज्ञानमध्ययनस्यांगंभवेत्ततोध्ययनप्रयोजकेनविधिनातद्वा
रेणप्रयुज्येत।ज्योतिष्टोमविधिनेवदीक्षणीयाद्वारेणवाङ्नियमः।नतुज्ञानमध्ययनांगं।अध्ययनमेवतुतदंगं।नचांगद्वारे
णाप्रधानंप्रयोक्तुंशक्यं।यश्चज्ञानंनप्रयुंक्तेनासौतत्सिद्ध्यर्थंविचारंप्रयोक्तुमर्हति।ननुयद्यपिनज्ञानमंगंविचारस्त्वंगमेव
वासत्वंनत्वध्ययनांगस्यापितद्द्वारेणाध्यायनेनप्रयुक्तिसंभवः।यदितेनविनानस्यात्प्रधानस्यात्मसंभवः।प्रयोजकस्य
चासिद्धिःततस्तेनप्रयुज्यते।।२१।।अन्यथापिक्रतुस्तल्लाभेस्वात्मलाभेचसिद्ध्यति।नैवकार्यांतरंगस्यप्रयुक्तिस्तेनसिद्ध्यति।।
२२ अध्यापनंत्वध्ययनमन्तरेणानुपपद्यमानंनत्वरूपमात्रमेवनावत्साक्षात्प्रयुंक्ते।ननुतदंगं।यदित्वंगेनविनाप्रधान

भूतमध्ययनमेवनसंवर्त्तेतततस्तद्द्वारेणागममपिप्रयुञ्जीत। पश्वपूर्वमिवपूयच्छरेणाच्छेदनादीनूयदिवांगशून्येनाध्ययनेनाध्यायनं
नसिध्येत् किंत्वंगोपेतमेवाध्ययनमध्यापनोपकारिस्यात् ततोध्यापनेनैवाध्ययनांगंप्रयुज्येतज्योतिष्टोमेनेववानकूनियमः। नचे
तदुभयमर्थास्ति। विनार्थंगेनाध्ययनस्वरूपसिद्धेः अध्यायनस्यानुचतत्स्वरूपमात्रेणात्मलाभात्। तेनयद्यथविघ्नपरिसमाप्तिस
मुपयोगितयाध्ययनस्वरूपेपयोगिनांव्रतनियमादीनांसकलवेदाध्यापनविषयेणाचार्यकविधिना। विघ्नपदिसमाप्त्यांकांक्षि
णाप्रयुक्तिसंभवः तथापिनविचारस्तेनात्तिपतोकार्यान्तरांगत्वात्। अर्थज्ञानाख्यंहिकार्यंसाधयतोध्ययनस्यविचारोंगंनाध्या
पनोपकारिणः तेननासावध्यापनविधिनाप्रयुज्यतेकिंत्वध्ययनजन्येनैवाधिकारेणा। तद्वदध्ययनस्यापितत्तएवप्रयुक्तिःतः
।नाध्यापनविधानेनप्रयुक्तिरुपपद्यते॥२३॥ ॥अथमन्यसे॥ ॥सत्यमध्ययनेस्त्येवाधिकारः किंत्वधीयानेनवाप्तत्वात्
तदाप्त्वेषनगम्यते। नचाविज्ञायमानेनप्रयुक्तिरुपपद्यते॥२४॥ समाप्ताध्ययनेनासौक्रत्वर्थेनावगम्यते। ज्ञातेनचतदातेनविचा
रोपिप्रयुज्यते॥२५॥ ज्ञायमानोप्यधिकारःप्रयोजकोभवति। नचाध्ययनावस्थायांबालेनमाणवकेनासाववगंतुंशक्यते। अतोना
ध्ययनंप्रत्याधिकारप्रयुक्तं। विद्वदधिकाराध्यापनवशेनैवत्वनुष्ठितेध्ययनेसांगेधत्यर्थेनमाणवकेनवेदार्थावगमादध्ययने
स्वात्मनोधिकारेवगम्यते। अवगतेनचतेनविचारःप्रयुज्यतइतितदयुक्तं। हितकारिभिरेवासौज्ञायमानःप्रवर्त्तकः। कर्त्रौवि

ज्ञायमानोपिनैवस्यात्प्रयोजकः॥२८॥यथैवार्त्तेभिषग्भिर्हितकारिभिरौषधसेवाफलवेदिभिरातुरापेक्षितफलांतरप्रतिपादनेन
६ तत्फलप्राप्तिप्रतिषेधेनेनवासामादिनोपायेनाचानुष्ठाप्यमानस्यौषधस्यस्वाधिकारत्वप्रयोजकः।तदभिसंधिप्रवृत्तत्वात्।औ
षधफलमेवत्वारोग्यमभिसंधायभिषज्यंतस्तदनुष्ठापयंति।तथात्राथध्ययनस्याध्यमेवाधिकारंमवगच्छद्भिर्हितकारिभि
6 रनुष्ठाप्यमानस्यनतत्प्रयुक्तताननोपपद्यते।यदिचावश्यमनुष्ठानैवप्रयोजकोज्ञातव्यः ततोध्यापनविधिरपिवालेनतेनाविज्ञायमा
नः प्रयोजकोनस्यात्।अतोयथातस्यपरावस्यंपरावगतस्यप्रयोजकत्वंएवमध्ययनस्याध्यस्यैवाधिकारस्यभविष्यतीतिनाध्यापल
विधिप्रयुक्तमध्ययनं।यदिचनतत्प्रयुक्तंस्यात्ततोनार्थज्ञानार्थतासिध्येत्।नहिप्रतिलब्धानुष्ठानस्यप्रयोजनापेक्षासंभवति।य
दंनर्थदंगत्वादर्थज्ञानंप्रयोजनंस्यात्।नचाधिकारस्यपर्यवसायिनः सर्वविधयइत्यध्ययनविधिनापितथाभवितव्यं।नाअ
नुष्ठानलाभात्।अनुष्ठानार्थेत्वधिकारोपेक्षतेलब्धेचतस्मिन्ननदपेक्षायांनिबंधनमस्ति।स्यादेतत्॥अध्ययनविधिरधिकार
पर्यवसाय्यविधित्वादग्निहोत्रादिविधिवदिति॥ ॥तदयुक्तं॥अध्ययनविधिरधिकारविधुरः तदलाभेपिलब्धात्मक
त्वात्।यस्यविधेर्यदलाभेप्यात्मलाभोभवति।सतद्विधुरः नैमित्तिकविधिरिवफलविधुरःइतिप्रतिहेतुसद्भावात्।यदिचा ६
नुपपत्त्यभावेप्यन्यत्रदृष्टमितिकृत्वाधिकारः कल्प्यते।ततःफलपर्यंतत्वंकाम्येषुदृष्टमितिनिषेधनैमित्तिकविध्योर

पितत्पर्यंतत्वं स्यात्। न चैतदिष्टं। तस्मान्नाध्ययनेधिकारपर्यवसानसिद्धिः। अथ विधेरतत्परत्वेपि दृष्टत्वादर्थज्ञानमंगीक्रिय
ते। तन्न। अतत्परत्वेध्ययनस्याध्यापनपरत्वेन प्रतीयमानस्यार्थस्य अविवक्षितत्वात्। अविवक्षितस्य च विचारानर्हत्वात्। अ।
नारभ्यमेव शास्त्रं स्यात्। अथापि कथंचिद्विवक्ष्यते तथापि विधेरतत्परत्वान्न वैधत्वं विचारस्य सिध्यति। अवैधश्च न वैधं स्नानमु
त्क्रष्टुमर्हति। यदि त्वध्ययनविधिरेवाध्ययनमर्थज्ञानावसावसानं विदध्यात्। ततस्तेन विचारमन्तरेणार्थस्य ज्ञातुमशक्यत्वा
त् विचारो थर्थाक्षिप्तः स्वविरुद्धं स्नानमुत्कर्षेत्। यदा त्वध्ययनमात्रादेव विध्यर्थोनुष्ठितः तदा न विधिस्तावद्विचारानुष्ठानमा
क्षिपति। यदि परमुत्तरकर्मानुष्ठानार्थं पुरुषः स्वेच्छया लौकिकेनन्यूपेणार्थनिर्णयोपायेषूपदेष्टृवचनादिषु प्रवर्तमानः क
दाचिद्विचारमपि कुर्यात्। तथा सति कर्मानुष्ठाने समुपस्थिते सत्युपदेष्टृलाभे चासावनुष्ठापयेत्तानोवश्यमध्ययनानन्तरमेवानुष्ठानं
सिद्ध्येत्। नन्वध्ययनांगभूतो विचारः। न चानंगेन करणेन विधिः सिध्यतीति विधिरेव स्वसिध्यर्थं विचारमनुष्ठापयतीति। कथ
मवैधत्वं विचारस्य। सत्यमध्ययनांगं विचारः तथापि न विधिसिद्धावुपयुज्यते। अर्थज्ञानाख्यकार्योपयोगित्वात्। न च का
र्यान्तरोपयोग्यंगं कार्यान्तरेणान्तरेककरणकेनापिहृष्टिकामापूर्वेणोवसोभरकरणकेनान्नाद्यकामापूर्वोपयोगिसोभरांगमपू
र्वं यनिधनं प्रयुज्यते। अथ विधिरेवार्थज्ञानार्थोध्ययनमाध्यत्वात्। तादृग्विषयसंपत्त्यै विचारमाक्षिपतीत्युच्यते। तदध्या

८

पनविधिप्रयुक्तत्वं विचारस्य निराकुर्वद्भिर्निरस्तमेवास्माभिः। यद्यपि त्वर्थज्ञानार्थमध्ययनं तथापि न तेन तद्रूपेण विधिसाधनत्वं। स्व
रूपेणैव तत्साधनत्वात्। यदन्तरेणैव विधिर्न सिध्यति। तस्यैवासावनुष्ठानमाक्षिपति। नान्यस्य। यद्यपि विचारमन्तरेण विधिर्न
सिध्येत्। तथापि नासौ विचारानुष्ठानमाक्षिपति। नियोज्याभावात्। न ह्यसौ केनचित्पुरुषेणाममेदं कार्यमिति प्रतीयते। तेन
स्वात्मन्यपि नावन्तरं न प्रवर्त्तयेत्। कुत एव स्वसिध्युपाये। अत एवाध्ययनेऽथस्यानुष्ठापकत्वं न संभवति यस्य हि करणेष्वनु
षुसंभवे
ष्ठापकत्वं न संभवति। तस्य कथमंगत्वं तस्मान्नैव वैधत्वं विचारस्य सिध्यति स्यादेतत्। अध्ययनविधिरेवाध्ययनस्यार्थोज्ञा
तमर्थथेज्ञानं प्रयोजनं स्वीकृत्य तत्सिध्यर्थं विचारमाक्षिपतीति। तदयुक्तं। अध्ययनविधिरर्थोज्ञातमस्यार्थज्ञानं प्रयोजन
त्वेन स्वीकरोतीत्यस्य कोऽर्थः। न तावत्तत्र विनियुंक्ते प्रमाणान्तरत एव तत्साधनत्वावगमात्। अवघातादिवन्नियमविध्य
नभ्युपगमात्त्व। अथ तादर्थ्यमनुमन्यत इत्युच्यते। तन्न। अननुमतस्यापि तादर्थ्यस्य लाभात्। यदनुमत्यभावेऽपि पलभ्यते।
तत्तदनुमन्यत इति हास्यमतेन लभ्यते चान्तरेणापि विध्यनुमतिं अध्ययनस्यार्थज्ञानार्थत्वेति कोऽर्थोऽनुमत्यानत्सान्नकथं
चिद्विचारस्य वैधत्वे सिध्यतीति। न तद्बलेन स्नानोत्कर्षः शक्यते कर्तुं। अध्ययनमात्रेणैव समाप्ते विध्यर्थे सत्यनन्तरं वेदम ८
धीत्य स्नायादिति स्मृतिबलेनानन्तरमेव स्नात्वा पश्चात् ज्योतिष्टोमादिकर्मानुष्ठाने समुपनिपतिते सति तन्निर्णयार्थमु

यायांतरलाभे विचारोपि कदाचिदनुष्ठीयेत वा न वेत्यथातो धर्मजिज्ञासेति सूत्रमानंतर्यप्रतिपादनपरमनुपपन्नं स्यात्तस्मान्नाध्या
पनविधिप्रयुक्तमध्ययनमिति। कश्चासावध्ययनविधिः यत्प्रयुक्तमध्ययनं। यच्चोच्यते उपनीय तु यः शिष्यं वेदमध्यापये
द्द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते इति स्मृत्यनुमितमुपनीयाध्यापयेदाचार्यकस्येच्छ्यर्थमित्येवंरूपं वचनमिति तदयु
क्तं। नाध्यापनमिदं वाक्यं विधातुं क्षमं नेयतः द्रव्यार्जनार्थं प्राप्तत्वात् धच्छब्देन च संगतेः॥२७॥ यथैवैतयाच्ञाधकामं याजयेदित्या
दिषु याजयतेः परः। श्रूयमाणोपि विधिर्योगविधिपर एव प्रयोजकव्यापारवचनः शब्दो द्रव्यार्जनार्थप्राप्तर्त्विक्व्यापारा
नुवाद इति स्थास्यति। तथाध्यापयेदित्यध्ययनविधिपर एव। नाध्यापनविधिपरः द्रव्यार्जनोपायत्वेनैव प्राप्तत्वात्। उपन
यनमप्यध्ययनांगमेव। अध्येतृसंस्कारत्वात्। तेनाष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेति वचनं व्याख्यातं। ननु चतत्रो
पनेयनस्यात्मनेपदश्रवणादाचार्यकार्थत्वमवगम्यते। न अकर्त्रभिप्रायार्थत्वात्तत्र नयतेरात्मनेपदविधानस्य। अन्यथास्वरि
तत्रितइत्यनेनैवाचार्यकसाध्यनेयर्थे वर्तमानान्नयतेरात्मनेपदसिद्धिरिति संमाननादिसूत्रमनर्थकं स्यात्। तथा चाहुः। अ
कर्त्रभिप्रायार्थः पुनरयं भइति। तस्मादध्येतृसंस्कारद्वारेणाध्ययनांगमेवोपनयनमिति। अनुषंगाद्धाजिनमिवाभिज्ञार्थंदध्या
नयनमाचार्यकं साधयति न तु तदर्थं। तस्मान्नाचार्यकार्थतयाध्यापनस्य विधायकं वचनमस्ति किंच। न चालौकिकमाचार्यकं। उप

न.

नीयवेदत्तानुरेवाचार्यशब्दोवाचकः पाचकादिवत्। उपनायतुयः शिष्यमित्यपिशब्दार्थप्रतिपादनपरमेवातेनाविद्यमानत्वादध्या
८ पनविधेर्नतत्प्रयुक्तमध्ययनं। अथापिविद्यादानेनसुमतिर्ब्रह्मलोकेमहीयतइत्यादिभिर्विद्यादानात्मकत्वादध्यापनमपि
8 फलांतरशेषतयाविहितंभवेत्। तथापितत्रसार्वत्रिनियोज्याश्रवणात् अधिकारमात्रस्यचाध्ययनेपिसद्भावाद्विचारस्यावै
धत्वप्रसंगात्त्राध्यापनविधिप्रयुक्तमध्ययनंकश्चित्तुनराह। यद्यध्ययनस्यस्वाधिकारेणाप्रयुक्तिः संभवतितथापिना
सावाश्रयितुंयुज्यते। तथाहि ज्ञानंनाध्ययनस्यस्यात्त्वमहिम्नाप्रयोजकं। नत्साध्यमग्निहोत्रादितद्द्वारेणाप्रयोजकं॥२८॥न
त्वर्थज्ञानंस्वयमपुरुषार्थत्वात् अध्ययनस्यप्रयोजकंभवितुमर्हति। ज्ञानसाध्यानित्वग्निहोत्रादीनिचपूर्वाणितद्वारेणाध्य
यनस्यप्रयोजकानिभवंति। नचतेषांज्ञानमंगंउपकारकमात्रत्वात् आचार्यकस्यतुअध्यापनमंगमेवअतस्तत्त्वाङ्गद्वारे
प्रयोजकत्वंलभते अग्निहोत्राद्यपूर्वाणि तूपकारकद्वारेणानचामिक्षावदंगद्वारेणापिप्रयोजकत्वलाभेसतिउपकारद्वारेणाव
जिनवत्प्रयोजकत्वंयुक्तमंगीकर्तुं। तस्मादध्यापनविधिप्रयुक्तमध्ययनमिति। तदयुक्तं। यद्यपिहिनज्ञानंकर्मणामंगंज्ञा
नस्याध्यापनंमतं। अंगंनाध्यापनस्येतत्नतेनातःप्रयुज्यते॥२९॥ यद्यपिनकर्मांगंज्ञानंअध्ययनंतुज्ञानांगमेव। तेनप्रयुज्य ८
मानमध्ययनंशेषिप्रयुक्तमेवभवति। नचाध्यापनस्याध्ययनमंगं अतस्तेनप्रयुक्तमध्ययनमुपकार्यमात्रप्रयुक्तंस्यात्। नशेषिप्र

युक्तं तेन शेषिप्रयुक्तत्वे संभवत्युपकार्यप्रयुक्तत्वमयुक्तमिति सुतरां स्वाधिकारप्रयुक्तमध्ययनं नाध्यायनप्रयुक्तं यद्यपि ज्ञानं स्वरूपे
ण पुरुषार्थः। तथापि कर्मानुष्ठानोपयिकत्वात् पुरुषैरर्थ्यत एवेति पुरुषार्थत्वात् तत्स्वाधिकारस्य प्रयोजकत्वं संभवति। आचा
र्यकवत्॥ तदपि स्वरूपेण नाभिलषितं दक्षिणालाभसिध्यर्थमेव पुरुषेणार्थ्यते। अतो यथा तस्य प्रयोजकत्वम् एवं ज्ञानस्यापि। न
त्ववश्यं स्वरूपेणैवार्थितं प्रयोजकमिति नियमः समस्ति। सुखसाधनपशुपुत्रादिवत् फलानां साधनस्यार्थितस्य प्रयोजक
त्वाविशेषात्। यद्यपि चाग्निहोत्राद्यपूर्वमेव ज्ञानद्वारेण प्रयोजकं तथापि तद्देव युक्तं नाध्यायनं। पुरुषान्तरगामित्वात्। अध्येत
गाम्येव तु ज्ञानं वा तत्साध्यं वाग्निहोत्रादि प्रयोजकमध्ययनस्य युक्तं। यो यं गद्वारेणाध्यायनविधेः प्रयोजकत्वं उपकारद्वारेणाग्नि
होत्रादीनामिति विशेषोभिहितः सोपि नास्ति। द्वयोरप्यंगत्वमुपकारकत्वं च द्वारमेव। तथाहि। अग्निहोत्राद्युपकारकत्वात्त्वद्वा
नेतदंगत्वाच्चाध्ययनं प्रयुंक्ते। आचार्यकं त्वंगत्वाद्ध्यायनं तदुपकारकत्वाद्वाध्ययनं प्रयुंक्त इति क्रमभेदमात्रं नैतावता कश्चिद्विशे
षः। समानपुरुषगामित्वादग्निहोत्रादीनामेव प्रयोजकत्वं नाध्यायनविधेरिति। न चाग्निहोत्रादि प्रयोजकं। ज्ञानमेव प्रयोजकं इति
प्रयुक्तं। तदेतद्विस्पष्टं प्रपंचयिष्यते। कथं वाचार्यकविधिः पुरुषान्तरगामी पुरुषान्तरकर्तृकमध्ययनं प्रयुंजीत समानपुरुषगामि
नो हि दर्शपूर्णमासादिविधयः कार्यतया प्रतीयमानाः युक्तं यत्तस्यैव पुरुषस्य स्वसाधनेषु प्रयाजादिषु स्वसिद्ध्यर्थमनुष्ठानं

स्व

प्रयुंजते। अन्यसाध्यं तु कार्यमन्यस्य कथमिवानुष्ठाय कं भवेत्। न हि स्वकार्यसाधनादन्यत्र चेतनः प्रवर्त्तते। यद्यध्यापयितैवास्य
१ स्वाधिकारप्रदर्शनात्। अनुष्ठापयिता तत्र स्वाधिकारप्रयुक्तता॥३०॥ यद्यप्येतद् आचार्यत्व[illegible]च कार्यसिद्ध्यर्थमध्ययने माणव
9 कं स्वाधिकारप्रदर्शनेन प्रवर्त्तयतीति। सत्यमेवं। किं तु तथा सति स्वाधिकार एव प्रयोजकः स्यात्। नाध्ययनविधिः। स्थपती
ष्टेरिव स्वाधिकारः सा त्वधनभिन्नान्निःषादाधिकारापि द्रव्यार्जनप्रवृत्तेर्न्नौत्विग्भिः धिकारप्रदर्शनेन निषादेनानुष्ठायमाना
स्वाधिकारप्रयुक्तैव। न द्रव्यार्जनविधिप्रयुक्ता। तथाध्ययनमपि पूर्वपक्षेन शक्यं च स्वाधिकारप्रदर्शनं। नाध्यापनप्रयु
क्तत्वमतस्तत्र प्रसिध्यति॥३१॥ भवतु वाध्यापयितुः स्वाधिकारप्रदर्शनेनापि माणवकस्यानुष्ठायमानस्याध्ययनस्याध्या
पनप्रयुक्तत्वं न चैतदपि पूर्वपक्षे संभवति न हि तत्र माणवकस्य कश्चिदधिकारोस्ति यत्प्रदर्शनेनासावध्याप्येत। आचा
र्यकसिद्धिमात्रप्रयोजनत्वादध्ययनस्य पूर्वपक्षे। ननु नियोगसिध्या पूर्वपक्षेप्यधिकारः संभवति। न अकार्यत्वात्। न हि मा
णवकस्य नियोगः कार्यः येन तत्सिध्यर्थ्यधिकारः स्यात्। अनियोज्यत्वात्। न ह्यनियोज्यस्य नियोगः कार्यः। अतस्तत्सिध्या
नाधिकारः संभवति। अथाप्यस्यापि स्वाधिकारे सामादिनोपायांतरेण कथंचिदध्याप्येत। तथा सति विश्वजिदादीनामपि क १
यं चिदार्त्विज्यप्रवृत्तेरेव पुरुषैः प्रवर्त्त्यमाने न यजमाने नानुष्ठानसंभवात्। नानुष्ठानसिद्ध्ये अधिकारसिद्ध्यर्थे नियोज्य

परिकल्पनंसिध्येत्।अर्थानर्थकत्वान्नर्त्विजोयजमानंयाजयंति।नत्वसावनधिकारीतेभ्योदक्षिणांददाति।तदत्रापिसमा
नेनत्वध्ययनेअनधिक्रियमाणोमाणवकोदक्षिणाद्याचार्यस्याचरति।तच्छुश्रूषयाचाचार्यककरणंनत्वाचार्यकंस्वतन्त्र्येण
पुरुषस्याभिप्सितं।नचपूर्वपक्षेध्ययनंमाणवकमधिकरोति।तेनाध्यापनेनप्रयुक्तिसंभवः।पक्षद्वयसाधारणाचतत्प्रवृत्ति
र्भवद्भिरिष्यतेविघातादनेनसुमतिरित्यपिपुरुषार्थज्ञानदानाभिप्रायं।अन्यथालोकायतिकशास्त्रार्थज्ञानदानमपिब्रह्म
लोकायकल्प्येत।नचाध्ययनस्यपूर्वपक्षेपुरुषार्थतास्तीतिनब्रह्मलोकप्राप्तिफलविघातान्नविधिवशादर्पितस्यप्रयुक्तिः
संभवति।तत्सिद्धंनाध्यापनविधिप्रयुक्तमध्ययनमिति।नैवंपूर्वपक्षोत्तरपक्षावुपपन्नाविति।।तस्माद्वार्तिककारीयागं
भीराभाष्यंमता।स्वाध्यायविधिवाक्यार्थगोचरानिरूप्यते।।३२।।स्वाध्यायोध्येतव्यइत्यध्ययनावच्छिन्नाभावनाविधि
युक्तातव्यप्रत्ययेनाभिहिता।भाव्यापेक्षायांसमानपदोपात्तमध्ययनंअपुरुषार्थत्वादुद्देश्यपुरुषार्थरूपंकिमपिभाव्यम
पेक्षमाणावतिष्ठते।तत्रसंदेहः।किंविश्वजिन्न्यायेनस्वर्गोभाव्यःकल्प्यतांउतान्तरसंस्कारादिपरंपरयासाध्यमानंवाक्यार्थ
ज्ञानमेवभाव्यमिति।तत्रपूर्वःपक्षः।नार्थज्ञानार्थतायुक्तप्रमाणान्तरसिद्धेः।सस्वर्गःस्यादितिन्यायादतःस्वर्गार्थताभवेत्
।।३३।।यद्यपिचाध्ययनानन्तरंब्रह्मणादिपदावधारणापदार्थसंवित्स्मरणादिकयावाक्यार्थज्ञानमुपजायमानंदृश्यते।तच्चफलवत्क

र्मानुष्ठानोपयोगितयापुरुषस्याभिलषितंशक्नोत्येवभाव्यभावमनुभवितुं।नचदृष्टेसंभवत्यदृष्टंशक्यंकल्पयितुंइत्यर्थज्ञानार्थेने
१० वयुक्तेतिबुद्धिर्भवति।तथाथप्राप्तेशास्त्रस्यार्थवत्त्वात्प्रमा।णान्तरादेवार्थज्ञानस्याध्ययनभावनाभाव्यतासिद्धेःतादर्थ्येविध्या
10 नर्थक्यप्रसंगात्।विश्वजिन्न्यायेनस्वर्गार्थतैवयुक्ता।यद्येवंतत्प्रमाणान्तरसिद्धेपिनियमार्थोवघातवत्।उपपन्नोविधिर्नैवंक्र
त्वर्थत्वाद्धितानन्तत्।।३४।।प्रमाणान्तरादेवार्थज्ञानार्थत्वेसिद्धेएवघातादिवन्नियमार्थत्वाद्विधेर्नानर्थक्यमितिचेत्।नैवंयुक्तं।अ
क्रत्वर्थत्वादध्ययनस्य।अवघातादयोहिक्रतावेवनियम्यन्ते।अवघातेनैवनिर्वर्त्यमानास्तंडुलाःक्रत्वपूर्वंसाधयंतीति।नतंडुल
स्वरूपेप्रमाणान्तरविरोधात्।नखविलुंछनादिनापितन्निर्वृत्तिदर्शनात्।एवमिहापिज्ञानोत्पत्तेरंतरेणाप्यध्ययनंपुस्तकनिरी
क्षणादिनापिसंभवान्नतत्स्वरूपेतावन्नियमःसंभवति।यदिपरमध्ययनापादितज्ञानपूर्वकमेवक्रत्वनुष्ठानमभ्युदयायघटत
इतिनियम्येततच्चाक्रत्वर्थत्वादध्ययनस्यायुक्तं।तन्नियमार्थत्वानुपपत्तेःस्वर्गार्थतैववरमिति।अथनिर्देशादार्थवादिकमे
वफलंयुक्तं।अश्रुतोहिफलंकल्प्यंस्यात्।इहतुयंयंक्रतुमधीतेतेनतेनास्येष्टंभवतीतिक्रतुफलावाप्तिः।यदृचोधीतेपयसः १०
कुल्याअस्यपितॄन्स्वधाअभिवहंति।पयआहुतिभिरेवतद्देवांस्तर्पयतितेनपितरोदेवाश्चैनमध्येतारंतृप्ताआयुरादिभिस्तर्पयंतीति
आयुरादिप्राप्तिरुपिस्मर्यतएवनतस्मात्स्वर्गार्थः।यःस्वसम्यग्द्विजोधीतेस्वाध्यायंशक्तितोन्वहं।अहेवसनस्वाग्रेभ्यःपरमंतथ

नेतपद्इति न पः फलप्राप्तिरपि श्रूयत एव तस्मात्स्वर्गार्थतानयुक्तेति। तत्र ब्रूमः। आद्येत्वध्ययने नैव काचिदस्ति फलश्रुतिः। धारणे जप
यज्ञे च फलश्रुतिरियं यतः ॥३५॥ क्रतुफलावाप्तुरादि प्राप्तिरुक्ता वत्तु यज्ञाध्ययनगोचरा। धारणाध्ययनगोचरा यतस्तु तयः फलप्राप्तिः। आ
द्येतु स्वीकरणाध्ययनेन किंचित्फलश्रवणमस्ति। यत्तो निर्देशाद श्रुतानुमानं न क्रियेत। चोदकादपि शब्दभावने तिकर्तव्यताभूतं
प्राशस्त्यमात्रं लभ्यते। न त्वापुरादिस्वरूपं। तस्मात्स्वर्गार्थत्वादध्ययनस्यानुवचनमात्रेणैव विचारमन्तरेणाशास्त्रार्थसमाप्तेः न तदुद्दे
न स्नानोत्कर्षः शक्यते वक्तुं मित्यध्ययनानन्तरं वेदमधीत्य स्नायादिति स्मृत्यनुमितवचनवशेन स्नात्वा पश्चात्प्रयोजनवशेन वि
चारप्रवृत्तिर्वान वा। न च न्यायादध्ययनात्प्रतीयमानोऽर्थः अविवक्षितइति कथं विचाराभ्यनुज्ञानेषदोषः। अर्थप्रतिपादकस्यार्थं
नू स्वार्थाध्ययनसंभवात्। यथा सिद्धांत एव याजयित्वा प्रतिगृह्यवान् अत्रैत्रिस्नायाद्वेदमधीयीतेति प्रायश्चित्तार्थेऽध्ययने विहि
तेन वेदस्याविवक्षितार्थतापाद्यते। तथा स्वर्गार्थेऽध्ययने दृष्टत्वं नत्वर्थप्रतिपादनसमर्थस्य शब्दस्य कदाचिददृष्टार्थमुच्चार
णात्तु तमित्येतावता स्वाभाविकमर्थपरत्वं हीयते। तत्सिद्धं नाध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येति। अत्रोच्यते। दृष्टप्रयोजनालाभे
सत्यदृष्टं प्रकल्प्यते। दृष्टमेव त्विह ज्ञानं विधेश्च नियमार्थता ॥३६॥ यद्यप्यध्ययनस्यार्थज्ञानार्थता प्रमाणान्तरसिद्धा तथापि न
विधेरानर्थक्यं नियमार्थत्वात्। अक्रत्वर्थतया यत्तु नियमार्थत्ववारणं। तत्प्रयोजनमात्रत्वान्नियमस्य न दूषणं ॥३७॥ यदि हि वा

क्वार्थ एव नियमः स्यात्। ततो र्थज्ञानस्वरूपे नियमायोगात्। क्रतो चातदर्थस्या नियमान्न नियमार्थेतावकल्प्येत। न चेत्तदस्ति। अप्राप्त
विधिरेवायं यावद्दित्फलवत्कर्मानुष्ठानोपयोगिज्ञानोपायतया नानोपायानुष्ठानेनोत्पद्यते। तावत् द्विजातीनामुपनीतानां तत्र
क्रमाधीतस्वाध्यायो ध्येतव्य इति प्रत्यत्तयाश्रुत्या अध्ययनं विधीयते। श्रुतेर्लिंगतः शीघ्रप्रवृत्तेः। विहिते तु तस्मिंस्तदापादितस्वा
नैरेव लब्धानुष्ठानान्युत्तरकर्माणि। अवघेत्वादभावः कर्मणि स्यात् इत्यनेनन्यायेनाविद्वांसमधिकृत्य नतस्य ज्ञानस्यैवार्थ
मुपायांतरमास्तिपंतीति फलतो नियमभाषात घथा दर्शनादनमंत्रस्य लिंगादेवाश्वरश्मिनां गत्वे सिद्धेपि प्रत्यक्षश्रुतिविनियोगः
परिसंख्याफलः न हि तत्र परिसंख्यावाक्यार्थ एव। स्वार्थहानादिदोषात्। श्रुतेश्च पूर्वलिंगेन गर्दभरशनायामप्राप्तेः अतो प्रा
प्तिविधिरेव फलतः परिसंख्यावाचोयुक्तिः। एवमध्ययनविधावपि नियमवाचोयुक्तिर्द्रष्टव्या। न तावता अध्ययनस्य श्रुत्वं
गत्वप्रसंगः। तदापादितमेव ज्ञानं क्रत्वंगं अध्ययनं तु ज्ञानांगमेव। यथा आधानसाध्यानामग्नीनां क्रत्वर्थत्वे पि ना धानस्याद्र
व्यस्याकर्मकालनिष्पत्तेः प्रयोगस्यातदर्थत्वमिति न्यायेन क्रत्वर्थत्वं। एवमिहापि द्रष्टव्यं। एकदेशिनाचाध्ययनविधिगोचराध्या
पनविधिप्रयुक्ता ध्ययनसंपादितमेव ज्ञानमुत्तरकर्मांगमस्तुपर्यातव्या। अन्यथाऽयः कश्चिच्छूद्रोपि वेयात्पाद ध्ययनेनोपायांतरेण
वा क्रत्वज्ञानं संपादयेत्। तस्य दुर्निवारोधिकारः स्यात्। तेना ध्ययनविधिविहितोपनीतकर्तृकव्रतनियमादीतिकर्त्तव्यतो

पेताध्ययनपूर्वकज्ञानवत्तामेवोत्तरकर्मस्वधिकारः तथासत्यविनाध्ययनस्यक्रत्वर्थत्वमिति। इदं तावद्देशिनोस्माकं च तुल्यमे-
वयदध्ययनं तु स्वविधिप्रयुक्तमाचार्यकरणविधिप्रयुक्तमवेत्यत्र विवादः तेनाप्रकरणाधीतत्वान्नापूर्वार्थं ज्ञानार्थतया चाध्यय
नविधानं येन क्रत्वर्थं स्यात्। किं त्वध्ययनापादितं ज्ञानं क्रत्वर्थत्वमिति तत्सिद्धं नियमार्थत्वाच्चानर्थक्यं विधेर्भवेत्। तेन दृष्टार्थ
तालाभादर्थज्ञानार्थता स्थिता॥३८॥ कथमिदानीमनर्थकानां हुम्मादीनामध्ययनमर्थज्ञानार्थं कथं च क्षत्रियाद्यधिकाराश्वमेधादि
ग प्रतिपादकस्य वेदभागस्य ब्राह्मणादिभिरध्ययनमर्थज्ञानार्थं यद्यपि कथंचिद्ब्राह्मणस्य याजनोपयोगिज्ञानार्थमध्ययनं संभाव्य
ते तथापि क्षत्रियवैश्ययोर्वैश्यस्तोमाश्वमेधाध्ययनमनर्थकमेव। अदृष्टार्थं वा। कथं च निषेधवाक्येषु नावगुरेत न निहन्यादि
त्यादिषु नियमवर्णानां पदितावदध्ययनापादितज्ञानवत एवावगोरणानुष्ठानं प्रत्यवायाय भवति नान्यस्येति कल्प्यते तथास
त्यनिष्फलत्वमध्ययनस्य स्यात्। को हि नाम प्रत्यवायफलकं निषेधवाक्यार्थज्ञानमिच्छेदिति यस्तदध्ययनमनुतिष्ठेत्। अथ नि
षेधेष्वननुष्ठानस्य शास्त्रार्थत्वात्तद्विषय एवायं नियमोध्ययनपूर्वकज्ञानवत एवाननुष्ठानं प्रत्यवायपरिहाराय भवति तदेषां व
ननुष्ठाने षिनैवासौ परिह्रियत इति तथा सत्यनधीतवेदानामननुष्ठानेपि प्रत्यवायस्यावश्यंभावादनुष्ठानेपि तस्य तावत्त्वा
द्यथाकामं निषिद्धानुष्ठानं स्यात्। न चैतदिष्टम हिंसादीनां सर्ववर्णसाधारणत्वात्। तस्मात्तत्र नियमोपपत्तिः। कथं च स्वाध्याय

ध्ययनविधिवाक्ये नियमः न हि तदर्थानुष्ठानं तदध्ययनपूर्वकं संभवति अध्ययनमेव हि वाक्यार्थः कथं चाध्ययनपूर्वकमध्ययनं
१२ संभवति आत्माश्रयदोषप्रसंगात्। अथैवमादिष्वदृष्टार्थमध्ययनं। तथासत्यवैनूथात्सर्वत्र तथाप्रसज्येत। तत्रार्थज्ञानार्थमध्य
12 यनं॥ अत्राभिधीयते॥ न केवलार्थविज्ञानं स्वविधेरस्य प्रयोजनं। अपेक्षितं दृश्यते यत्सर्वं तत्फलमिष्यते। यदि त्वध्ययनस्य के
वलमर्थज्ञानमेव प्रयोजनमस्माभिरिष्येत। ततो यथोदाहृतेषु तदसंभवादुपालंभः स्यात्। न नु केवलं तत्प्रयोजनं परं त्व हि वि
ध्यंतरोपयोगमपेक्षितमध्यय नेन साध्यमानं दृश्यते तत्सर्वमस्य प्रयोजनं। तेन च यथा क्रतुविधिभिस्तत्तज्ज्ञानमपेक्षितं तज्ज्ञानं
प्रयोजनमेवं नित्यनैमित्तिकजपयज्ञपारायणादिविधिभिरहरहः स्वाध्यायोऽध्येतव्यः याजयित्वा प्रतिगृह्य वानश्नन् त्रिः स्वा
ध्यायं वेदमधीयीतेत्यादिभिर्वेदस्वरूपावधारणमपेक्षितव्यमिति भवति तत्प्रयोजनमतोऽध्ययनोपात्तस्य वेदस्य यथायोगं प्र
त योजनकल्पनो[illegible]दनुरोधेन। च नियमवर्णना ज्योतिष्टोमादिष्वध्ययनार्जितेनैव वेदेन विज्ञातः क्रतुः फलं साधयतीति नियमः
मंत्रेष्वध्ययनोपात्तमंत्रकृतमेव स्मरणमनुष्ठानांगमिति। हुमादिष्वध्ययनोपात्तैस्तारावहुमादयः सामभागपरिपूरका इति च वर्जा १२
त्तिः कालोपलक्षणं भवंतीति स्तोत्रशास्त्रजपमात्रोपयोगिषु तदुपात्तैरेव स्तोत्रादिकार्यमिति निषेधवाक्येषु ब्राह्मणादीनां
चाश्वमेधादिषु जपयज्ञादिमात्रोपयोगिष्वध्ययनोपात्तैरेव षाडादिकार्यमिति॥ ॥आह च॥ ॥यत्र तावद्गुरुसकाशादध्यय

नैवविचारस्तत्रधारणजपयज्ञक्रत्वर्थज्ञानसिद्धिनिराकांक्षत्वान्नकश्चित्फलान्तरकल्पनावसरइत्याध्ययनविधौतुतद्विधेयस्यकर
णाशास्याध्ययनस्यस्वपूर्वकत्वमात्मापरदोषप्रसंगान्नभवतीतितद्विधेयस्यैवविचारस्येतिकर्त्तव्यताभूतंत्पूर्वकत्वनियमःअ सत
ध्ययनोपात्ते नैवाध्ययनविधिनाविचारकर्त्तव्यतामवगम्यविचारोनुष्ठेयइति।अतएवाध्ययनविधिनैवविचारस्यकर्त्तव्य
तांविचारानुष्ठानात्प्रागेवावगंतुंशास्त्रादावध्ययनविधिवाक्यार्थविचारःकृतः।अर्थवादेष्वध्ययनोपात्तैरेवार्थवादैःश्रोचितं
कर्मानुष्ठानव्यमिति उपनिषत्सूपानियानिकर्तृभोक्तृरूपात्मप्रतिपादनपराणिवचनानितैरध्ययनोपात्तैरेवभूत
भौतिकसंघातातिरिक्तंसांपरायिकफलोपभोगयोग्यमात्मानंज्ञात्वाक्रतुरनुष्ठेयइति।यानित्वकर्तृभोक्तृरूपात्मप्रतिपादकान्यय
यमात्मापहतपाप्माविजरोविमृत्युरित्यादीनितेषुतद्भज्ञानस्यस्वयमेवसर्वांश्चकामानवाप्नोतिनसपुनरावर्त्ततइत्यादिप्रदर्शि
ताभ्यकरद्यतिनिःश्रेयसफलत्वादध्ययनोपात्ताभिरेवोपनिषद्भिःसंपादितमात्मज्ञानमभ्युदयनिःश्रेयसफलंभवतीतिनि
यमःसर्वेष्वार्थेनियमःफलतयासंपन्नोनतुवाक्यार्थराधतिद्रष्टव्यं।नचैवंनानाप्रयोजनांगीकरणात्वैरूप्यमध्ययनविधेर्म
तव्यं।स्वाध्यायसंस्कारभूतेनाध्ययनेनय।।छकपत्तेपेक्षितंसंपादयितुंतत्कुर्यादित्येकपैववचोभंगपासर्वार्थत्वलाभेनवैरू
प्याभावात्।यदित्वध्ययनेष्वाध्यायद्रव्यकंप्रधानकर्मकदाचित्स्यात्।कदाचिन्नस्वाध्यायस्याध्ययनंसंस्कारःतदास्वाध्या

योध्येतव्य इति पदद्वयार्थयोर्गुणप्रधानभावान्वैरूप्यं स्यात्। नत्वेतदस्ति सर्वथैवाध्ययनस्य स्वाध्यायप्रधानत्वात्। कश्चित्तु
१३ नेत्याह। न संस्कारत्वमध्ययनस्योपपद्यते। स्वाध्यायस्य भूतभाव्युपयोगविरहात्। न हि तस्यार्थज्ञाने विनियोजकं किंचि
दस्ति। न चाध्ययनविधिरेवास्य विनियोजक इति युक्तं॥ न हि संस्कारविधिर्होमविधिवत्संस्कार्यं विनियोक्तुमर्हती
13 ति तेनाध्ययनस्य न संस्कारत्वसंभव इति तदेतद्भाष्यवार्त्तिकपरिश्रमविधुरस्य अपन्यायशिक्षातमिस्रातिरस्कृतवि
वेकस्य मीमांसान्यायसोदर्याममभिज्ञस्यानुपासितगुरोर्मातृप्रियस्य यत्किंचित्प्रलपितं। तथा हि स्वाध्यायमात्रपर्यन्ते विनियोगो
भवेदयं दोषोऽर्थज्ञानपर्यन्ते सति सामादिवद्भवेत्। यदि त्वध्ययनस्य स्वाध्यायमात्रपर्यन्तो विनियोगः स्यात्तदायं दोषः स्या
त्। यदा त्वध्ययनस्याक्षरग्रहणादिपरंपरयार्थज्ञानसाधनस्य दृष्टसामर्थ्यानुसारेणार्थज्ञानपर्यन्त एव विनियोगस्तदा तेनैव विधि
ना स्वाध्यायस्याप्यर्थज्ञाने विनियोगो लभ्यते तत्संस्काररूपद्वारेणैव तस्यार्थज्ञानजननसामर्थ्यात्। किमिति पुनस्तन्मात्रे
पर्यवस्यति तदपि द्वारीकृत्य क्रत्वनुष्ठानं फलं वा यावन्न गच्छति। नान्यत एव सिद्धत्वात् ज्ञानस्य फलवत्क्रत्वनुष्ठानांगत्वसाम
र्थ्यादेव नियमेन सिद्धमिति न तत्र स्वाध्यायविधेर्नियमेन व्यापारः। अध्ययनादिना ज्ञानपर्यन्तं न नियमेन प्राप्तमिति भवति १३
तत्र विधेरर्थवत्ता तेन ज्ञानमप्युक्तमध्ययनेन क्रतुप्रयुक्तमिति तेनाध्ययनेन यथा दृष्टसामर्थ्येनार्थज्ञानं कुर्यादित्युक्तेः अथ

मर्थः संपद्यते अधीतेन स्वाध्यायेनार्थं जानीयादिति अत एवार्थज्ञानं प्रत्युपादेयतया स्वाध्यायस्य संस्कार्यो विवक्षा शास्त्रांत
राधिकरणे दर्शिता। तद्यथा साम्नः स्तुतौ विनियुक्तस्यापि स्वाभाविकात्तत्संस्कारकत्वान्न हीयते तद्द्वारेणैव स्तुतिसाधन
त्वात् न हि तत्र ऋग्वा वाक्यान्तरेण स्तुतौ विनियोगोऽस्ति अथ च तत्संस्कारकत्वमेव साम्नो भवति तथा स्थूलनिष्पन्नाव विनियु
क्तेऽपि चरौ चरुमुपदधातीत्यनेनैव चरूपधाने स्थालीगतया विनियुक्तेऽन्यस्य स्वयं स्थाली निर्वर्तकत्वाभावादुपहितेन च रुणा
तद्विधिर्निदर्शेना तद्द्वारेणोपधानस्यापि दृष्टार्थत्वे संभवत्याराद्युपकारकत्वकल्पनायोगाच्चरोः स्थाल्यङ्गत्वमुपनिधानस्य तत्सं
स्कारत्वं भवति अत एवं जातीयकं स्वभावतः संस्कारत्वरूपमपि पूर्वं विनियुक्तसंस्कार्योद्देशेनाविधानात् कदाचिदर्थकर्माभिधा
नमपि लभेत। अनेनैवाभिप्रायेणोक्तं अर्थकर्मणोऽपि चोपधानं प्रतिप्राधान्यमस्त्येवेति। ननु परमार्थतोऽर्थकर्मसामवदेव सं
स्कारकर्म संस्कार्यत्वेनैव विनियुक्तं कार्यस्याङ्गमिति। एतेन चोक्ता तावद्विनियोगादङ्गत्वमसिद्धानाउपेक्षणीयाः तत्सि
द्धं नाध्ययनविधेर्वैयर्थ्यमिति। न च सत्यपि वैयर्थ्ये नानाप्रयोजनकल्पनमयुक्तम् एकं वा वोदनैकत्वादिति न्यायात्। स्यादेतत् यदि
कल्पनीयं स्यात्। लक्ष्यमेव तु नत्वयुक्तं वृद्धप्रयोजनसाधनत्वमध्ययनस्य स्वभावतः तत्र स्वाध्यायेन स्वाध्यायद्वारेण यद
पेक्षितं शक्नोति भावयितुं तत्संपादयेदिति प्रकृतप्रयत्नेनैव सर्वार्थं लब्धा भात्र किंचिद्दोषः एवं वावेतृप्यं वा अप्रतराव विधायका

नामपि समिदादिवाक्यानां स्मारकत्वमभ्युपगम्यते यत्र मंत्रः स्मारको न विद्यते शक्यते हि विधायकेनापि संबंधिदर्शनून नि मि
१५ त्तं स्मरणं संपादयितुं अस्मिंश्चांशे स्वाध्यायविधिविहितस्य वाक्यक्रमस्योपगत्वे एवं क्रमके स्ववाक्यैः पदार्थाः स्म ते व्याद्
त्ति न हि विधौ तेषां क्रमेण कार्यमस्ति स्मरणं तु कुर्वतां तेषां क्रमक्रमस्मरणे क्रममाधाय स्मार्यपदार्थानुष्ठाने क्रमं न्यस्तं लती
ति भवत्यंगं। तदेतत्सूत्रकारेण पंचमे स्पष्टमाश्रितं। क्रत्वेकत्वे परार्थत्वात् तथा व्याख्यानं भाष्यकृतस्तयं। क्रत्वेकत्वे पदार्थत्वादि।
त्येतत्सूत्रं व्याचक्षाणो भाष्यकारो वक्ष्यति परार्थो हि वेदः यदनेन शक्यते कर्तुं तस्मात् एष समाम्नायते शक्यते च तेन पदा
र्थो विधातुं शक्यते च क्रियाकाले प्रतिपत्तुं तस्मात् वेदः पदार्थो ज्ञातुमुपादेयः क्रियाकाले प्रतिपत्तुं न च गम्यते वि
शेषो विधातुमयमाम्नायस्तेन प्रतिपत्तुमिति अनवगम्यमाने विशेषे उभयार्थमुपादेय इति गम्यते तत्र प्रतिपत्तुं चानेन क्र
मेण शक्यते नान्येनेति यत्र तु मंत्रो विद्यते न तत्र तस्यानन्यार्थत्वाद्विधायकस्य तु विधानेनापि कृतार्थत्वान्मंत्रस्यैव स्मा
रकत्वमत एव तत्र मंत्रक्रमेणैव पदार्थानुष्ठानं न विधिक्रमेण तत्र ब्राह्मणक्रमो जपयज्ञादावुपयुज्यते तथा क्रत्वंतरप्र १४
तिपादकानामित्यलमतिविस्तरेण अनन्तिकं दृष्टार्थत्वेऽध्ययनविधेर्नियमार्थत्वादानर्थक्याभावादर्थज्ञानार्थमध्ययनं
न चायं नियमः यज्ञत्वर्थश्चेव नियमविधिरिति पुरुषार्थश्चापि द्रव्यार्जनादिषु नियमविध्यभ्युपगमात्तेन तद्धि नियमविधि

पार्थसारथिमिश्रकृतः स्वतःप्रामाण्यनिर्णयः

र्थवैनैव फलं तत एव पूर्वोक्तयानीत्या नियमं न्यायविदो वदन्ति तस्माज्जपयज्ञपारायणाक्रतुज्ञानसिद्धिप्रयोजनमध्ययनं अत ए
व निष्पन्नतत्फलस्य कर्म्मणोऽधिकारस्यावश्यकत्वादसति तस्मिन्नित्यनैमित्तिकाननुष्ठाने प्रत्यवायात् । सर्वस्यापि वेदस्याध्ययन
मावश्यकं पारायणाक्रतुप्रयोगित्वादावश्यकमेव तथा चानधीतवेदस्यानधिकारान् शूद्रवद्भावं स्मरन्ति । योऽनधीत्य द्विजो वेदान
न्यत्र कुरुते श्रमं । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः । स शूद्रेणासमस्तावद्यावद्वेदान्न जायते इत्यादिभिः तस्मादर्थज्ञा
नार्थत्वादध्ययनस्य अर्थज्ञानस्य च विचारमन्तरेणासंभवात्तदनन्तरं धर्मजिज्ञासा कर्त्तव्येति सिद्धं ॥ ॥ आचार्यमतमाश्रित्य ।
श्रीमद्यज्ञात्मसूनुना । पार्थसारथिमिश्रेणाप्रयुक्तितिलकः कृतः ॥ ॥ विज्ञानस्य प्रमाणत्वं स्वतो निर्णीयते यथा । परतश्चाप्र
माणत्वं तथा न्यायोऽभिधीयते । स्वतस्सर्वप्रमाणानामित्यारभ्य तः प्रामाण्यं परतश्चाप्रामाण्यमाचार्यैर्निबद्धं तत्र व्याख्यातारो
विवदन्ते स्वशब्दः किमात्मीयवचनः उतात्मवचनः तथा प्रामाण्यं किं स्वतो भवति किं वा भाति तथा प्रामाण्यं नामार्थतथात्वं उत
तथात्वनिश्चायकत्वमिति । आत्मवाची स्वशब्दोऽयं स्वतो भाति प्रमाणता । अर्थस्य च तथाभावः प्रामाण्यमभिधीयते । तत्र केचि
न्नवदाहुः । प्रमाण्यं नामार्थाव्यभिचारित्वं तथाभूतार्थविषयत्वमिति यावत् तच्च ज्ञानानां स्वत एव जायते स्वशब्दोऽयमात्मीयवच
नः स्वीयादेव कारणात्तथाभूतार्थविषयत्वं ज्ञानस्य जायते न गुणात् ऽप्रामाण्यं त्वयथार्थविषयत्वलक्षणं न स्वीयादेव

कारणाज्जायते।अपितर्हितत्कृताद्दोषादितिपरतइत्युच्यतेयदिहिसत्यार्थविषयत्ताद्युगुणनिमित्तास्यात्तत्कारणदोषैस्त्व
१५ सत्यविषयत्वेवतथासतिदोषैस्त्वसत्यविषयत्वेवतथासतिदोषप्रयुक्ताद्गुणहीनादिंद्रियादेःपीतशंखादिज्ञानेषुनकिंचित्सत्यं
गम्येतगम्यतेतुतत्रापिशंखस्वरूपादिकंसत्यंदोषाधीनत्वमत्यार्थत्वेस्वकारणाधीनोसत्यविषयत्वेसत्युभाभ्यांजा
15 यमानंसत्यासत्यविषयंभवतीत्युपपन्नम्।तस्मात्स्वीयात्कारणाद्यथार्थत्वलक्षणंप्रामाण्यंजायतेनतुभाति।नहिज्ञान
मात्मानमात्मीयंवाप्रामाण्यमवगमयति।अर्थप्रकाशनशक्तेरपक्षीणत्वात्।परतस्तत्कारणदोषाद्यथार्थत्वल
क्षणमप्रामाण्यमितिदोषाभावाद्धेतस्ययथार्थत्वमिति।अस्मिंस्तुपक्षेज्ञातेऽपियदिविज्ञानइत्यादिनानवस्थाप्र
संगेनपरतःप्रामाण्यदूषणंनघटतेगुणज्ञानाधीनेहिप्रामाण्येस्यादनवस्थागुणास्वरूपापन्नत्वेनत्वनवगताएव
गुणाइंद्रियवज्ज्ञानप्रामाण्यंजनयंतीतिनानवस्थापत्तिः॥तथादोषाभावोगुणोऽप्यक्षेत्रनुसेवास्थितिर्भवेदितिचो
दयित्वातदानव्याप्रियंतेतुज्ञायमानतयागुणाइतिपरिहरन्परपक्षेगुणज्ञानादेवप्रामाण्यंनगुणस्वरूपादितिदर्शि
तंतथातस्माद्बोधात्मकत्वेनप्रमाणबुद्धेःप्रमाणताअर्थान्यथात्वहेतूत्थदोषज्ञानादपोह्यतइतिवदन्सिद्धांतेदो १५
षज्ञानादेवाप्रामाण्यंनदोषस्वरूपादितिव्यक्तमेवाहतथाअपरेकारणोत्पन्नगुणदोषावधारणादित्यादयोबहवः

श्लोका। अस्मिन्वपक्षेन संगच्छते अतो न वार्तिककाराभिमतोयंपक्षः। अन्येत्वाहुः अनधिगततथाभूतार्थनिश्चायकत्वं प्रामाण्यं
तच्च स्वत एव ज्ञानानां जायते स्वरूपनिश्चायमात्मवचनः ज्ञानस्वरूपादेव तथाभूतार्थनिश्चयो जायते न तु गुणाज्ज्ञानात्संवादज्ञा
प्र नादर्थक्रियाज्ञानाद्वा अनवस्थाप्रसंगात् अन्यथात्वनिश्चयरूपं परतो दोषज्ञानादर्थान्यथात्वज्ञानाद्वेति परतस्त्वमुच्यत इति। अस्मि
न्पक्षे स्वतः प्रामाण्यं जायते न तु ज्ञायत इति॥ अत्रेदं वक्तव्यं यदि प्रामाण्यजन्मनिश्चयमेव ज्ञानं कारणं तथा तस्याप्रामाण्य
स्यापि जन्मन्येव दोषज्ञानबाधकयोः कारणत्वं वक्तव्यं तत्र कस्याप्रामाण्यं कारणादोषज्ञानाद्बाधकाद्वा जायत इति नहि
शुक्तिकारजतज्ञानस्य बाधकादिजन्यमप्रामाण्यं उत्पन्नावेव तस्याप्रामाण्यत्वात् अतथाभूतार्थनिश्चयो ह्यप्रमाणं तच्चो
प्रमाज्ञानात्वत एव भवतीति न बाधकज्ञानादिकमपेक्षते तेन तत्फलत्वं नो प्रमाणांसत्यश्चाद्बाधके नाप्रमाणी क्रियते अपि तूत्पन्ना
वेवभूतमप्रामाण्यं बाधकेन ख्याप्यते। न त्वर्थस्यान्यथाभावनिश्चयो बाधकेनैव जन्यते। सत्यं न तु तदप्रामाण्यं न ह्यर्थ
स्यान्यथाभावनिश्चयः पूर्वज्ञानस्याप्रामाण्यं किंतु वस्तुनोन्यथाभावः अन्यथाभूते वा तथाभावनिश्चयात्मकत्वं न च तदु
भयमपि बाधकजन्यं स्वत एवार्थस्यान्यथाभावात्। स्वत एवाप्रमाणाज्ज्ञानादन्यथाभूतेर्थे तथात्वनिश्चयात्। तथा च प्रा
माण्यमपि स्वत एवावधेयेत। तस्माद्द्विधात्मकत्वेन प्राप्तावुक्तं प्रमाणता अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यत इति

श्लोकोपि भवत्येवं व्याख्येयः बुद्धेः स्वतो जातं प्रामाण्यं पश्चाद्योधत इति तद्वायुक्तं। उत्पत्तावेवाप्रमाणत्वात्। अथ निश्चाय
१६ कत्वं प्रामाण्यं तदभावोऽप्रामाण्यं स च बाधकेन क्रियत इति मतं तदप्युक्तं। न हि बाधकेन निश्चयस्य विनाशः क्रियते तस्य स्वय
16 मेव नश्वरत्वात्। तस्मादेवं वक्तव्यं। बुद्धेः स्वीयं प्रमाणत्वं स्वत एवावगम्यते। परतश्चाप्रमाणत्वं दोषबाधकबोधकबोधतः।
न चात्रापि ग्रन्थविरोधो न्यायविरोधश्च स्यात्। न हि विज्ञानमात्मानं गृह्णाति न सुतरामात्मीयं प्रामाण्यं अर्थग्रहणोपक्षीणत्वा
त्। तथा च ननु प्रमाणमित्येवं प्रत्ययादि न गृह्यते न षेचमगृहीतेन व्यवहारो व कल्प्यत इति प्रामाण्याग्रहणादोषं चोदयि॰
त्वा प्रमाणं ग्रहणात्पूर्वं स्वरूपेणोव संस्थितं। निरपेक्षं स्वकार्येषु गृह्यते यत्प्रयत्नैरिति प्रामाण्याग्रहणमंगीकृत्येव दोष
प्रसंगं समाधत्ते न हि स्वरूपे प्रामाण्यं स्यात्मनाग्रहणे। तथा निश्चयात्मकवस्तुत्वात्प्रामाण्यं जन्यते गुणैरिति निश्चयात्म
कप्रामाण्योत्पादनं तु वस्तुस्वरूपत्वात्संवादकारणगुणज्ञानकार्यत्वेन स्वध्यवसानमिति पूर्वपक्षे प्रामाण्यजन्मत्वेव
गुणानां कारणत्वमिति वदन् सिद्धान्तेपि जन्मैव स्वत इति दर्शयति तस्मात्स्वतोभानीत्यनुपपन्नं। अत्राभिधीयते। यत्ताव १६
दुक्तं न ज्ञानमात्मानं गृह्णाति विषयप्रकाशात्मकत्वात् न चात्मन्यगृह्यमाणे तत्संबंधितया प्रामाण्यं शक्यते ग्रहीतुमिति
यदि च वयं ज्ञानमहं प्रमाणमस्मीत्येवं मह्यं वा प्रामाण्यमित्येवं गृह्णातीति वदेम तदैवमुपालभ्येमहि। न त्वेवमस्माभि

इष्यते कथं तर्हि यदुक्तं ततो ज्ञानस्य प्रामाण्यं यदृशाज्ज्ञानं प्रमाणं भवति तत्प्रमाणाबुद्धिशब्दयोर्भावकतया लक्ष्यप्रमाणपदाभिधा
नीयकमात्मनैव ज्ञानेन गृह्यत इत्युच्यते। किंतु नन्वस्तु अर्थतथात्वं इदमेव हि ज्ञानस्य प्रामाण्यं यदर्थस्य तथाभूतत्वं तथाभू
तविषयस्यैव प्रामाण्यात्। अन्यथाभूतविषयस्य ज्ञानस्याप्रामाण्यात्। इदमेव चाप्रामाण्यं यदर्थस्यान्यथात्वं तेन स्वतस्त्वे ९
ज्ञानादर्थतथात्वरूपमात्मीयं प्रामाण्यं निश्चीयते ननु गुणज्ञानात्संवादज्ञानादर्थक्रियाज्ञानाद्वा अप्रामाण्यं त्वात्मीयमर्थान्य
थात्वरूपं स्वतो नावगम्यते कारणदोषज्ञानात्बाधाद्वा नैतदेवमिति ज्ञानादवगन्तव्यमित्येतदत्र प्रतिपाद्यते आह च मिथ्ये
त्यपूर्वविज्ञानमिति नात्रापि तेन हि प्रमाणावद्धितेनार्थस्तथैवेत्यवधारितः। अन्यथात्वं कुतस्तस्य सिद्ध्येत् ज्ञानान्तरादृते इति। त
था अप्रमाणामपि स्वार्थप्रमाणामिव हि स्वतः। मिथ्यात्वं तस्य गृह्येत न प्रमाणान्तरादृते इति। न ह्यर्थस्यातथाभावः पूर्वेणोक्तस्तथा
त्ववत्। तथात्वे स्फपलब्धत्वान्निष्फलास्यात्पुनः प्रमा। अन्यथात्वे त्वसिद्धत्वात्तावकाशं प्रमो मान्तरमिति। तथा विचारोपक्रमे प्र
माणत्वाप्रमाणत्वे ज्ञानस्य स्वत एव किं। अथ चेत्कमपि स्पष्टं स्वभावेनानिरूपितं। पराश्रयादसंदिग्धमेकं पक्षं प्रपद्यत इति वद
न्प्रमाणत्वाप्रमाणत्वनिरूपणमेवेह स्वतः परतो वेति चिंत्यत इति स्पष्टमेवाह यत्तु। ननु प्रमाणमित्येवं प्रत्यक्षादिनगृह्यते। प्रमा
णाग्रहणात्पूर्वं स्वरूपेणैव संस्थितं निमित्तवर्तकं तत्प्रमाणमस्मात्पुनेना कारेणाग्रहणात्तथा च प्रमाणमित्येवं प्रत्यक्षादिनग.

स्वतइत्याह।ननुयदिप्रामाण्यंज्ञानोत्पत्तिसमयेवगम्यतेततोयदुत्पन्नोप्रमाणतयानचकास्तितद्प्रमाणमेवेत्युत्पन्नावेवयारि
१८ शेष्यात्रिश्चैतुशक्यंविनापिकारणादोषवोधकप्रत्ययाभ्या॥मित्यप्रा[illegible]मारगंपमपिस्वतएवायघ्यतामेवंचोच्चः।नहिस्वशब्दो
यंप्रामाण्यपरतयाप्रयुक्तःप्रामाण्यपाद्वप्रामाण्यंभातीति।नापिप्रमाणापरतयायदिहितथास्यात्तन्नोप्रमाणेषुप्रामाण्या
17 नवभासात्परिशेषसिद्धमप्रामाण्यंस्यात्।विज्ञानपरस्त्वस्वशब्दःविज्ञानादेवप्रामाण्यंभातीतिंततश्चाप्रमाणाज्ञानादपि
माएप प्रामोत्मनोसदपिवोध्यतइतिनाप्रामाण्यपरिशेषसिद्धिः।अप्रामाण्यंतुप्रतीतप्रामाण्यापवादरूपेणापश्चैद्वोध्यते।यथाह।न
स्मात्स्वतःप्रमाणत्वंसर्वत्रौत्सर्गिकंस्थितंवाधकारणदुष्टत्वज्ञानाभ्यांतदपोह्यतइति।स्थितंप्राप्तंप्रतिपन्नमितियावत्।स
र्वत्रेतिनकेवलंप्रमाणेषुज्ञानमात्रइत्यर्थः।तथाअप्रमाणामपिस्वार्थेप्रमाणामिवहिस्वतइति।नचप्रमाणाज्ञानान्यधिकृत्ये
यंचिन्ता।प्रमाणानांप्रामाण्यंस्वतःपरतोवेति।किंतर्हियानितावत्स्याद्वापूर्वोपुरुषोवेतिपरस्परोपमर्दकानेककोटिकज्ञा
नानितेभ्यःस्मृतिज्ञानेभ्यश्चातिरिक्तानिघटोयंपटोयमित्येवंरूपाणिज्ञानानिनान्यधिकृत्येयंविंत्वासर्वविज्ञानविषयमि १८
दंतावत्परीक्ष्यतामित्युपक्रमात्।यदिप्रमाणान्यावाधिकृत्येयंचिन्तास्यात्तदाविषयस्योभयवादिसिद्धत्वाघान्युभयोःप्र
माणतयाप्रसिद्धानितेषांप्रामाण्यंस्वतइत्येनावक्तिर्द्धैततश्चवेदस्योभयवादिसिद्धप्रामाण्याभावेनविचारविषयत्वात्

स्यान्

स्वतः प्रामाण्यं साधितं स्यात्। तत्रैव प्रामाण्यानुपयोगिनी चिन्ता का कर्त्तव्या यदि तावदकर्त्तव्या स्यात् ज्ञानमात्रं चाधिकृत्य स्वतः
प्रामाण्ये परतश्चाप्रामाण्ये साधिते वेदस्यापि स्वतस्तावद्विषयतथात्वरूपं प्रामाण्यमवगतं सत्कारणदोषज्ञानादेरभावात्त्रि
रूपवादं स्थितं भवतीति प्रयोजनवती चिन्ता। ननु अर्थतथात्वमात्रं प्रामाण्यं स्वतेरपि तथात्वप्रसंगात् सत्यं न तावन्मात्रं प्रा
माण्यम् अस्मिन् प्रकरणे तावन्मात्रमेव स्वतः परतो वेति चिन्त्यते। प्रमाणशब्दो ह्यधिगततयाननुसंधीयमानतथाभूतार्थ
निश्चायकवाची तस्य भावः प्रामाण्यं। कश्चासौ तस्य भावः। प्रमाणाप्राधिगततयाननुसंधीयमानत्वं तथाभावश्चार्थस्य ज्ञान
स्य च तत्र निश्चयजनकत्वेति त्रितयं मिलितं प्रमाणाख्यशब्दयो भावकं प्रामाण्यं। तत्र यदेतदर्थस्याधिगततया अननुसं
धीयमानत्वं तद्योग्यानुपलब्धिगम्यं न ज्ञानस्वरूपाद्गम्यते न हि घटज्ञानं घटस्यान्यतो नवगततामवगमयति। नापि गुणज्ञाना
दिति स्वतोवगतिः। तेन न तत्र स्वतः परतो वेति चिन्ता। यदेव तु तथात्वं तथाभूतमित्यनेनार्थयाथार्थ्यलक्षणमप्रामाण्यमाशंकितं
तत्परिहारायार्थतथात्वलक्षणमेव प्रामाण्यं स्वतः इति साध्यते। यत्तु निश्चयात्मकं प्रामाण्यं स्यादनुमितिगम्यमस्मा थविरूढः।
तथा हि पदार्थतथात्वनिश्चायकं तदेव तु तद्विषयस्य निश्चयस्योत्पादकं स्वहेतुज्ञानापेक्षं भवति यदेव हि तेयापेक्षया ज्ञापकं तदे
व हि ज्ञानापेक्षया जनकं भवति निश्चयोपि च प्रमाणशब्दप्रवृत्तिनिमित्तत्वात् प्रामाण्यमेव। तेनार्थतथात्वरूपं प्रामाण्यं गुणज्ञा

नात्रिश्चीयत इति प्रतिपाद्यते: पूर्वपक्षिणो नासंगतो निश्चयात्मकप्रमाणोत्पादनं तु वस्तुरूपत्वात्संवादगुणज्ञानकार्यत्वेनस्व
१८ ध्यवसानमित्यर्पयं ग्रंथः यदि तु पुनरिदमेवसात्तादुच्यते निश्चयात्मकं प्रामाण्यं स्वतो जायत इति तथा सत्यप्रामाण्यमपि परतो जा
यत इति वक्तव्यं अन्यथा त्वस्याप्रतिपन्नत्वमेव स्यात्। प्रामाण्यं स्वतो जायते अप्रामाण्यं परतो गम्यत इति। तस्मात्स्वतः परतश्च
18 प्रामाण्यमप्रामाण्यं चावगम्यत इत्येवंप्रकरणार्थः। एवं हि न्यायो ग्रंथः समंजसो भवति। तदयमत्र पूर्वोत्तरपक्षसंक्षेपः घटाद
घटाच्च घटज्ञानदर्शनात्तन्मात्रेण घटो निश्चेतुं न शक्यते इति नार्थक्रियाविज्ञानादेव तद्धेतुभूतघटनिश्चयपुरस्सरं पूर्वज्ञा
नस्य घटज्ञानस्य घटाद्युत्पत्तिर्निश्चेतव्या। अर्थक्रियाविज्ञानं त्वव्यभिचारात्स्वतः प्रमाणमर्थक्रियां निश्चाययद्घट इति पूर्वज्ञा
नस्य प्रामाण्यं निश्चाययितुं। तथाज्ञानान्तरसंवादोपि नार्थतथात्वाभावे घटत इति ततोर्थयथात्वनिश्चयः तथा गुणोव
त्कारणाजनितं ज्ञानं यथार्थमेव भवतीति कारणगुणावधारणादपि शक्यतेर्थस्य तथाभावो निश्चेतुं। तस्मात्परत एव ज्ञान
स्य प्रामाण्यनिश्चयः। न स्वतस्तस्यार्थतथात्वलक्षणं प्रामाण्यं निश्चेतुं शक्यते अनैकांतिकत्वात्। अनिश्चिते चार्थे नास्ति १८
प्रामाण्यमित्यप्रामाण्यमेव स्वतो ज्ञानस्य किंच निश्चयैकवस्तुत्वाद्गुणज्ञानादिना शक्यते जनयितुं। तस्मात्परत एवार्थत
थात्वरूपप्रामाण्यनिश्चय इति पूर्वः पक्षः। सिद्धांतस्तु न ज्ञानमव्यभिचारनिरूपणामुखेनार्थप्रत्यायये किंतु स्वभावत एव।

२ प्रागभावेनादौ पक्षानेन शक्यते जनयितुं निश्चय २ ति

यदि हि स्वतो न निश्चेतुं शक्नुयात्तन्न यास्तीति निश्चयसात्त्वं तासंभव एव स्यादित्यान्ध्यमेवाशेषस्य जगतो भवेत्। न हि स्वतो निश्चि
तोर्थः परतो निश्चेतुं शक्यते परस्यापि तद्वदेवासामर्थ्यात्। यथा हि घटज्ञानमसत्यपि घटे दृष्टमित्यनिश्चायकं तथार्थक्रिया
ज्ञानमपि स्वप्नावस्थायामसत्यामेवार्थक्रियायां दृष्टमिति न तेनापि सा निश्चेतुं शक्यते न तरां तया घटनिश्चयः। अथार्थक्रि
याशब्देन नोदकाहरणादिकमुच्यते। किंतु ज्ञानमेव सुखात्मकं सर्वं च सुखज्ञानं स्वात्मनि स्वत एव प्रमाणमव्यभिचारादित्यु
च्यते। तथा सति भवतु नामार्थक्रियानिश्चयः तथापि तु न तया पूर्वज्ञानस्य याथासति भवतु नामार्थक्रियानिश्चयो। र्थ्यं श
क्याध्यवसानं। अयथार्थादपि स्वप्ने चंदनलेपादिज्ञानात्सुखोत्पत्तेः। अपि च गृहीताविनाभावयार्थक्रियया पूर्वज्ञानविषयनि
श्चयः। अनुमानं स्यात्तत्कार्यं तु कारणगोचरं। न चागृहीते संबंधिनि संबंधग्रहणसंभवः तेन संबंधग्रहणसमये एव स्वरूपं घटज्ञा
नादेव घटनिश्चयोंगीकर्तव्यः एवं गुणज्ञानाद्गुणो निश्चेतुं शक्यते किं स्विन्नः पूर्वज्ञानं प्रमाणं तथा संवादो नाम तद्विषयं ज्ञाना संवादोपि४
तरं तस्य पूर्वज्ञानात्को विशेषः येन तेनानिश्चितमनेन निश्चीयते। यद्यपि वस्तुत्वाज्जन्यो निश्चयस्तथापि ज्ञानेनैव जन्यते
नान्येन। तस्मात्स्वत एव प्रामाण्यं परतस्त्वप्रामाण्यं दोषज्ञानाद्बाधकज्ञानाद्वा निश्चेतव्यं। नन्ववस्तुत्वाद्दोषजन्यमप्रामाण्यं
पं न भवति अनंतज्ज्ञानं च न ततो निश्चेतुं शक्यं। उच्यते न निश्चयप्रागभावरूपमप्रामाण्यं दोषैरवगम्यते इति ब्रूमः किं त्वर्थान्य
ज्ञानसंवादज्ञानयोरपि वाच्यं।। न हि गुणा। ४

याच्च रूपं तद्विशेषकं दोषज्ञानेन निश्चेतुं दोषनिमित्तत्वादन्यथात्वस्य दुष्टेषु कारणेष्वयथार्थत्वदर्शनात्। वेदेपि स्वतस्त्वाप्रा
१९ माण्यं दोषाभावाद्वा नयोदितमेव स्थितं। कथं पुनरवगम्यते दोषनिमित्तकमयथार्थत्वं न गुणाभावनिमित्तकमिति सर्वमे
१९ वहि गुणाविधुरेषु दुष्टेषु च कारणेष्वयथार्थज्ञानं जायते न त्वकुतोयं विवेकः दोषनिमित्तं न गुणावैधुर्यनिमित्तमिति तस्मा
द्यद्यपि परत एवाप्रामाण्योपलक्षणं तथापि गुणाभावादेवोपलक्षणासंभवाद्वेदे चाप्रमाणत्वगुणाभावान्त्वरस
प्राप्तमप्रामाण्यमपि वेदस्य परत एव गुणाभावे प्रामाण्यमापद्यत इति। तत्राभिधीयते। दृष्टानुसारेण हि कल्पना भवति
न दृष्टवैपरीत्येन तेन वेदस्य स्वतः प्राप्तमप्रामाण्यं यथा न विरुध्यते तथा कल्पयितुं शक्यते न चेत् ततो न तद्विरोधे तत्युक्ता
कल्पना तेन यद्यपि प्रसिद्धेष्वयथार्थेषु ज्ञानेषु गुणाभावो दोषश्चेति द्वयं दृष्टं तथापि वेदे गुणाभावेपि प्रावेपि प्रामाण्यदर्श
नात् न्माबाधीति दोषनिमित्तमेवायथार्थत्वं शुक्तिकारजतज्ञानानां कल्प्यते। अन्यथाज्ञानत्वनिबंधनमथ यथार्थत्वंक
ल्प्यते सर्वेष्वप्रमाणेषु ज्ञानत्वदर्शनात्॥ तद्रूपथैव यथार्थेष्वपि प्रत्यक्षादिषु ज्ञानत्वदर्शनान्न तन्निमित्तमयथार्थत्वमेवं गुणा
भावोपि यथार्थवेदे दृष्टत्वान्नायथार्थत्वस्य निबंधनं। असिद्धं तस्य यथार्थत्वमिति चेन्न॥ प्रत्यक्षादीनां वा कुतः सिद्धं॥ स्व १९
त इति चेन्न हि वेदेपि समानमन्यत्र नास्तिक्याभिनिवेशात्॥ तस्मान्न निबंधनमप्रामाण्ये॥ अपि च शुक्तिकारजतादिज्ञाने

गुणाभावेपिशुक्लभास्वरत्वादिरूपाणींतथाभूतानामेवदर्शनान्नगुणायत्तंयथार्थत्वं॥यदितुस्वकारणादेवयथार्थत्वंदोषा
च्चायथार्थत्वमितितन्नथासतिशुक्तिकारजतादिज्ञानानिस्वकारणावशाद्दोषाच्चतथाभूतंशुक्त्यादिअतथाभूतंचरजत
त्वादिकंगोचरयंतीत्युपपन्नं।तस्मात्स्वतःसिद्धंप्रामाण्यंसर्वज्ञानानांतच्चवेदस्यानपोदितमितिसिद्धं॥ ॥पार्थसारथिमिश्रे
णायः।व्याख्याविवादसंजातमोहव्यावर्त्तनायेकृतः॥ ॥विधितत्वेविमन्यंतेवहुधावादिनोयतः।अतोवार्त्तिककाराद्यैःक्रियते
तन्निर्णयः।कःपुनरयंविधिः॥केचिदाहुः।प्रमाणांतरागोचरोलिङादिशब्दमात्रालंवनःकार्योनामयागादिभावार्थगोच
रःस्वर्गकामादिनियोज्यमात्मनिप्रेरयन्नियोगोविधिरिति।कथंपुनरेवंविधेविधौलिङादीनांव्युत्पत्तिः॥अत्राहुः॥लोके
तावल्लिङादिशब्दश्रवणानंतरंप्रयोज्यवृद्धंप्रवर्त्तमानमुपलभमानोव्युत्पित्सुःपार्श्वस्थोनूनमस्यकार्यावगतिःसंजाता
कथमन्यथास्वतंत्रःप्रवर्त्ततेईदृशीहिमेप्रवृत्तिःपूर्विकैवसर्वदादृष्टा।अस्यापिमद्विशेषात्तत्पूर्विकयैवानयाप्रवृत्त्या
भवितव्यं।साचकार्यावगतिर्लिङादिशब्दानंतर्यात्तत्कारणिकेवेतिलिङादिशब्दानांकार्याभिधायित्वंनिश्चिनोतितत
श्चयद्यपिप्रवृत्त्यवगत्योरेकगोचरत्वात्प्रवृत्तेश्चक्रियागोचरत्वात्कार्यावगतिरपितद्गोचरैवलिङादिभिर्जनितेतिक्रियैवका
र्यात्मनालिङादिशब्दानामर्थःनतुतदतिरिक्तमपूर्वमितिबुद्धिर्भवति।तथापिवेदेषष्ठाद्यसिद्धांतनीत्याकार्यंप्रतिनियो

ज्यत्वेनस्वर्गकामादीनामन्वयइतिस्थितं।नियोज्यश्चसउच्यतेयःकार्यंममेदंकमितिबुध्यते॥नचाकामस्यधनंकामोकार्यंतया र्य
२० वोढुमलं।विनश्वरीचक्रिया।तेननेयंकालान्तरीयफलदानेनकामिनंरमयतीतिनानयाफलोपभोगार्थिनःकामिनोयुक्तः
२० संसर्गः।तेनतस्यप्रयोगंप्रसह्यस्वकार्यंक्रियातिरिक्तंलिङादिशब्दाभिधेयंनिश्चीयते।तच्चप्रमाणान्तरापूर्वंतयापूर्वमितिच
स्वात्मनिपुरुषंनियुञ्जानंनियो[illegible]इतिचाख्यायते॥तच्चप्रमाणान्तरापूर्वंतयापूर्वमितिचस्वात्मनिपुरुषंनियुञ्जानंनियो
गइतिचाख्यायते।तस्मिंश्चक्रियातिरिक्तेकार्येवाच्येपोलोकेलिङादीनांक्रियायांप्रयोगःसलाक्षणिकोभवति।अनेका
र्यत्वस्यान्याय्यत्वात्।एवंचनैमित्तिकनिषेधाधिकारयोरसत्यपिफलवत्त्वेपूर्वमेववाक्यार्थोभविष्यतितस्यैवाभिधेयत्वा
दिति।तदिदंबालसंमोहनंमहेन्द्रजालेविभ्रमंसम्यक्कृत्यायोषधसंस्कृतस्वान्तानांनसंमोहायकल्प्यते।तथाहिनकार्यावगतिक्रा
पिप्रवृत्तेःकारणंमताकर्त्तुरिष्टाभ्युपायत्वबोधात्तासंवेदयतः॥१॥यत्तावत्कार्यावगतिःप्रवृत्तिकारणमितितत्रकिंत
त्कार्यंकिंचतत्रप्रमाणमितिवक्तव्यं।कृतिसाध्यंप्रधानंचकार्यमित्युच्यते।तत्रकृतिसाध्यत्वंतावत्कृतौसत्यांभावादसत्ये
भा वाभावादन्वयव्यतिरेकाभ्यामवगम्यते।प्राधान्यंतुतदुद्देशेनकृतेःप्रवृत्तिमानसप्रत्यक्षेणावगम्यते।कृतिर्हिपुरुषप्रयत्नःस २०
चमानसप्रत्यक्षवेद्योयदुद्देशेनप्रवर्त्ततेतद्विशिष्टएवप्रत्यक्षेणावगम्यते।सर्वोहीदमुद्दिश्याहंप्रवर्त्तइतिप्रवृत्तिवेलाया

मेवविशिष्टोद्देश्यसंबंधिनं प्रयत्नं प्रत्यक्षेण जानातीति प्रत्यक्षानुमानप्रमाणकं कार्यमिति चेत्। किमिदानीं क्रत्वुद्देश्यत्वमात्रं का
भा र्यत्वं। यद्येवं ततो यदेव किंचिद्रागद्वेषलोभादिभिरर्थरूपमनर्थरूपं वोद्दिश्य पुरुषः प्रवर्त्तते तत्सर्वं कार्यं प्राप्तं। तत्र को दोषः। नैवं विच
कार्यावगतिः प्रवृत्तिकारणं न भवितुमर्हति। सत्यामपि तस्यां प्रवृत्त्यदर्शनात्। यो हि तत्र्यायांगुलिदानमुद्दिश्य प्रवर्त्तमानो मध्ये त द्वि मा
स्यानर्थत्वं जानाति स तावत्ततो निवर्त्तते। तत्र कार्यता तावदुद्दिश्य प्रवृत्त्यैवांगुलिदानस्य संजाता। तन्मात्रलक्षणत्वक्षणात्वात्का
र्यतायाः। सा च पश्चादनर्थत्वावगमेऽपि न बाध्यते। न खल्वज्ञात्वानर्थमुद्दिश्य न मे प्रवृत्तिः संजातेत्यध्यवस्यति किं त्वनर्थमेवोद्दिश्य
मोहात्प्रवृत्तोऽस्मीत्यवगच्छति। तस्मात्प्रत्यक्षप्रमाणकार्यं क्रत्वुद्देश्यत्वमात्ररूपा कार्यता न तदवगतिः प्रवृत्तिकारणमिति सि
द्धं। अथ क्रत्वुद्देशार्हता कार्यता। सा केन प्रमाणेन प्रतीयते। न तावत्प्रत्यक्षेण प्रवृत्त्यवस्थायामपि कर्मणः कार्यत्वसंदेहात्। भव
ति हि संदेहादपि क्वचित्प्रवृत्तिः। तत्र यः कार्यत्वसंदिहान एव क्वचिद्व्यापारे प्रवृत्तः स प्रवृत्तिवेलायामपि न कार्यतां प्राक् फललाभा
न्निश्चिनोति। वदंति हि न विप्रः कार्यमकार्यं वेति संदेहादेव प्रवृत्तो मह इति। माभूत्प्रवृत्तिवेलायां प्रत्यक्षं कार्यत्वं फलवेलायां तु
भविष्यतीति चेत्। कस्य पुनस्तदानीं कार्यत्वं प्रत्यक्षगम्यं। न तावत्क्रियायाः। नष्टत्वात्। नापि फलस्य तस्य सुखरूपत्तामात्रो
पलंभात्। न हि कार्यत्वं नाम किंचिदत्रावगम्यते। यो हि देवनिर्मितमेघकायादिजन्यं सुखमनुभवति स प्रयत्नजनितमातय

त्रच्छाया जन्यं तयोरुभयोरपि प्रत्यक्षता सुखोपलब्धिस्तत्कल्पैव। न कृतिजन्ये सुखे कार्यत्वं नाम कश्चिदतिरेकः प्रत्यक्षमीक्ष्यते। भ
२१ वतु वा सुखस्य प्रत्यक्षगम्या कार्यता। तत्साधनस्य तु व्यापारस्य न कदाचित्प्रत्यक्षेण कार्यतावगम्यते। नानुमानेन। न हि सु
खदृष्टं कार्यत्वं तत्साधनेनुमातुं शक्यं स्यादेतत्। कृत्यर्हता नाम कार्यता। सा च यदाकारं वस्तु प्रतिपद्यते तदुद्देशेन पुरुषस्य
२ प्रवृत्त्यौत्सुक्यं जायते तदाकारमागितैव। कः पुनरसावाकारः समीहितरूपत्वं तत्साधनत्वं च। तादृशो ह्यर्थे स्वरसादेव पुरुषा
णां प्रवृत्त्यौत्सुक्यं जायते। द्विविधं समीहितं सुखं दुःखाभावश्च। तत्र सुखं प्रत्यक्षगम्यं। दुःखाभावस्त्वनुपलब्धिगम्यः। तत्सा
धनता चान्वयव्यतिरेकगम्येति नाप्रामाणिकी कार्यतेति। युक्तमेतत्। किं त्वेवं सति सुखदुःखपरिहारातिरिक्तेषु तत्साधनते
ग व प्रवृत्तिकारणमंगीकृतं स्यात्। ततश्च ग्रामानयेत्यत्र गवानयनस्य सुखदुःखप्राप्तिपरिहारत्वाभावात्प्रवृत्तिहेतुभूतां कार्यता
मभिदधानो विधिशब्दः समीहितसाधनताभिधायी स्यात्। कार्यं गवानयनं कृत्यर्हं यथाविधि पुरुषाणां कृतिः। प्रवर्तेत तथावि
धमित्यर्थः। तथाविधता तावन्न स्वयं समीहिततया संभवतीति तत्साधनतैव पारिशेष्यात्कार्यवाचिना शब्देनाभिहिता भवतीत। २१
था च वेदेपि अपूर्वस्य स्वयं सुखदुःखप्राप्तिपरिहाररूपत्वाभावात्तत्साधनतैव कृत्यर्हतेति कार्यरूपमपूर्वमभिदधानो लिङ्
समीहितसाधनतामेवाभिदध्यादिति नैमित्तिकनिषेधाधिकारयोरपि साधनरूपापूर्वाभिधानात्तत्फलेनैवाश्रुतमपि फलं कल्प

नीयं स्यात्। ननु न सुखत्वं कार्यत्वं। तत्साधनेऽप्यभावात्। न साधनत्वं सुखेऽपि भावात्। तदुभयानुगतं कार्यत्वं। आलंबनं कार्यत्वं नाम प्रवृत्ति
कारणमिति। नैवं। न हि साधने कार्यत्वं नाम किंचित्प्रवृत्तिवेलायामुत्तरकालेवा प्रत्यक्षेणावगम्यत इत्युक्तं। अतो नास्त्युभयानुग
तः कार्यत्वं नाम कश्चिदर्थविशेषः। कर्त्तव्यशब्दस्त्वयमेकोपाधिवशादुभयत्र प्रवर्त्तते। इयमपि ज्ञायमानं स्वोद्देशेन पुरुषं प्रवर्त्तय
तीति। अनेनैवोपाधिना कार्यशब्दप्रवृत्तिः। तस्मान्न कार्यतावगतिः क्रियायां प्रवृत्तिकारणं। अपितु समीहितसाधनत्वज्ञा
नं। भवतु वा समीहितसाधनत्वोपपन्नमेव कार्यत्वं तत्तु क्रियाया एवाभिधातव्यं। तत्रैव प्रवृत्तिदर्शनात्। सत्यं। लोके क्रियैव कार्य
तया शब्देन प्रतिपाद्यते। वेदे तु फलकामिनियोज्यान्वयानुगुण्यात्स्थिरमेव कार्यं लिङादिभिरभिधीयते इति चेत्। नैवं। क्रियाया
मपि कामिनः कार्यावगमाविरोधात्। नासौ फलसाधनी भवितुं समर्था भंगुरत्वादिति चेत्। न। अपूर्वद्वारेणोपपत्तेः। नान्यद्वारेणा
न्यस्य साधनत्वं संभवति। अतिप्रसंगात्। अवान्तरव्यापारो वा शक्तिर्वा साधनत्वमुपपादयतीनापूर्वेतथा।। शक्तिमतिव्याप
रवति वा तीते शक्तिव्यापारयोः स्थित्यनुपपत्तेरिति चेत्। किमिदानीं काष्ठानां पाकसाधनत्वं नास्ति तत्रापि हि काष्ठेभ्यस्तेजसाः
परमाणवः समुद्भूताः स्थाल्युदरमनुप्रविशंतस्तंडुलान्विक्लेदयंति। न च तेषां द्रव्यनूपाणां काष्ठावांतरव्यापारत्वं। तच्छक्तित्व
वा समस्तीति न तद्द्वारेण काष्ठादीनां साधनभावः स्यात्। मा भूदिति चेन्न। सर्वलोकप्रसिद्धिविरोधात्। काष्ठैः पचतीति निर्विवा

दृष्टयोगात्। तस्माद्यदेवयेन समीहितफलोद्देशात्प्रवृत्तेन तदुपायभूतमंतरा साध्यते तदेव तस्यावांतरव्यापारत्वेनाभिधायते। ते
२२ न संभवत्येवापूर्वस्य कर्मावांतरव्यापारत्वं। यद्विचेवं नेष्यते तत्तोपूर्वप्रत्यपि साधनत्वे कर्मणोन स्यात्। तदपि हि न कर्मानंत
रंजायते। स्विष्टकृदाद्यनंतरं तत्रानुष्ठानप्रतीत्त्वरणात्। तत्रावश्यमुत्पत्त्यपूर्वाणामवांतरत्वेनैषितव्यानि। उत्पत्त्यपूर्वाणामेव पर
मापूर्वस्य करणानि न यागइति चेत्। नाऽप्रसिद्धत्वात् अशाब्दार्थत्वाच्च अधिकारवाक्ये फलकामिनियोज्यान्वयानुगुणापूर्वा
भिधायित्वे स्थिते पश्चादाग्नेयादिवाक्येष्वपूर्वाभिधानसिद्धिः॥ प्राकृलोकावगतक्रियाभिधायित्वमेव तेषु भवतीत्यसिद्ध
त्वात्वत्तदुत्पत्त्यपूर्वाणां न परमापूर्वसाधनत्वे नोच यसंभवः। न च यजतेरपूर्वाभिधायित्वं। येनापूर्वाणामत्यर्थं परमापूर्वप्र
ति करणत्वं स्यात्। तस्माद्यजिरेव करणं। किंच कार्यत्वमेवापूर्वस्य नोपपद्यते। कृतिसाध्यं हि कार्यमुच्यते। कृतिश्च पुरुषप्रय
त्नः। न च प्रयत्नसाध्यतापूर्वस्य संभवति। चिरविनष्टे प्रयत्ने तदुत्पादात्। प्रयत्नेन हि यागः तत्तोवांतरापूर्वं ततः पश्चादधिकार
पूर्वं। तस्मात्कार्यत्वानुपपत्तेः न कार्याभिधायिलिङ्वाच्यतापूर्वस्य संभवति। तत्रावश्यं प्रयत्नसाध्यत्वमपूर्वस्य यागावां २२
तरापूर्वद्वारमाश्रयितव्यं। तद्यागस्यापि फलसाधनत्वमपूर्वद्वारं किमिति नेष्यते। मा वा भूत् फलसाधनं क्रियापूर्वसाधनं ता
वद्भवत्येव। तावतापि कार्यतया बुध्यते भावमवगंतुमर्हत्येव पुरुषः। यस्मिन्कृते समीहितं न प्राप्यते कृते च प्राप्यते सा तत्कारण

घावान्तदेव कार्यतयावुध्यते। ननु साक्षाद्भावविशेषस्तत्रोपयोगी। अवश्यं च कामिनः क्रियायामपि कार्यावगतिरेषितव्या। कथम
न्यथा स्वतंत्रः प्रवर्त्तेत। सत्यमस्त्येव तत्रापि कार्यावगतिः ननु शाब्दी किं तत्त्वार्थी कामानुगुणापूर्वसाधनत्वात्तत्तामपि कार्यतया का
मी प्रतिपद्यत इतिचेत्तन्न। विकल्पासहत्वात्। किं फलप्रसूता कार्यावगतिः क्रियायामुतापूर्वप्रसूता। न तावदपूर्वप्रसूता। काम्येषु
विधेरनुष्ठापकत्वानभ्युपगमात्। यदि हि विधिनिबंधना कार्यावगतिः क्रियायाः स्यात्ततो विध्याक्षिप्तानुष्ठानतया करणांशस्या
पि विधेयत्वप्रसंगः। फलप्रसूतत्वमपि भवदुक्त्या नीत्या न सिध्यति। नहि फलकामः पुरुषः क्षणिकं कर्म कार्यतयावगंतुमलं।
तस्याः साक्षात्साधनत्वायोगात्। अपूर्वस्य चावांतरव्यापारत्वाभावात्तद्द्वारेणाप्यसाधनत्वात्। साधनं साध्यार्थिनः कार्याव साधने च
गमानुपपत्तेः। तस्मात्क्रियायाः कार्यावगतिर्न फलायत्ता नापि विध्यायत्ता संभवतीत्यननुष्ठानमेव तस्याः प्रसज्येत। तत्तस्माद्
विधिप्रसूतं काम्यानुष्ठानं फलायत्तमिष्यतावश्यं क्रियायाः फलसाधनतावासाधनसाधनेपि वा साध्यार्थिनः कार्यावगतिरे
षितव्या। ततश्च शब्देनापि शक्यत एव फलकामस्य कार्यतया क्रिया प्रतिपादयितुमिति नापूर्वाभिधानसिद्धिः। यच्चान्यदत्र
वक्तव्यं तत्सर्वं मंगनिर्णये वक्ष्यामः। अन्यन्मतं समीहितसाधनत्वमेव भावनाया लिङाभिधीयते। तदवगतेरेव प्रवृत्तिकारणत्वे
नात्मनिदृष्टत्वात्। न चिष्टेव प्रवृत्तिकारणं। सत्यं। सा तु त्वत्राप्रवृत्तिकारणं नावगता। शब्दस्य च प्रमाणत्वादवगतिजननद्वा

न्या०पू० २३ रेणाप्रवृत्तिकारणत्वमिति नेच्छाभिधायित्वसंभवः। इच्छा हि सुखदुःखप्राप्तिपरिहारयोरन्यतरत्तदुपायं वा विषयीकृत्य समुत्प
द्यते। तेन प्रयोज्यवृद्धस्य लिङ्शब्दश्रवणानंतरं प्रवर्त्तमानस्य प्रवृत्तिहेतुभूतेच्छासंपादकत्वेन समीहितसाधनत्वावगति
रेव क्रियायां व्युत्पित्सुना कल्प्यते। तस्याश्च शब्दानंतर्याच्छब्दस्य तदभिधायित्वं निर्णीयते। ननु मदिरास्वादस्य समीहितसा
धनत्वादनुष्ठानं स्यात्। न प्रवलेनानर्थेन निरुद्धत्वात्। यथैव हीच्छाप्रवृत्तेः कारणं तथैव द्वेषोऽपि निवृत्तेः। द्वेषश्च दुःखसुखप
रिहारतदुपायान्यधिकृत्य प्रवर्त्तते। सुरापानं च महानर्थसाधनत्वेन निषेधेन प्रतिपादितं द्वेषगोचरतया नानुष्ठातुमर्हति
। यस्तु सन्निहितेनात्मीयस्यापि सुखेनाक्रांतस्वांतो महांतमनर्थं नालोचयति न चाद्रियते स प्रबलेन रागेण प्रतिक्षिप्यमाणचि
त्तः प्रवर्त्तत एव सुरापाने। तस्मात्समीहितसाधनभात्वेन भावनाविधिना सामान्येनावोधितापदांतरसमर्पितेन स्वर्गादिना
निराकांक्षीभवतीत्यत्र स्वर्गकामाधिकरणे व्युत्पाद्यते। यत्र फलविशेषसमर्पकं पदांतरं समानवाक्ये नास्ति तत्र प्रकरणा
दिना फलं कल्प्यं भवतीति प्रकरणाधिकरणे व्युत्पाद्यते। प्रकरणादीनामप्यभावेऽर्थवादोद्देशेन फलेन समन्वय इति रात्रि २३
सत्राधिकरणे स्थितं। तस्याप्यभावेऽध्याहृतेन फलेनान्वय इति विश्वजिदधिकरणे सिद्धं। धात्वर्थस्तु समानपदोपात्तो
ऽपि वलीयस्या विधिश्रुत्या साध्यांशात्प्रच्यावितः प्रत्यासत्त्या करणांशे निविशत इति भावार्थाधिकरणार्थः। तथा चोक्तं।

तथा धात्वर्थकर्मत्वे पदश्रुत्योपदर्शिते। भावनाया विधिश्रुत्या पुरुषार्थांशसाध्यतेति। श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयत इ
ति च। तस्मादिष्टसाधनतैव विधिलिङाद्यभिधेयेति तदुक्ता या भावनायाः फलमेव भाव्यं। धात्वर्थस्तु करणमिति। आचार्यैस्तु त
भिधाभावनामाहुरन्यामेव लिङादय इति वदतो न्यादृशं विधितत्त्वं अभिमतं लक्ष्यते। किंपुनस्तदुच्यते इदं तावत्सिद्धं। यथा स
मीहितसाधनत्वावगतिमंतरेण चेतनस्य स्वतंत्रा प्रवृत्तिर्न घटत इति। तत्र च लिङ्शब्दश्रवणानंतरं प्रवर्त्तमानस्य पुरुषस्य
समीहितसाधनत्वावगतिः शाब्दात्त्रै जातेति कल्पनीयं। तत्तु समीहितसाधनत्वं किमभिधानत एवोपात्तं किं वार्थांतराभि
धायिना विधिशब्देन तदनुपपत्त्यावोधनीयमिति चिंतनीयं। तत्र नाभिधायकता युक्तासंविदित्तो धात्वा न हि यागाद्यनुरक्तो
व्यापार इष्टार्थहेतुरित्यस्माद्यजेते त्यस्माच्च शब्दादनुत्पावगतिः सहप्रयोगाच्च। लोके हि समीहितसाधनतावता वचनेन विधिश
ब्दश्च युगपत्प्रयुज्यमानो दृष्टो। माणवक संध्यामुपासीन तस्य त्वेभ्युदयो भविता तस्मात्संध्यामुपास्वेति। न च पर्याययोः सह
प्रयोगो भवति। लोकप्रमाणकश्च शब्दार्थावगम इति नेष्टसाधनताभिधायित्वं लिङादीनां। तस्मादन्यं कार्याभिधायित्व
मेवाश्रितं। नन्वेतदयुक्तं। कार्यमिति यदि कृतिं प्रति उद्देश्यमभिधीयते ततस्तादृशा कार्यता सर्ववस्तूनामविशिष्टेति न तत
दवगतिः प्रवृत्तिहेतुः। पारिशेष्यात्कृत्यर्हता कार्यता वक्तव्या। तदवगतिर्हि प्रवृत्तिहेतुः कृत्यर्हत्ता च न सुखदुःखपरिहारस्त

न्या०पू० २४ व्यु
इपायव्युत्पत्तिरेकिणी काचिदस्तितेनानयनादिक्रियाणांस्वरूपेणासुखदुःखपरिहाररूपत्वाभावात्।तदुपायत्वमेवकृत्यर्हते
त्तिक्रियादिविषयायाःकार्यावगतेःप्रवृत्तिहेतुभूतायाःसमीहितसाधनत्वमेवालंबनं।तदुक्तं।कर्त्तुरिष्टाभ्युपायेहिकेनै
वमितिलोकधीरिति।पुंसांनेष्टाभ्युपायत्वात्क्रियास्वन्यःप्रवर्त्तकइतिच।तेनलिङ्शब्दोपिकृत्यर्हतारूपंकर्थमभिदध
24 त्समीहितसाधनत्वमेवाभिधीयत्इत्यादितिनतन्मनाक्स्वविशेषःस्यात्।उच्यते।अयमस्तिविशेषः।यत्समीहितसाधनता
नस्वरूपेणाभिधीयते।किंतुलिङ्शब्दःकृत्यर्हतारूपंसुखदुःखपरिहारतदुपायसाधारणमभिदधातितत्तस्मिंस्त्वभिहि
तेक्रियायाःस्वयंसुखताद्यभावात्परिशेष्यात्तदुपायत्वंनिश्चीयते।तथाचकर्त्तव्यतावचनोभावनायांपुरुषंप्रवर्त्तयती
तिभूयान्भाष्यवार्त्तिकयोर्व्यवहारइति।इदमपिमतमभिधाभावनामाहुरित्याद्यननुगुणं।किंचकार्यशब्देनापिसहवि
धिशब्दःप्रयुज्यतेकार्यंतेसंध्योपासनमतःतत्कुरुष्वेति।यद्यपिचात्रप्रयोगःकर्तृकर्मगतसंख्याभिधानभेदेनात्यं
तापर्यायत्वादुपपद्यतेतथापिनकार्यस्यलिङर्थतायुक्ता।तथाहि।अकार्येप्यर्थेकार्यतामंगीकृत्यलिङादिप्रयोगोया २४
च्यायांदृश्यते।कश्चिद्धिकंचिदेवंयाचते।यद्यप्येतत्तवचतिधिद्वादकार्यमेवतथापिमत्कृतेकुरुष्वेति।कार्यार्थत्वेतु
व्याघातःस्यान्नत्वेवंप्रयुज्यतेयद्यप्येतदकार्यंतथापिकार्यमिति।एवंहिब्रुवन्नुपहास्योभवति।तस्मात्कृत्यर्हताविधिश्चास्ति

ज्ञापकत्वेऽर्थौ किंपुनरिदमभिधाभावनेत्युक्तं।सर्वशब्दानामेवार्थप्रतीत्युन्नेयोऽभिधाभिधानो व्यापारः समस्ति लिङादीनां त्वसौ व्यापारः
पुरुषप्रवृत्तिभवनफलत्वाद्भावनेति प्रवर्तनेति प्रगीयते।कश्चिदाह।न शब्दे व्यापारः संभवति गुणत्वात् द्रव्यत्वेपि विभुत्वादि
तितदयुक्तं।गुणस्याप्यस्पर्शादेर्द्रव्यावच्छेदव्यापारदर्शनात्।विभूनांचात्मादीनांज्ञानादिव्यापारसंभवात्।संयोगसमवायस्तु न सं
भवति।न चासावस्माभिः शब्दस्येष्यते।कस्तस्य व्यापारः।स्वज्ञानमेव तज्जनितो वा संस्कारः तद्योगी हि शब्दोऽर्थप्रतीतिं ज
नयति।तथाचोक्तं।शाब्दं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानमिति।पूर्ववर्णसंस्कारसचिवोंऽत्यवर्णो वाचक इति च।यदेव हि य
मागंतुकं धर्मं प्राप्य कार्यायपर्याप्तं भवति।स एवागंतुकधर्मस्तस्य व्यापार इति उच्यते।ते।न ज्ञानसंस्कारयोः शब्दकर्तृत्वेक व्यापा
रत्वमुपपन्नं।ननु ज्ञानस्याभिधात्वमयुक्तं।ज्ञानं प्रति हि कर्मीभूतः शब्दः कर्तृत्वं करणत्वं वा तस्याभिधां प्रत्युपगम्यते।स कथमेक
स्मिन्नेव व्यापारे कर्मत्वं कर्तृत्वकरणत्वयोरन्यतरत् प्रतिपद्येत।परशुवदिति ब्रूमः।परशुर्ह्युद्यमननिपातनयोः कर्मापि स
न् द्वैधीभावलक्षणफलावच्छेदलब्धच्छिनत्तिपदाभिधानयोस्तयोरेव करणं भवति।सर्वमेव हि करणं कर्तृव्यापारगोचरः।तथा
ज्ञानस्य शब्दविषयस्याप्यर्थप्रतिपत्तिलक्षणफलावच्छेदलब्धाभिधाभिधानस्यार्थ एव कर्म शब्दस्तु फलांतरप्रवृत्तव्यापारव्याप
तया तस्यामवस्थायां करणं स्वातंत्र्यविवक्षायां च कर्तृत्वमनवद्यं।अनेनैव न्यायेनार्थकर्मकस्याथाभिधाव्यापारस्य पुरुषप्रवृ

न्या०पू०
२५
25

त्तिभवनफलावच्छेदलक्षणशब्दभावनाभिधानस्यपुरुषप्रवृत्तिफलावच्छेदकप्रवर्त्तनाभिधानस्यचप्रवृत्तिकर्मत्वंपुरुषकर्मत्वं
चव्याख्यातं।तेनैकएवव्यापारोयदाजानातिनाविषयप्रकाशनफलावच्छिन्नोभिधीयते।तदाविषयीभूतःतत्फलभाक्श
ब्दएवकर्मभवति।शब्दंजानातीति।यदातुसएवार्थप्रतीतिफलावच्छिन्नोभिदधातिनाभिधीयतेतदाप्रतिपत्तिरूपफल
भागर्थःकर्मभवति।अयमर्थमभिदधातीति।यदातुसएवपुरुषप्रवृत्तिभवनावच्छिन्नोभावयतिनाभिधीयतेतदाभवनफल
भाक्प्रवृत्तिःकर्मभवतिप्रवृत्तिंभावयतिशब्देनेति।यदातुपुरुषप्रवृत्तिफलावच्छिन्नःप्रवर्त्तयतिनाभिधीयतेतदाप्रवृत्तिफ
लभाक्पुरुषःकर्मभवतिपुरुषंप्रवर्त्तयतीति।एवंसंस्कारेऽप्यभिधाव्यापारेयथासंभवंयोज्यं।नहिव्यापारस्वरूपापेक्षःकर्मभा
वः।तथासतिचलत्यभिहितेऽपिक्रियागच्छत्यभिहितेवसकर्मिकास्यात्।तथाप्रयत्नोपिकरोतिभावयतिव्याप्नोतिवप्रयत्तिना
थभिहितःसकर्मकःस्यात्।तथागच्छत्यव्यापारोऽपकर्षयच्छतिनियच्छतिव्याप्नोतिवच्छिनत्तिनाप्यभिहितःपरस्तुकर्मकःस्यात्।ता
भ्यामपिवाभिहितच्छिनत्त्यभिहितइववृत्तःकर्मकःस्यात्।तस्मादेकएवव्यापारःफलभेदेननिरूप्यमाणस्तंतंकर्मभेदंभ
जते।यदाफलानपेक्षेणस्वरूपेणनिरूप्यतेप्रयततिचलत्यादिभिस्तदाकर्मकोभवति।यदातुफलाधीननिरूपणायेनरू २५
पेणनिरूप्यतेतदासकर्मकः।तत्रयेनधातुनापत्फलाधीननिरूपणाद्येनस्वरूपेणक्रियाभिधीयतेतद्धात्वर्थाक्रिया

यं तत्फलभाक्त्वस्य कर्म भवति। यत्तु केनचिदात्मनो ज्ञानकर्मतां निराकुर्वता परसमवेतक्रियाफलभागित्वं कर्मलक्षणमुक्तं तदति
व्यापकं। पूर्वोक्तेष्वपि परस्वादिषु छिदादिकर्मत्वप्रसंगात्। अव्यापकं च देवदत्तः पावमानीभिरात्मानं पुनाति। इत्यादिषु। स्वसमवायि
क्रियाफलभागिनोपि देवदत्तस्य पुनातिकर्मत्वात्। तथा च वेदे पुनात्येवाग्निं पुनीत आत्मानमिति प्रयोगो दृष्टः। तस्मात्पूर्वोक्तमे
व कर्मलक्षणं। न च गन्तो गंतुः कर्मत्वप्रसंगः। गच्छतिर्हि गंतव्यापाराधीननिरूपणा या एनैव रूपेण क्रियामभिदधाति। तथा मादे
रेव तत्कर्मत्वं न गंतुः। एवं च ज्ञेयावभासफलाधीननिरूपणा या एनैव रूपेण जानाति स्वं वित्यादिभिरभिहितायां ज्ञानक्रियायामात्म
नो ग्रहं वित्तो भासमानत्वात्कर्मत्वं समर्थितं। आहात्वाभिधाव्यापारः। न त्वस्य पुरुषप्रवर्तकत्वं लिङादिभिधेयत्वं वा संभवति।
न हि प्रेक्षापूर्वकारी कश्चिदभिधामात्रावगमात्प्रवर्तते। समीहितसाधनतावगमाधीनत्वात्प्रवृत्तेः। न चासावर्थप्रतिपत्तिलक्ष
णा फलोत्रेया शाब्दांतराभिधा वदभिधेयापि भवितुमर्हति। उच्यते। सत्यं फलसाधनत्वं प्रवर्तकं। तत्तु न शब्दस्याभिधेयमित्यु
क्तं। अतो व्युत्पित्सुर्बालः प्रयोज्यवृद्धप्रवर्तमानं उपलभ्य प्रवृत्तिहेतुभूतामिष्टसाधनतावगतिं शब्दजनितामध्यवसाय पूर्वोक्ते
नन्यायेन सा तां च शब्दस्य तज्जनकत्वासंभवाद्येनाभिहितेन फलसाधनत्वं कल्पयितुं शक्यते तदभिधायी लिङ्शब्द इति नि
श्चिनोति। ततः स्वव्यापारस्यार्थप्रतिपत्त्यौ वावकल्पितस्य प्रवर्तनारूपाभिधानं लिङादिभिः कल्प्यते। प्रवृत्तिफलता च प्रव

र्त्तनारूपता। न चैवं रूपतार्थप्रतिपत्त्यैव कल्पयितुं शक्योऽस्य नन्वस्य लभ्यत्वादभिधान्तरविलक्षणतां लिङ्शक्तिं कल्पयति। एवंविध
विध्यवरुद्धा च भावना पुरुषार्थसाधनतया निश्चीयते। नस्य पुरुषार्थफलस्य व्यापारस्य प्रवर्त्तनारूपविध्यन्वयसंभवः। प्रेक्षापूर्व
कारिणां निःफले प्रवर्त्तयितुमशक्यत्वात् तदेवमभिधाव्यापारमेव वै प्रवर्त्तनारूपेणाभिदधाना लिङादयस्तद्बलादेव फलसाधने
नत्वं बोधयन्ति। न चास्मिन् पक्षे प्रवर्त्तनारूपस्य विधेः प्रवर्त्त्यापेक्षत्वात् प्रवर्त्त्यसमर्पकत्वेनैव स्वर्गकामादिशब्दाः संबध्येरन् न फ
लसमर्पकतया। तथास्तु नामेति केचित्। न चैवमफलताप्रसक्तिः। प्रवर्त्त्यत्वानुपपत्त्यैव काम्यमानस्य फलत्वकल्पनात्। भा
ष्यवार्त्तिकयोस्तु फलपरत्वमेव स्वर्गकामादिशब्दानां लक्ष्यते। युक्तं च तत्। तथा हि। यद्यप्यस्मिन् पक्षे न कार्यात्मकविधिपक्ष
वत् कर्तृनियोज्ययोरभेदापत्तिः। विधेयक्रियाविषयं कर्तृत्वं विधिविषयं तु नियोज्यत्वमिति विषयभेदात्। तथापि न तत्परत्वे
कामशब्दानां युक्तं। अप्राप्तार्थपरं हि शास्त्रं इह च विधिवशादेवैतावदवगतं। अस्ति कश्चिन्नियोज्यः स चासौ योऽस्य विध्य
न्वितस्य व्यापारस्य शेषी समर्थश्चानुष्ठातुं न त्वेतस्यार्थे व्यापारे कश्चित् प्रवर्त्तयितुं शक्यते। नाप्यसमर्थः। स एव च शेषी पदभि 
लषितफलसाधनोऽयं व्यापार इत्येतावति कामशब्दसंनिधेरेवावगते फलविशेषमात्रे चानवगते तत्परत्वमेव कामशब्दानां
युक्तं। तदेवं विधिशब्देनैव प्रवर्त्तनारूपं विधिमभिदधताऽर्थाद्विधेयस्य कर्त्तव्यता फलसाधनता च बोध्यत इत्यभिप्राये

णां कर्त्तव्यतावचनः प्रत्ययः श्रेयःसाधनतास्येषां नित्यं वेदात्प्रतीयत इति च व्यवहारः। ननु स्वव्यापारेऽभिधीयमाने स्वरूपाभिधान
प्रसंगः। नत्वनभिधायविशेषणं विशिष्टमभिधातुं शक्यं। मैवं वोचः। उक्तं हि। विशिष्टग्रहणं नेष्टमगृहीतविशेषणं। अभिधा
नभिधाने नु न केन विदिहाश्रितेति। तुल्यं चैतदिष्टसाधनविधिपक्षेऽपि। तत्रापि नु नेष्टसाधननामात्रं विधिः अपितु कर्त्तुरिष्टसा
धनता। न चाख्यानं कर्त्रभिधायि। तत्रावश्यं भावनाक्षेपावगतकर्तृविशेषितेष्टसाधनत्वमभिधीयत इत्याश्रयणीयं। न चास्मि
न्नपि पक्षे प्रत्यक्षावगतलिङ्गव्यादिभ्यः प्रवर्त्तनावगतेर्नेत्थं स्वरूपविशिष्टाभिधाव्यापाराभिधानादिदोष इति। न्यायवि
दां तु इष्टसाधनत्वमेवाभिमतं। न च संविद्विरोधः। स्वरूपेणाभिधानाभावात्। प्रवर्त्तनारूपेण शब्दोऽभिधत्ते प्रवृत्तिहेतुश्च धर्मः प्र
वर्त्तना। सा चापौरुषेये वेदे प्रैषादीनामसंभवात् विशेष्या कर्तुरिष्टाभ्युपायतैव निश्चीयते। तेनाभिधाव्यापारः प्रवर्त्तनारूपेण
इष्टसाधनं शब्दोऽभिधत्ते न स्वरूपेणेति न प्रतीतिविरोधः। इदमेव भगवतो मण्डनमिश्रस्यापि। पुंसां नेष्टाभ्युपायत्वात् क्रियास्व
न्यः प्रवर्त्तकः। प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्त्तनां। एवं कार्यत्वप्रवर्त्तनाप्रत्यय इति वदतोऽभिमतं। एवं चानेकार्थत्वमपि कल्पि
तं न भवति। इतरथा प्रैषणामध्येषणामभ्यनुज्ञानमिष्टसाधनत्वं चेति बहवोऽर्थाः शब्दस्य कल्प्येरन्। प्रवर्त्तनासामान्याभिधायि
त्वे तु लाघवं स्यात्। तत्रापि रागद्वेषमोहादीनां प्रवृत्तिहेतूनामवाच्यत्वादेवं वक्तव्यं योऽवगम्यमानः प्रवृत्तिहेतुस्तदभिधायी

लिङ्शब्द इति। नच कार्यमेव ज्यायः समकनीयोभिः प्रतिपाद्यमानं प्रेषादिव्यपदेशभाक् सर्वानुगतं शब्दार्थ इति सांप्रतं। अ
कार्ये नाभ्युपगमे नैव यथा ज्ञायां लिङ्प्रयोगादित्युक्तं। तस्मात्प्रवर्त्तनासामान्यं शब्दार्थः। एवं च। विशेषणावशब्दार्थ इष्टरू
पान्वयेनपि हि। नच प्रवर्त्तनाबोधः इष्टशक्तेर्विनार्थवानित्यत्र श्लोके पूर्वार्द्धे नपरमतमुपन्यस्योत्तरार्द्धे नस्वमतमुपन्यस्त
वानिति व्याख्यातव्यं। प्रवर्त्तनासामान्यमभिदधता लिङ्शब्देन निर्विशेषस्य सामान्यबोधस्यानर्थकत्वापत्तेरपौरुषेये च वेदे पु
रुषधर्माणां प्रेषादीनां विशेषाणामसंभवात्पारिशेष्यादिष्टसाधनत्वेनैव बोध्यत इति। अभिधाभावनामाहुरित्यस्यापि वार्ति
कर्तव्यना कस्यायमेवार्थः। अभिधीयत इत्यभिधा प्रवर्त्तनो वा सैव च पुरुषप्रवृत्तिं भावयतीति भावना तामाहुरिति। अथवाऽभिधा
याः शब्दस्य भावना ऽभिधाभावना सैव प्रवर्त्तना परसमवेतापि शब्देन पुरुषं प्रवर्त्तयतीति नान्निरूढयेऽभिधीयमाना शब्दव्या
पारत्वेनोच्यते तामाहुरिति। अथवेष्टसाधनत्वाभिधानमभिधा सैव विधानं विधिरिति व्युत्पत्त्या विधिरित्युच्यते। सैव
च भूतिकर्त्तृ च प्रतिपद्यमानायाः पुरुषप्रवृत्तेः प्रयोजकस्य शब्दस्य व्यापारो भावना नामाहुः कुर्वतीति ओदनपाकं पच २७
तीति विवरणाख्येयं। तदेवं शब्दकर्त्तृकं प्रवर्त्तनारूपेष्टसाधनत्वाभिधानमेव शब्दभावनेति गीयते। तस्याः पुरुषप्रवृत्त्य
र्थप्रवृत्तेः पुरुषप्रवृत्तिर्हि स्वर्गादिस्थानीया भाव्या समीहितसाधनताविज्ञानं तु परार्थप्रवृत्तशब्दव्यापारजन्या तथा या।

गादिवत्करणी। प्राज्ञास्त्वयज्ञानं त्विति कर्तव्यतेति विवेक्तव्यं। कर्तव्यतेति प्रवर्त्तनेति च समीहितसाधनत्वेनैवोच्यते। नदुहेद्धेनाहि हूलिःप्र
वर्तेत इति दर्शितं। एवं च प्रवर्तनावचनः कर्तव्यतावचनः प्रत्यय इत्यादिग्रंथस्याविरोधः। न च सहप्रयोगविरोधः। प्रवृत्तिनिमि
त्तभेदात्पर्यायत्वाभावात्। इष्टसाधनत्वाद्बोधिहितसाधनतामेव साक्षादभिधत्ते। लिङादयस्तु प्रवर्तनारूपेणाहत्यर्हतारूपेणावेति
नास्ति पर्यायता। तस्मिंश्च कर्तव्यतारूपं प्रवर्तनारूपं वा समीहितसाधनत्वमेव लिङादिभिरभिधीयत इत्येतावदेव रमणीयं। स्व
व्यापाराभिधानं तु दुरुपपादं। ग्रंथानुगुणापि नानाविधत्वापत्ते। निषेधशास्त्रेषु प्रनिषेधस्य वर्जनस्य नञाभिधेयस्य लि
ङादिभिर्विधिर्विधेर्वा प्रतिषेध इति वचनद्वयमंगीकृत्य ब्राह्मणं न हन्यादित्यत्र पुंस्त्वाविवक्षा प्रतिपाद्यते। प्रतिषेधविधा
वविवक्षामुपपाद्य विधिप्रतिषेधेष्वविवक्षामुपपादयतोक्तं। विध्यर्थमपि हिंसाद्यर्थप्राप्तमनूद्य हननं प्रतिषिध्यच रिता
र्थो नञ् न लिंगमपरं शङ्कोतिप्रतिषेद्धुमिति। यदि हि स्वव्यापारो विध्यर्थः स्यात्तत्स्यानुवादो वा कल्प्यते। न हि द्वेषादिनिमित्तायां
हननादिप्रवृत्तौ लिङ्व्यापारः प्रवर्तकः प्राप्तः। यो न हन्यादित्यादिषु लिङानूद्य नञा प्रतिषिध्येत। कर्तव्यता त्वनभिधेयाक
थमज्ञानूद्यते। अननूदिता वा कथं निषिध्यते। ननु भवन्मते समीहितसाधनता हननस्य विद्यत एवेति कथं निषिध्यते। उच्य
ते। प्रवर्तना हि विध्यर्थः कर्तव्यता वा। न च महानर्थजनकस्य हननादिषु सदपि स्वल्पसुख सुखसाधनत्वं प्रवर्तना कर्तव्यता

तावा।नहितादृशोप्रेक्षापूर्वकारिणांकृतिः प्रवर्त्तते।येतुमहांतमनर्थंनजानंतितेस्वल्पसुखसाधनत्वादेवभ्रांत्याकर्त्तव्या।तांमनं
तेसाशक्यतेप्रतियेद्धुंयाभ्रांत्याहननस्यकर्त्तव्यतावगतासानास्तीति।तस्माद्नवेद्यं।न्यायागमानुसारेणश्रीमद्यज्ञात्मसत्तु
नायार्थसारथिमिश्रेणकृतोयंविधिनिर्णयः॥३॥ ॥यत्रविप्रतिपद्यंतेसंबंधेलिंगलिंगिनोः।स्वरूपतःप्रमाणाच्चतत्रनि
र्णयउच्यते।स्वरूपतस्तावत्कार्यकारणभावसंयोगसमवायैकार्थसमवायविरोधाः द्वैलैंगिकशब्दनिर्द्दिष्टानुमानकारणत्वे
नकाणादैःसंगिरंते।अस्येदंकारणंकार्यंसंबंध्येकार्थसमवायिविरोधिचेतिलैंगिकमिति।अविनाभावंसाधनस्यसा
ध्यतदभावाभ्यामन्वयव्यतिरेकरूपंतत्त्वभावतदुत्पत्तिनिबंधनंशाक्याः।साध्येनसाधनस्यव्याप्तिमन्येनियमरूपंमीमांसका
ःप्रमाणतोविप्रतिपत्तिः।तत्त्वभावतदुत्पत्तीशाक्याःप्रमाणमाहुः।मानसप्रत्यक्षमन्ये।ऐंद्रियकमेवान्ये।तदपिप्राथमिकमे
वकेचित्।अपरेभूयोदर्शनसहायंचरमंप्रत्यक्षंनियमप्रमाणंमन्यंते।अर्थापत्तिमन्येभूयांस्येवतद्दर्शनानिव्यभिचारादर्श
यैका नसहायान्याचार्याः।तत्रवैशेषिकपरिगृहीतकार्यकारणभावादिमात्राभ्युपगमेहृत्तिकारोहिण्युदयादीनामगम्यगमकभावोनस्या
त्।कार्यकारणभावाद्यभावात्।नचसंबंधिग्रहः।तस्यसंयोगसमवायमात्रपरत्वात्।सर्वपरत्वेचकार्यकारणभावाद्यंदीना २९
मपिततएवसिद्धेःपृथगभिधानानर्थक्यं।अपिचैवंवह्नेरपिधूमानुमानंस्यात्।कार्यकारणत्वात्।वृक्षत्वेनचशिंशपात्व
ग्रहणेनसर्वसं२

स्यैकार्थसमवायात्। अन्यथा नियतत्वाभावात्प्रसंगः। तर्हि नियम एवानुमानांगं न कार्यकारणभावादि। शाक्यपक्षेपि स्वभावकार्ययोरेवा
न्वयलाभेन हेतुत्वाद्रसविकारस्य गौरेवाचपलाभेन हेतुत्वाद्रसविकारो रूपादयश्चिरोदितरोहिता प्रतिपत्तिः सिध्येत्। रसात्स्वरूपेणानुमा
नं। प्रवृत्तसामर्थ्यरूपोपादानसहकारिरसोपादानं रसादनुमायते। प्रवृत्तसामर्थ्याद्धि रूपोपादानादुपादेयरूपानुमानमिति चेत्॥
न॥ अकार्यत्वात्। यद्यपि कार्यात् कारणं सहकारिसहितमनुमीयते कारणात्तु प्रवृत्तसामर्थ्यादपि न कार्यं शक्यमनुमातुं। अ
कार्यत्वादतत्स्वभावत्वाच्च। अथ कारणमप्यनुमापकं। वह्नेरपि धूमानुमानप्रसंग इत्युक्तं। अपि चान्वयो नामानुगतिः न च
धूममूर्द्धगं तं भूमिस्थो वह्निरनुगच्छति शंकुच्छायां चारविंदं विष्ठो भूमिस्थां एतेन व्याप्तिः प्रत्युक्ता। न हि। भूमौ प्रतिष्ठितो वह्नि
धूमाग्रं व्योम्न्यवस्थितं। व्याप्नोतीति नियमस्तस्मात्संबंधो लिंगलिंगिनोः। यथोक्तं। नियमो नाम संबंधः स्वमतेनोच्यते धूमेनेति। यो नो
यथा नियतो येन यादृशेन यथाविधः। स तथा तादृशस्यैव तादृशोन्यत्र बोधकः। यो भावो येन यादृशेन यादृशेशकालवर्त्तिना
ना यथा येन प्रकारेण संयोगसमवायैकार्थसमवायकार्यकारणभावादिनापि संबंधेन साक्षात्परंपरया वा नियतत्वेन दृष्टो दे
त धर्मिष्ववधारितः। स तादृशो धर्म्यंतरेषूपलभ्यमानस्तादृशं तद्देशकालवर्त्तिनं तथाविधसंबंधसंबंधिनमनुमापयति।
तद्यथा धूमो नभोवर्त्तिरूर्द्धगच्छन्ति दूरवर्त्तिना वह्निना नियतस्तथैव तं गमयति। नदीपूरस्त्वधस्तनो धोदेशगतस्याति

न्या०पू० दुरवर्त्तिनीं वृत्तां वृष्टिं । उदयस्थचंद्रगतः समुद्रगतां तत्कालां वृद्धिं । तस्यैव नमो मध्यस्थितिः तामेव पंचदशानाडिकातिक्रांतां ।
२९ तादृश्येपेव तया नस्य नियतत्वादेवमन्यत्राप्यूहनीयं । नियमराववान्निके व्याप्तिशब्देनोच्यते । संबंधो व्याप्तिरिष्टात्र लिंगधर्म
स्य लिंगिना । व्याप्यस्य गमकत्वं च व्यापकं गम्यमिष्यत इत्यादिषु केन पुनः प्रमाणेनायं नियमोऽवगम्यते । कार्यकारणभाव व
29 त्स्वभावाद्धेतिकेचित् । तदयुक्तं । अकार्यकारणतदात्मनां कृत्तिकारोहिणीफदषादीनां नियमाभावप्रसंगात् । अपि च पौर्वा
पर्येनियमएव कार्यकारणभावः कथं च नियमएव नियमे प्रमाणामात्माश्रयदोषापत्तेः । अपि च । कार्यस्वभावयोरेव किं
प्रमाणं ॥ प्रत्यक्षेण तावत्साहित्यमात्रं गम्यते न तत्कार्यतातत्स्वभावता वा । शतशोऽग्नौ धूमदर्शनादनग्नौ चादर्शनात्तत्कार्य
ता धूमस्यावसीयत इति चेन्न । स खलु यत्र दृश्यते तत्र तस्यास्तिता यत्र तु न दृश्यते तत्र नास्तित्वं गम्यते । कार्यता तु कुतः । त
स्मात्कार्यकारणभावस्यैवाप्रमाणकत्वाच्च तन्निवंधनं नियमावधारणमवकल्प्यते । तत्स्वभावता चाप्रामाणिकैव
। शिंशपा हि वृक्षात्मिका क्वचिद्दृष्टापि न तत्स्वभावेन निश्चेतुं शक्यते तन्मात्रानुवंधित्वात्तत्स्वभावतायाः । न च शिं २९
शपामात्रानुवंधिवृक्षत्वमिति किंचित्प्रमाणमस्ति सत्यपि सहोपलंभे वृक्षत्वस्य व्यभिचारसंभवात् । न शिंशपात्वस्य क
चिद्व्यभिचारो दृष्ट इति चेन्न यथापि देशांतरे कालांतरे वाव्यभिचारसंभवात्संदेहानिवृत्तिः । तत्र स्वभावतो नियमसिद्धिः । केचि

न्नुमानसम्प्रत्यक्षं नियममाचक्षते। तदयुक्तं। मनसो बहिरस्वातंत्र्यादक्षयोर्दर्शनसहायं बहिः प्रवर्त्स्यतीति चेन्न देहाद्बहिर्भावा
त्। न खल्वक्षजत्वमात्रं प्रत्यक्षलक्षणं। अनुमानादेरपि लिंगादिसहितमनोजन्यतया प्रत्यक्षतापातात्। इंद्रियार्थसंप्रयोग
जं प्रत्यक्षं। चतुर्विधश्च संप्रयोगः संयोगात् द्रव्यग्रहणं। संयुक्तसमवायाद्गुणकर्मसामान्यानां संयुक्तसमवेतसमवायाद्गु
णत्वादीनां तत्समवायाद्गुणत्वादिगतसत्ताग्रहणं। न चायं चतुर्विधो वाध्येन सह मनसः संभवति संप्रयोगः तस्य देहाद्बहिर्भा
वात्। येपि विभु मनः सङ्गिरन्ते तेपि यद्यपि मनो द्रव्यमाकाशवद्व्यापकं तथापि कर्णच्छिद्रपरिच्छिन्नस्यैव गगनस्य देहावच्छि
न्नस्यैवेंद्रियभावमातिष्ठंते मनसः। अतो संभवाद्वाध्येन संप्रयोगः। अन्यथानुमानादीनामपि मनःसंयुक्तार्थविषयत्वा
त्प्रत्यक्षत्वप्रसंगः। यदि च चतुर्विध एव संप्रयोगः कथं तर्हि शब्दग्रहणं। नहि श्रोत्रस्याकाशदिगहंकारणामन्यतमात्मक
स्य शब्दस्य च निःक्रियतया संभवति संयोगः। तस्य कर्मजत्वादुच्यते संयोग एवानयोः सन्निकर्षः। न चायं कर्मजन्यः संयो
गजसंयोगे व्यभिचारात्। नापि संयोगजन्यः कर्मजे व्यभिचारात्। तदुभयानुगतं नैरंतर्यमेव द्रव्यगतमस्य कारणं। तच्च वि
भुनोरपि संभवति। भवतु वा संयोगजसंयोगस्याप्रमाणकत्वात् जनिमतः संयोगस्य कर्मजत्वमव्यभिचारात्तंतुगतए
वहितुरीसंयोगस्तंतौ पटभावमापन्ने पटगतोपि भवति न तु संयोगांतरबुद्धिस्तत्रास्ति। तर्ह्यजः संयोगो विभुनोर्भविष्य

न्या०पू०
३०
30

त्यनुमानाद्विभुनी मिथः संयुक्ते द्रव्यत्वे सति निरंतरत्वात् घटाकाशवदिति। यद्दित्तु नैरंतर्यमेव संयोगस्तथापि विभुनोरवि
हतः संयोगः। ननु द्रव्यधर्म्मः संयोगः स कथं गुणभूतस्य शब्दस्य स्यात्। नायं गुणो द्रव्याश्रयत्वप्रमाणाभावात्। ननु न कार्यम
नाश्रितं संभवति। सत्यं। ननु शब्दस्य कार्यत्वं नित्यत्वात्। कश्चित्त्वेकेंद्रियग्राह्यनयानुपाधिविशिष्टं गुणमिच्छति। तस्यापि वा
यावनेकांतिकत्वं। स्पर्शविरहे सतीति विशेषणेपि गोत्वादिसामान्ये व्यभिचारः। तेषां नैत्रैकगोचराणामपि गुणत्वाभावात्।
अपि च। यच्छब्दाश्रयत्वेनाभिमतं व्योम तत्प्रत्यक्षमप्रत्यक्षं वा स्यात्। प्रत्यक्षत्वे तेनैव लोचनेकगोचरेण द्रव्यभूतेन हेतोर्व्यभिचा
रः। अप्रत्यक्षत्वे सति तस्य सप्रतिसाधनत्वं न त्वप्रत्यक्षगुणत्वं प्रत्यक्षगुणस्य शब्दस्य संभवति। शाक्यन एव हि प्रयोक्तुं। शब्दो न
गुणः प्रत्यक्षद्रव्यगुणत्वरहितत्वे सति प्रत्यक्षत्वाद्घटवदिति। तस्मादक्रमस्य द्रव्यत्वे संयोगाद्ग्रहणमिति चतुर्विध एव
सन्निकर्ष इति वा त्वेन मनसः सन्निकर्षाभावान्न मानसप्रत्यक्षविषयत्वं नियमस्य धूमवर्त्तिनः संभवति। तत्र प्रमाणांतरमि
दं भूयोदर्शनसहायमनोजन्यं लिंगादिसहितमनोजन्यज्ञानादिवत्प्रसज्येत। तच्चानिष्टं प्रमाणषट्काभिधायिनां। कश्चि
त्तु वह्निरिंद्रियविषयमेव नियममिच्छति। स किल मन्यते वह्निधूमयोः संबंधो देशकालानवच्छिन्न एव प्रत्यक्षेणावग
म्यते। ननु संनिहितदेशकालविषयत्वात्प्रत्यक्षस्य तदवच्छिन्न एव संयोगः। नैवं इदंता हि संनिहितदेशकालावच्छेदः स ३०

चद्रव्ययोरेवावगम्यते न संयोगस्य। संयुक्ताविमाविति हि प्रतीतिः न पुनरयमनयोः संयोग इति तस्माद्देशकालाभ्यां संयोगेन च
द्रव्यमेवावच्छिद्यते न तु संयोगस्य देशकालावच्छेदको ते नानवच्छिन्नः संबंधो धूममात्रानुयायीति निश्चात। ततश्च धूमसत्तेव ५
देशकालांतरादौ प्रमाणमपेक्षते न त्वग्निसंयोगः तस्य पूर्वमेवावगतत्वात्। अग्नेस्तु धूमसंयुक्तस्यापि दृष्टस्य क्वचिद्व्यभिचा
रदर्शनादार्द्रेंधनाद्युपाधिकृतोस्य धूमसंयोगो न स्वाभाविकः। धूमस्य तु तादृशोपाध्यदर्शनात्स्वाभाविकमग्निसंबंधि
त्वं नियतं भवति। न हि स्वाभाविकं व्यभिचरतीति। अत्र वदामः संविदेव तावदत्र परिपंथिनी। सा हि देशकालाभ्यां संयोगमेवा
वच्छिंदती जायते। संयुक्तवंतौ वह्निधूमौ संयुज्येते संयोक्ष्येते इति संयोगस्यैव भावार्थस्य कालत्रयावच्छेदात्। सोयं गुरुमुक्त
एव वाणो भवंतं प्रहरति कारकव्यापारो हि कालत्रयावच्छेद्यो न कारकमिति। न चावश्यमिदं शब्देनैव कालो निर्देष्टव्यः लडा
दिभिः सुतरां निर्देशासिद्धेः। यदि वस्तुतंत्रस्यैव द्रव्यस्य कालसंयोगः न परतंत्राणां गुणकर्मणां। ततो लडादीनां कालविशेष
स्मृतानामनवकाशत्वं स्यात्। ते हि क्रियाया एव कालावच्छेदमुपदर्शयंति न द्रव्यस्य। सा चेदनवच्छेद्या कस्यैते कालमभि
दधीरन्। मा भूद्वा देशकालाभ्यामवच्छेदावगमः संयोगस्य तथापि स्वाभाविकत्वमप्रमाणकमेवानस्यावच्छेदावेनेगममा
त्रेणात दभावावधारणासिध्यति। सतोथ न वगतिसंभवात्। अनिश्चिते चावच्छेदाभावे न स्वाभाविकत्वं सिध्यति। सिद्धो

वा वर्त्तमानकालतापि स्वाभाविकी धूमस्य स्यात् । यथा त्वग्निसंयोगो द्रव्यविशेषणमेवं कालोपि । ततश्चाग्निसंयोगवत्स्वाभा
विकमेतत्कालसंबंधित्वमित्यापद्येत । तत्र यथाग्निसंयोगरहितस्य नावस्थानमेवमेतत्कालसंबंधितामपहाय
धूमस्य स्थित्यभावात्स्यात्तद्देशोवकालांतरसंबंधः कदाचिदप्यसाक्षणिकत्वाभावस्यापादितेति जितं सौगतैः । अथानर
थिकोपि कालसंबंधो न स्वाभाविकस्तथाग्निसंयोगोपि स्यात् । अथ स्वाभाविकमपि कालसंबंधमपहाय धूम
स्तिष्ठेत् अग्निसंयोगमप्यपहाय संभवत्ववस्थानमिति न नियमावधारणं । ननु प्रत्यभिज्ञया कालांतरसंबंधावे
गमात्पूर्वकालपरिहारेणापि सिद्धमिति धूमस्यावस्थानमग्निसंयोगत्वपहाय न कदाचिद्दृष्टमोदृश्यत इति कथमसौ
न संतरेणास्यात् । किमिदानीं प्रत्यक्षगृहीते वक्षणिकता पश्चात्तत्प्रत्यभिज्ञया वाध्यते न त्वेवमभ्युपगमो भवतां अ
पि चैवमक्कनामप्रत्यक्षावगतकालांतरसंबंधस्य पूर्वावगतक्षणिकत्ववाधः । अनुमानेनतु कथमग्नेः प्रत्य
क्षावगतक्षणिकभावस्य तद्वाधेन कालांतरसंबंधोवगम्यते । अपि चैवं प्रत्यक्षावगततत्कालसंबंधनियमवि ३१
रुद्धस्यानंतानवगतस्य कालांतरसंबंधस्यानुमानेनग्रहणे गृहीतग्राहित्वमनुमानस्य दुरापास्तं स्यात् । अपि वान
वच्छिन्नस्यापि कालसंबंधस्य व्यभिचारदर्शनादग्निसंयोगोपि व्यभिचरेन्नवेति संदिहानानसहस्रेणापि पुरुषायु

षैः तदंतं प्रतिलंभेरन्। यद्यपि दृश्यमानेषु देशकालादिषु प्रयत्नेनान्विष्टो व्यभिचारो न दृष्टः तथापि क्वचित् कदाचि
त्संभवति व्यभिचार इति शंकां को नाम निवारयेत्। न च प्रत्यक्षं तन्निवारणे शक्तं तस्य संनिहितदेशकालमात्रव्या
पारात्। नानुमानं तस्य नियमावधारणाधीनत्वात् तदधीने तु नियमे परस्पराश्रयदोषापत्तेः स्वाभाविकत्वादव्य
भिचार इति चेन्न स्वाभाविकत्व एव प्रमाणाभावात्। अनौपाधिकत्वमेव स्वाभाविकत्वं न चोपाध्यनवगति
मात्रेण तदभावसिद्धिरित्युक्तं। अपि च स्वाभाविकं न व्यभिचरतीत्यत्र किं प्रमाणं न तावत्प्रत्यक्षं। नानुमानं ना
न्यत् किंचित्। दृष्टश्चानौपाधिकस्यापि कालसंबंधस्य व्याघातिर्वैरः तथाग्निसंबंधस्यापि स्यात्। अपि चान्य
योरेवाग्निधूमयोर्दृष्टांतधर्मिणोः संबंधोऽवगतः। अन्यश्चायं पर्वतवर्ती धूमः तस्याग्निसंबंधोऽनवगत इति
कथं लिंगं स्यात्। अथ सामान्यं लिंगं। न तस्य संबंधानवगमात्। देशकालाभ्यां संबंधेऽनंगत्वाच्च [illegible] सर्वैर्द्रव्यै
मेव विशेष्यते न तु संबंधस्य जातेश्च परस्पराश्रयः। जातेरपि संयोगवत् द्रव्यविशेषणत्वात्। अथ द्रव्य
द्वारेणास्ति जात्योरपि संबंधः। तथाप्यार्द्रेंधनाद्युपाधिरेवाग्नेर्धूमसंबंधः तदभावे कालांतरे तद्द्रव्याभावात्त
द्द्वारकः संबंधोऽपि न स्यात्। द्रव्यांतरद्वारस्तु कालांतरसंबंधः प्रागनवगत इति कथमनुमानांगं। न च विशेषण

रिहारेणसामान्ययोः सकृद्दर्शनेन शक्यावगमः संवंधः किंच देशकालव्याप्तमपि द्रव्यद्वारेण संयोगस्याथवच्छेद इति
३२ नानवच्छिन्नत्वं तथा च जात्योर्द्रव्यद्वारकः संवंधः स्वाभाविको भवत्येवमग्निसंवंधस्य तत्कालावच्छेदो द्रव्यद्वा
रकोपि स्वाभाविकः स्यादिति तत्कालग्रहणेन कालांतरे संवंधस्तिष्ठेदित्यसंवंध एव कालांतरेग्निधूमयोर्नैव
दुरुक्यानीत्यानिश्चेतव्यः स्यात् ननु कालांतरेग्निसंवंधशंकाच्चिधूमस्य स्यादित्यफलमतिनिर्वंधेनाग्रयरं मतं शतशो
ऽग्नौ धूमदर्शनादनग्नौचादर्शनान्नियतो यमग्निनेति प्रतीतिस्तावदुपजायतेतिरश्चामपि न चेयमप्रमाणं सर्वेषा
दृढत्वेन जायमानत्वादतः प्रमाणमेवेयं तच्चषड्विधांतर्भूतं । तत्र नेदमनुमानं संभवति तस्य नियमावधारणाधी
नत्वात् न च शाब्दम् अशब्दजन्यत्वान्नोपमानमसादृश्यविषयत्वात् । नार्थापत्तिर्नियममंतरेणानवकल्पमा
नस्य कस्यचिददर्शनात् । अभावस्वभावरूपे नियमे दूरापास्त एव । न च स्वयं विपक्षव्यावृत्तिरूपोऽभाव एव । तथा
वृत्तिमात्रं नियमः शशविषाणादेः सर्वविपक्षव्यावृत्तेः सर्वार्थे नियमप्रसंगात् । व्यावृत्तिरपि सर्वविपक्षेभ्योऽनु ३२
र्लभैव दृश्यादर्शनाभावात् पारिशेष्यात्प्रत्यक्षमेवेदं । न च प्रथमदर्शने नवगमादप्रत्यक्षत्वं । रत्नतत्त्वस्येव
न्यः परिचयसचिवप्रत्यक्षविषयत्वोपपत्तेः । ननु वर्त्तमानविषयं प्रत्यक्षं तत्कथमनेन देशकालांतरसंवंधा

त्वानियमः शाक्यावगमः उच्यते। न कालांतरादिसंबंधो नियमः किंतु स्वरूपं धूमादीनां तत्तद्वर्त्तमानमिति युक्तं प्रत्यक्ष
ग्राह्यत्वं। न हि नियमं ग्रहीतुं देशांतरादिसंबंधो ग्रहीतव्यः कुड्यादीनामिव स्थिरं रूपं। न हि तेषां कालांतरसंबंधो प्रत्य
क्षइति तद्रूपमप्रत्यक्षं भवति। तथा सति नेदं रजतमिति पूर्वज्ञानबाधकत्वमुत्तरस्य न स्यात् विषयभेदात् पूर्वकाले
हि रजतज्ञाने तद्रजतं प्रसंजितं उत्तरकाले च तदभाव इति विषयभेदात्कथं बाधकत्वं। अतः स्थिरमेव रजतरूपं गृही
तमिति वक्तव्यं। आह च रजतं गृह्यमाणं हि चिरस्थायीति गम्यते इति। तद्वन्नियमरूपं गृह्यत इति युक्तं प्रत्यक्षत्वं। की
दृशं पुनरिदं रूपं धूमादीनां। नियंतोयमनेनेति नियमः यदा यत्र धूमस्तदा तत्राग्निरित्यर्थः। तस्मादुपपन्नं प्रत्यक्षवि
षयो नियम इति। तत्रेदं वक्तव्यं किं प्रत्यक्षं सर्वं विद्यमानोपलंभनं आहोस्वित्किंचिद् विद्यमानोपलंभनमपीति न
तावद् विद्यमानोपलंभनं प्रत्यक्षं नाम संभवति सत्संप्रयोगजनितत्वेन विद्यमानोपलंभनत्वस्य स्थितत्वात् तथा
च नियमविषयत्वासंभवः तस्य सर्वदेशकालव्याप्तिरूपत्वात् एवमेव हि धूमस्याग्निना नियमः यदखिलधूमदेशका
लव्यापित्वमग्नेः। यथोक्तं योयस्य देशकालाभ्यां समो न्यूनोपि वा भवेत्। स व्याप्यो व्यापकस्तस्य समो वाभ्यधिकोपि वे
ति। यत्तु धूमस्वरूपं नियम इत्युक्तं अस्त्वेतत् तत्स्वरूपमपि तदग्निसंबंधाव्यभिचारात्मकमेव। कश्चासावव्यभिचा

रः।अन्यदतोयावद्धूमदेशकालमग्निसंबंधसद्भावात्तथाचतस्मिन्प्रत्यक्षेणक्रियमाणेदेशांतरादिसंबंधःप्रत्यक्षेणा
३३ पद्येत।तत्संबंधातिरिक्तंतुपांडुरत्वादिवद्धूमगतंनियमाभिधानमपरोक्षंरूपमीक्ष्यतइतिसंविद्विरुद्धं।यदिवेदं
रूपांतरंपांडुरत्वादिवत्संबंधातिरिक्तंस्यात्तस्मिन्प्रत्यक्षागृहीतेपिसर्वधूमदेशकालव्यापित्वमगृहीतं
नस्यात्तत्रत्यन्यस्मि-न्गृहीतेन्यद्गृहीतंभवतिअतिप्रसंगात्।अगृहीतेचदेशकालाव्यभिचारेकथमनुमानोद
यः।किं।चेदंरूपांतरमपिप्रत्यक्षेणागृह्यमाणंसंनिहितदेशकालावच्छिन्नमेवगृह्यतइतिनकालांतरेषुनिय
मःसिद्ध्येत्।यदपिदर्शितंकुम्भादीनामिवस्थितंरूपमितितदपिनिरूपणीयंकिंतत्रस्थायित्वमेवगृह्यतइत्य
भिप्रायःकिंवायद्दृष्टकतःस्यात्स्वरूपंतद्गृह्यतइतिकिंवास्थितियोग्यता।नतावत्पूर्वःकल्पःस्थायिनाह्यनेकका
लावस्थानंसाकथंप्रत्यक्षेणावगम्यतेतस्यवर्तमानविषयत्वात्।यदिचेदंप्रत्यक्षेणावगम्यतेततःस्थायित्वाप्रसि
द्धयेप्रत्यभिज्ञादरोनर्थकःस्यात्।द्वितीयेतुकल्पेनुघटरूपमेवनतत्नान्यत्एवमिहापियद्दृष्टतोनियतंधूमस्वरूप ३३
मेवतत्प्रत्यक्षमित्येवसिद्ध्येत्नचतावताकिंचित्प्रयोजनमस्तियोग्यतातुसर्वभावानामर्थापत्तिगम्येतिप्रत्यक्षागम्यत्वा
नुपपत्तिः।यस्तुघटकुड्यादिषुदृष्टमात्रेषुस्थायित्वावगमोलौकिकानांसतादृशांस्थायित्वस्यपूर्वमेवावगमादनु

मानिकःस्य एवं चास्यानुमानिकत्वं। ऊहरूपत्वात् तथाहि दृशीयमवगतिः यदि शङ्खादिनानेन द्विघटेतेततः किंयतं चित्का

लं स्थास्यतीति। एवं च रजताद्विषयानुमानिकमेव तद्रूपस्य स्थायित्वमनेनैवाभिप्रायेणोक्तं रजतं गत्यमारां हि विर

स्थायीति गत्यते। एतदेव बाधकस्यापि तत्त्वं अनुमानेन त्वेतदवगतं रजतस्य सतो नाकस्मादतद्भावः संभवतीति अ

तद्रूपस्य वात् द्रूपतेति उभयोरपि कालयोरेकरूपमेवेदमिति स्थिते पूर्वमेवावगतं रजतरूपमुत्तरकालं व्याप्नोति उत्तर

कालावगतश्चातद्भावः पूर्वकालं तेन समानविषयतया पूर्वावगतस्य रजतरूपस्य भवत्युत्तरकालभुवा नेदं रज

तमित्यनेन बाधः येत्वनुमानेनैकरूपत्वं न कालद्वयेपि वेस्कनोवगतं तत्र न भवत्येव बाधः यथा बदरफले श्याम

प्रत्ययस्य पाका कालभुवा रक्तप्रत्ययेनाप्रत्यक्षेणानुस्थायित्वावगमे तत्रापि बाधः स्यात् तस्मात्प्रत्यक्षेणास्थायित्व

स्याध्यवसानं। एवं नियमोपि सर्वदेशकालव्याप्तिरूपत्वात्। स्वाभाविकत्वं संबंधस्य नियमः न तु कालांतरसंबंधः

तच्च वर्त्तमानमेवेति युक्तं यत्प्रत्यक्षेणागत्यते। किं पुनरिदं स्वाभाविकत्वं। न तावत्सदातनत्वं कादाचित्कस्य

तद्योगादथ स्वरूपनिमित्तत्वं अग्नेरपि धूमसंबंधे स्वरूपं निमित्तमिति तस्यापि धूमसंबंधो नियतः स्यात्। न त्वार्द्रेध

नादिकृतोस्य धूमसंबंधः न स्वरूपनिमित्तः सत्यमार्द्रेधनादिनिमित्तं स्वरूपमपि निमित्तमेव न त्वसंबंधिस्वरू

पेसंबंधो भवतिस्वरूपधर्मत्वमितिचेत्स एव दोषः अग्निस्वरूपस्यापि धूमेन एव संयोगः। अथ स्वरूपैकनिमित्तकः संबं
३४ धः स्वाभाविकः वह्निस्तु धूमसंबंधे स्वरूपातिरिक्तोर्द्रेन्धनादिरस्त्येव हेतुः धूमस्य वह्निसंबंधे स्वरूपमेव निमित्तं न नि
34 मित्तांतरमस्तीति मतं। एवं तर्हि न प्रत्यक्षगम्यं स्वाभाविकत्वं। न हि तेन निमित्तांतराभावः शक्यते प्रत्येतुं भावविषयत्वा
त्प्रत्यक्षस्य दृश्यादर्शनानुनिमित्तांतराभावः प्रतीयत इति प्रत्यक्षगम्यत्वानुपपत्तिः। अपि व धूमस्याग्निसंबंधेन स्वरू
पमेव निमित्तमग्न्यादीनामपि निमित्तत्वात्। तस्मात्स्वरूपाव्यभिचार एव स्वाभाविकत्वं। अव्यभिचारश्च सकलतद्देश
कालव्याप्तिरिति प्रत्यक्षगम्यत्वानुपपत्तिः तस्य वर्तमानविषयत्वादपि च स्वाभाविकतापि वर्तमानस्यैव सन्निहितस्य नि
श्चेतुं शक्यते नातीतानागतव्यवहितविप्रकृष्टानां संबंधानां संति हि वस्त्वोवह्निधूमसंबंधस्य व्यक्तयः कथं तासां स
५ र्वासां स्वरूपमेव निमित्तमिति संप्रयुक्तविषयेण प्रत्यक्षेणावगम्यते। अथ संबंधसामान्यस्य तन्निमित्तत्वेन तस्य नित्य
त्वेन निमित्ताभावादिदं च सकृद्दर्शनगम्यनियमपक्षेपि तुल्यमेव दूषणं। तत्रापि हि संप्रयुक्तस्यैव संयोगस्य धू
मस्वरूपनिमित्तत्वावगम्यते नातीतादीनां स च कालांतरेन स्य इति प्रत्यक्षावगतस्य संयोगस्य स्वरूपनिमित्तेन न का ३३
लांतरेनुमानं तस्मान्न कथंचित्प्रत्यक्षविषयत्वं नियमस्येति। अपरे त्वर्थापत्तिगम्यं नियमं मन्यंते यदेतत्सूतशा

ग्नो धूमदर्शनं अनग्नो च कचिदथ दर्शनं इद मसत्तिध मस्याग्निनानियमेनुपपन्नं अनियतो हि कदाचित्क चिद्विनाप्यग्निमु
पलभ्येतितिनैा तदप्यनुपपन्नं अदर्शनं तावदत्राभावादेवोपपन्नं नतु तावता सर्वत्रानग्नो नास्तीति शक्यमध्यवसातुं प्रमा
णाभावात् दर्शनमपि तत्र भावादेवोपपन्नं नतु तन्मात्रेण सर्वत्राग्नावस्येव धूम इति स्वं ध्यवमानं। तस्माद्वक्तव्यं
नियमे प्रमाणं। उच्यते किमत्र वक्तव्यं। यतः। स्वयं वार्त्तिककारेण प्रमाणमजदर्शितं। भूयोदर्शनगम्या हि व्याप्ति
रित्यभिधानतः। अनृजवो हि पूर्वे मार्गा महान्तः क्लेशमाश्रित्यानुभवानारूढा वैयात्यमात्रेणागतिकागतिन्यायेनाश्रि
ताः नियतो धूमोयं नूनमग्निनेति ऊहरूपस्य ज्ञानस्य संविदिरूढप्रत्यक्षत्वात् अपराम स्ति वायमज्जमीर्गो भूयोदर्शनग
म्यो नियम इति। किं पुनरिदं भूयोदर्शनं नाम प्रमाणं नैकं किंचिन्नियमस्य वक्तुं शक्यते किंतु येनैव प्रत्यक्षादीनामन्य
तमेन लिंगस्य भूयः साहित्यं लिंगिना गम्यते तदेव विपक्षादर्शनसहायं नियमप्रमाणं। ननु भूयोभिर्दर्शनैः त
त्र तत्र साहित्यं गम्यते न तु सर्वत्रदर्शीनानां सर्वेषां स्वविषययैव मानादनं न प्रत्यक्षगम्यो हि मर्वत्र सहभावः स
जीवद्भिर्दुर्लभः। विपक्षादर्शनादपि प्रत्यासन्नेष्वेव विपक्षेषु परमभावो गम्यः ते सर्वे विपक्षव्यावृत्तिस्तु दुर्लभै
वदेशस्यादर्शनानावात्। अदर्शनमात्रेण चाभावासिद्धेः। तत्कथं नियमस्य सर्वदेशकालव्याप्तिरूपस्य भूयोदर्शनगम्य

त्वं एतच्च स्वयमेवाचार्येणाशंकितं । यदाह । अन्वयो हि प्रतिव्यार्थं व्यापकस्य न दृश्यते । अनंतेन हि तत्संभवेत सर्वस्य त्वादिज
३५ न्मनेति । तथानाभावेन विपक्षाद्धि हेत्वभावः प्रतीयत इति च । सर्वविपक्षाभावो न लभ्यत इत्यर्थः । अत्र च समर्थ
35 नमुक्तं तत्रास्या दृष्टिमात्रेणागमकः सहचारिणा इति तत्रेति विपक्ष इत्यर्थः ॥ एतदुक्तं भवति मा नाम सर्वविपक्षा
भावो लिंगस्य से त्सीत्व अदर्शनं तु विपक्षेषु लिंगस्यात्स्येव तावता च सहचारी दृष्टो धूमादिः सहचारिणोऽग्न्यादेर्ग
मको भवति । यत्तु सहचारित्वमपि सर्वत्र दुर्लभं द्रष्टुमित्युक्तं । तत्राप्युत्तरमुक्तं । दुर्लभं सहचारित्वं सर्वत्रेति यदुच्यते
। द्रष्टुं मा नाम सर्वत्र वह्नित्रयोर्ज्ञायते धूमवं । साहित्ये मितदेशात्वात्प्रसिद्धे वह्निधूमयोः व्यतिरेकस्य चादृष्टेर्गमकत्वं प्र
कल्प्यते । इति । अयमर्थः मा नाम सर्वत्र सहचारित्वं दर्शि वह्नित्रयोस्तु प्रदेशयोरीषत्करं दर्शनं तावता चासति व्य
भिचारदर्शने भवत्यनुमानं । यदि हि सकलदेशकालव्याप्तिरूपो नियमोऽनुमानांगमस्माभिरुपगम्येत ततः स्या
दुपालंभो न त्वेवमस्माभिरुच्यते किंतु यत्र यत्र धूमादिकं दृष्टं तत्र तत्र सर्वत्र नियमेनाग्न्यादिसाहित्यमन्वेषो चा ३५
दर्शनं इत्येतावदेवानुमानोदयेकारणमेतावतैव हि लौकिकानां धूमोऽग्निं गमयति न तु सकलसपक्षविपक्षा
न्वयव्यतिरेकावगतिमपेक्षते येन दुर्लभं प्रमाणं स्यात् ते तत सकलदेशकालापेक्षया नियमाभिधानमपि तर्हि

दृश्यमानेषुदेशकालेषुयोल्लिंगस्यलिंगिसाहित्यनियमःसएवनियमइत्युच्यतेतन्मात्रमेवानुमानांगं।तच्चभूयोभिरेवदर्श-
नैःसुगममितिनाप्रमाणकंयथाहमहत्वदृष्टिमात्रेणागमकःसहचारिणाइति।कियद्भिःपुनःसाहित्यदर्शनैरनुमानेका-
नामेनतत्संचष्टेयावद्भिर्दृश्यतेतावद्भिरेवननुसंख्यायवक्तुंशक्यतेयेपिभूयोदर्शनसहायप्रत्यक्षगम्यंनियममाहुः।ये-
पिसकृद्दर्शनेपिगृह्यतेनियमेउपाध्याशंकानिराकरणार्थमर्थयंतेभूयोदर्शनंतेपिनैवंसंचक्षतेतथावयमयीति
नकश्चिद्विशेषः।किमिदानींसकलधूमदेशव्यापित्वमग्नेर्नावगंतव्यमनुमित्सता।सत्यंनावगंतव्यं।नचैवंसामा-
न्यतोथज्ञातसंबंधःपक्षैकदेशाकथमिवज्ञातसंबंधपदेनाभिधीयते।नानेनपक्षैकदेशिनोभिधानंअपितुदृष्टां-
तैकदेशिनः।तदयंभाव्यार्थःअन्यस्मिन्नेवमहानसाद्येकदेशेनिधूमाग्न्येकदेशाभ्यांज्ञातसंबंधेसतितदेकदे-
शंधूममन्यत्रपर्वतादौतस्मिन्नेववामहानसेकालांतरेदृष्ट्वाग्निरनुमीयते।लोकेतथादर्शनात्।तथाचज्ञातसंबंध-
पदेनज्ञातुर्निर्देशइत्युक्त्वाअथवानप्रमातुःकिंतुप्रमेयस्यकस्यचिन्निर्देशोनज्ञातुरित्यर्थः।कस्यप्रमेयस्यैकदेशि-
नःइत्यपेक्षायांदृष्टांतैकदेशिनइत्युक्तं॥ ॥यथाह॥ ॥एकदेशस्यएकदेशाभ्यांकश्चिद्वेत्तिज्ञातसंगतिः।तन्तुल्योन्यः
सवाताभ्यांविभागेनानुमीयतइति।सवाताभ्यामितिकालांतराभिप्रायं।एवंचवदन्ज्ञातसंबंधपदेनैकदेशस्यन्य-

न्या॰पू॰ पदार्थपक्षे दृष्टांतैकदेशिनोभिधानमिति आह। भवतु नामैवं यथा दृष्टप्रदेशे धूमसाहित्यनियमादेवानुमानं यस्त्वयं यत्र य
३६ त्र धूमस्तत्र तत्राग्निरिति भूयोदर्शनतोवगमः स कथं न त्वयेसो नास्ति नर्चैप्रमा[illegible]सर्वदा सर्वेषां दृढत्वेन जायमानत्वा णं
36 त्। तदयं कस्मिन्प्रमाणेंतर्भवतीति वक्तव्यं। उच्यते। अनुमानिकोयमवगमोज्ञातसंबंधस्योपजायमानत्वात्परोक्ष
रूपत्वाद्वा नैंद्रियकः साक्षात्कारित्वाभावात्संविद्विरोधाद्वा। धूमस्य हि बहुषु देशकालेष्वग्निना साहित्यमुपलब्धवतो भ
वत्यनुमानं। अन्येप्यतीतानागतव्यवहितविप्रकृष्टाः सर्व एव धूमवन्तोग्निमन्तो धूमवत्वात्परिदृष्टमहानसादिव
दिति। तेन यथा लोकं प्रमाणसामग्र्यनुसरणाद्धर्म्यंतरगतसाहित्यनियमादेव धर्म्यंतरेनुमानमित्यनवद्यं॥ ॥
आह च॥ ॥ तेन धर्म्यंतरे शेषायस्ययेनैव यादृशी। देशेयावति कालेवाव्याप्यतामाप्तिरूपिता। तस्यतावतितादृक्
स्यात् दृष्टो धर्म्यंतरे पुनः॥ व्याप्यांशो व्यापकांशस्तथैव प्रतिपाद्यते। यादृशा तादृशा शब्दाभ्यां दृष्टांतपरिदृष्टरूपान्यू
तनूपस्य न लिंगत्वं नापि लिंगित्वमिति दर्शितं। न हि विनाभूमत्वं पांडुरत्वमात्रेण कयोतादिभ्योग्निमनुमिमते लो ३६
किकाः। नाप्युष्णवह्निनियतः तृणविकारो दृष्टः प्रत्यक्षावगतशीतत्वविरोधाद्दोषप्रबाधेसत्यनुष्णमेव वह्निमनु
मापयति। यथा लोकं च प्रमाणगतिः परीक्षकैरनुसरणीया न तद्विरोधेन। तदनेन सर्वेषामप्रयोजकहेतूनामाभा

सत्त्वं दर्शितं। दृष्टान्तपरिदृष्टरूपान्न्यूनरूपो हेतुरप्रयोजकः स्यु[illegible]ते पक्षसपक्षसंबंधभेदमात्रं तु सोढव्यं सर्वानुमानेषु तथाद
र्शनात्तदतिरिक्तं तु रूपमविकलमेवाङ्गीकर्त्तव्यं। तेन निषिद्धत्वसहितस्य हिंसात्वस्याधर्मत्वेन साहित्यमुपलब्धं ब्राह्म
णहननादिष्विति विनापि निषिद्धत्वेन हिंसात्वमात्रादग्नीषोमीयहिंसाया अधर्मत्वं नानुमातुं शक्यं। निषिद्धत्वस्य विनापि
हिंसात्वेन गुर्वङ्गनागमनादौ अधर्मत्वसाहित्यं दृष्टमिति तदनुमापकं। यथाध्यापनादिकार्येव ततः शिष्यस्य सकृदुपाध्या
यसाहित्यमवगतमिति न शिष्यमात्रेणोपाध्यायानुमानं। तथा देवदत्ततनयानां श्यामत्वसाहित्यं गर्भपरिणामसमयो
पयुक्ताशितपानादिविशेषनिमित्तमिति तदभावे देवदत्ततनयत्वमात्रेणानन्तरतनयान्तरस्य श्यामत्वानुमानमेतेन
संनिवेशविशिष्टतया तनुतरुमहीधरादीनां घटादिवदुपलब्धिमत्कर्तृत्वानुमानं प्रत्युक्तं। तथा हि। येषु स्वहस्तादिव्या
पारविशेषेण सन्निवेशः शक्यं तेन च यितुं तेषामेव घटपटगृहादीनामुपलब्धिमत्कर्तृकत्वं तदभावे पारिणामिका
नामङ्गदेहादीनां संनिवेशविशेषमात्रेण कथं तदनुमानं पाण्डुरमात्रादिव वह्न्यनुमानं। तथा शरीरेन्द्रियादियुक्तबु
द्धिमत्कर्तृकत्वेन साहित्यं सन्निवेशविशिष्टानामुपलब्धं तच्च दृश्यादर्शनान्न दूर्वाङ्कुरादिषु निषिद्धं तस्मिन्निषिद्धे
बुद्धिमन्मात्रं शरीरादिरहितं नानुमातुं शक्यं। तृणादिविकारादिव हिमेनुस्मवन्ह्यनुमानं। न चैवं सर्वानुमानोच्छे

न्या॰पू॰ ३७

37

दृष्टसंसर्गः सर्वविशेषपरिहारेण धूमत्वसामान्यस्य वह्निसामान्येन साहित्यमवगतं पर्वते च तदविकलमेव दृष्टं इति युक्तं त
त्र तदनुमानं सामान्यमेवानुमीयते न विशेषः अननुगतत्वाभावात्। अवगतमपि महानसादौ सामान्यं देशान्तरकालान्तरा
दौ अप्रत्यक्षत्वेनानुमानेन प्रत्यभिज्ञायमानं भवति प्रमेयमिति न सिद्धसाध्यता। सामान्यस्यापि चास्त्येव संयुक्तसमवा
यसंबंधः पर्वतेनेति युक्तं तत्र तस्यानुमानं। ननु देशविशेषादपि पदार्थस्वरूपमन्यथा भवति क्वचिद्धि वृश्चिकदंश
दपि मरणं भवति क्वचिन्न। तथाऽस्य मस्यापि देशान्तरे वह्निव्यभिचारशंका भवेत्। सत्यमेषा भवति। सा तु तत्र देशागते
ष्फः ष्फत्वाशक्यतेनिरसितुमिति सर्वमवदातं। तेन यस्य यादृशस्य सामान्यस्य वा येन यादृ× विशेषस्य × शेन सा
मान्येन विशेषेण वा यथा दृष्टेषु देशकालेषु साहित्यं येन केनापि संबंधेन नियतमुपलब्धं तदेव तादृशमेव देशान्तर
कालान्तरादौ दृष्टं तस्य तादृशस्य साहित्यनियमादेव बोधकं भवति दृष्टप्रदेशेषु भूयोभिरेव दर्शने व्यभिचारादर्श
नमात्रसहायैः साहित्यनियमः शक्यावगम इति सिद्धं नियमनरूप एव लिंगस्य लिंगिना संबंधः स च भूयोदर्शनप्र
माणक इति॥ ॥पार्थसारथिमिश्रेण वार्त्तिकोक्त्यनुसारतः। यथाप्रतीति निर्णीतो नियमः सप्रमाणकः॥ ॥इति
पार्थसारथिमिश्रविरचितायां न्यायरत्नमालायां व्याप्तिवादः समाप्तः॥ ॥ॐ वाक्यार्थसंविदो मुलं वहुधा वादि ३७

नोविदुः। तत्र वार्त्तिककारीये न्याय्यो मार्गः प्रदर्श्यते। तत्र केचित्तावदविभागमेव वाक्यं व्यंजकध्वनिभेदात्तेन तेन वर्णपद
विपर्यासात्मनावगम्यमानं तस्य तस्य वाक्यार्थस्य प्रतिपादकमिति मन्यंते। अन्ये त्वेवंविधमेव ज्ञानं वाक्यं तदनंतरं चा
नेकजातिगुणद्रव्यक्रियावभासं विज्ञानमेव वाक्यार्थः। कार्यकारणभाव एव च वाक्यवाक्यार्थयोः संबंध इति प्रतिजान
ते। उभयस्मिन्नपि पक्षे काल्पनिकपदपदार्थसंबंधकल्पनानिरभ्युपायः। अपरे तु पदवद्वाक्यमपि पूर्वपूर्ववर्णसंस्कार
सचिवांत्यो वाचक इत्यादिना मार्गेणासावयमेव प्रतिलब्धसंबंधावयवस्मृतपदजनितपदार्थसंविदुपायं वाक्यार्थस्य
वाचकं संगिरंते। यदान्यैव पदार्थांतराचितस्वार्थमभिदधतीति टीकाकारपादाः पदैरभिहिताः पदार्था एव वाक्यार्थं प्र
तिपादयंतीत्याचार्याः। तत्र ज्ञानात्मकवाक्यवाक्यार्थवादस्तावत्स्वात्मनि क्रियाविरोधात् बहिरवभासाच्च शून्यवा
द एव निरस्तः। पदपदार्थव्यतिरेकाव्यतिरेकविकल्पस्याप्यनेकान्तवादाश्रयणेन परिहारः। वाक्यं हि नाम एकविशि
ष्टार्थप्रतिपादनपराणि पदान्येव। वाक्यार्थोपि पदार्थ एवैकोर्थांतरस्थितिषक्तात्मेति। यद्यपि नात्यंतं भेदो भेदो वा
शक्यते भिधातुं तथाप्यवांतरस्थित्युपपत्तेर्नैव हि भूतौ तौ शक्येते अपह्नोतुं। निर्भागवाक्यवादोपि भागावगमादेवा
पास्तः। पदवदिति चेन्नासिद्धत्वात्। तत्रैतत्स्यात् यथैव वर्णात्मकभागावगमे सत्यर्थैकपदावभासादर्थप्रतिप

न्या.पू. न्तेश्च वर्णेभ्यो न पपद्यते भोगावगमस्य मिथ्यात्वान्निरवयवमेव पदं पदार्थस्य वाचकमाश्रितं तथा वाक्यमपि तत्रापि
३८ त्येकमिदं वाक्यमिति परामर्शोस्तीति स एव नानात्वं प्रतिक्षिपति। नानात्वैकत्वयोर्विरोधात्। वाक्यार्थप्रतिपत्ति
श्चानन्योपाया वाक्यमेव निर्भोगं कल्पयन्तीति। नैवं दृष्टान्तासिद्धेः। नहि नो वर्णातिरेकेणानवयवः पदात्मा विद्य
38 ते। यस्त्वेकमिदं पदमिति परामर्शः स बहूनामप्येकार्थप्रतिपत्तिनिमित्तः। भवन्ति हि बहूनामप्येककार्यनिबंध
नमेकत्वं। यथा सेनेति। यथा वा राजसूय इति। अत एवार्थैकत्वमजानतां नास्त्येकपदावमर्शः। प्रत्यक्षेणानुपदस्वरू
पमेकमनोपाधिकं संहितापाठमात्रेणाकृतयत्नानामितरेषां चानुपहतेन्द्रियाणां अविशेषेण प्रकाशेत। तन्न तावदे
कपदावभासाद्वर्णातिरिक्तपदसिद्धिः। प्रत्युतासत्त्वमेव तस्य योग्यानुपलब्ध्या निश्चीयते। न चार्थप्रतिपत्त्यापि पदम
न्यत्र सिध्यति। वर्णानन्तरजाता हि सा तत्कारणिकैव नः। यदा हि वर्णा एवाद्यधीगोचरा नान्यदिति स्थितं तदा तद
नन्तरं जायमानार्थप्रतिपत्तिः तन्निमित्तैव विज्ञायते। तत्त्वान्तरस्य तु प्रत्यक्षानुपलंभनिरस्तसद्भावस्य दूरापास्तमे ३८
व वाचकत्वं नान्यथानुपपत्त्यापि कल्पयितुं शक्यते तेन वर्णानामेवैकवक्तृच्चारणापादितनैरन्तर्याणां स्वरविशे
षभाजां संहतानामानुपूर्वीविशेषशालिनामनन्तरमर्थावगमदर्शनात्तादृशानामेवार्थाभिधायकत्वं निश्ची

यते। कथं पुनः क्रमवर्त्तिनां साहित्यं। अवान्तरव्यापारवशादिति ब्रूमः। पूर्वपूर्वो हि वर्णोऽपलभ्यमानः संस्कारापर
नामानमवान्तरव्यापारं जनयति तत्सहितश्चान्त्यो वर्णोऽर्थप्रतिपत्तिं जनयति। एवं तर्हि प्रतिवर्णं संस्कारा बहवः कल्पनी
याः स्युः तद्वरमेकमेव शब्दतत्त्वं कल्पितं॥ ॥नेत्याह॥ ॥न खलु प्रत्यक्षानुपलंभनिरस्तसत्त्वस्य तस्य सद्भावस्त्र
याभ्युपेयः। संस्कारस्तु दृष्टोपपत्त्या कल्प्यमानो नातीव ज्यामावहति। अनेकमपि हि दृष्टोपकारकं कल्पनीयं।
दृष्टविरुद्धं तु न किंचिदपि। यद्वानन्तरा क्रमसंस्कारान्तरपरिकल्पना। क्रमात्त एव स्मृतिहेतवः संस्कारास्त एवेत
पि। यदनुभवभाविता स्तत्रैव स्मृतिं जनयन्ति न त्वर्थान्तरप्रतिपत्तिमिति चेन्नैव तेषां स्मृतिभ्योऽन्यत्र व्यापारोऽभ्युपे
यते तामेव तु स्मृतिं जनयन्तोऽर्थप्रतिपत्तावप्युपायी भवन्ति। स्मृतानामेव वर्णानां वाचकत्वा। ननु अनुभववत्स्म
तयोऽपि वर्णेषु क्रमेण जायमाना न संभवन्त्यर्थप्रतिपत्तौ। अथ क्रमेणानुभूतानामपि युगपदेव स्मरणं। ततो यु
त्क्रमेणाप्युच्चारिता वाचकाः स्युः। तत्रापि स्मृतिहेतुसंस्कारजननानुक्रममनादृत्य स्मरणस्य च सर्वेषु युग
पदुपपत्तेः। अथ नूच्चारणक्रमोऽर्थं गमिष्यति तथा सति सैवादृष्टकल्पना। संस्कारोऽपि स्मृतिहेतुः क्रमान्तरेऽपि जाय
त एव। तन्निमित्तं च स्मरणं। तत्र किमपरं क्रमविशेषेणाकार्यमित्यदृष्टकल्पना न चादृष्टमपि कल्पयितुं शक्यते। अन्तरे

न्या॰ पू॰ ३९

णापक्वायस्तां तत्क्रमं च स्मृत्यानूढाभ्यां जराराजशब्दाभ्यां नामाख्यातरूपाभ्यामर्थविशेषावगमः। यदि हि वर्ण एव पदं त
तो जराराजशब्दयोर्वर्णाभेदाभावादनुच्चारितावस्थायां चोच्चारणानन्तरमनुभवक्रमयोरविद्यमानत्वात्स्मरणस्यैक
स्यैव युगपदनेकवर्णगोचरस्योत्पद्यमानस्याक्रमत्वात्कुतः पदभेदावसायः। कुतस्तरां वार्थभेदावगमः। न च वर्णाः स्व
रूपेणानित्या विभवो देशकालोपाधिकं क्रममभजन्ते यद्वशात्पदभेदः स्यात् तदन्यदेव पदतत्त्वं यद्विलक्षणावभासं
बोधयतीति शब्दतत्त्वविदः प्रतिपन्नाः। अत्रोच्यते। व्यंजकध्वनिधर्मस्य व्यंग्ये ध्यारोपितस्य च॥ क्रमस्यार्थाभि
धांगत्वं देश्यादेश्च संमतं। यत्तावदक्रमेण स्मरणे युगपदनुभववत्संभूयकारित्वासंभव इति। तदसत् युगपदेव
नु सर्वेषु स्मरणमर्थान्तरेष्विव घटपटादिषु क्रमादनुभूतेष्वपि भवति। यत्त्वेवमक्रमे कथमर्थावगतिः स्यादिति।
तत्र। क्रमस्याप्यंगत्वाद्यद्यपि हि स्मरणस्य युगपज्जन्मनः क्रमो नास्ति वर्णेषु च विभुषु नित्येषु वस्तुतः क्रमो ना
स्ति तथापि व्यंजकानां ध्वनीनां क्रमवर्त्तित्वात्तैर्वर्णेष्वभिव्यज्यमानेषु तदीयः क्रमो व्यंग्येषु वर्णेषु दीर्घत्वादिवदप ३९
र्णास्यत्वमहत्वे इव मुखे समारोपितः प्रतीयते तत्स्मरणमपि पश्चाज्जातं विशिष्टानुपूर्वीसमालिंगितशरीरानेकवर्ण
गोचरयतीति क्रमभेदात्पदभेदः। एवमनुच्चारितावस्थायामपि स्मृत्यारूढेनैव क्रमविशेषेण जराराजशब्दयोर्भि

त्रपदत्वसिद्धिः। तेन ध्वनिधर्माणामेव दैर्घ्योदात्तक्रमादीनां वर्णेषु समारोपितानां स्मृत्यारूढानामर्थाभिधानांगत्वान्न किंचिद्
नुपपन्नं। आह च। तद्दर्शने न च वर्णानां व्याप्तित्वेपि क्रमग्रहः। एवं ध्वनिगुणान् सर्वान् नित्यत्वेन व्यवस्थिताः। वर्णा अनुपतंतः
स्युरर्थभेदाववोधिन इति। तत्सिद्धं न वर्णातिरिक्तमनवयवं पदमस्तीति। भागावगमादेव वाक्यमपि नानवयवं सिध्यतीति। क
थं तर्हि वाक्यार्थावगतिः। पदार्थवदिति ब्रूमः। यथा वर्णेभ्य एव संहितेभ्यः पदार्थोवगम्यते तथा तेभ्य एव वाक्यार्थोपि।
तत्प्रतिपत्त्येककार्यकरणाच्चैव हवेपि वर्णा एकं वाक्यमुच्यते। आह। अये चैतेन वा वाक्यं स्वार्थसंगतिसंविदं परस्मिन्सर्वे
संवित्तिः पूर्वस्मिन्नतु कस्यचित्। यदि तावदगृहीतसंबंधमेव वाक्यं वाक्यार्थमभिदध्यात् ततः सर्वेषामेव वाक्यश्रावि
णां वाक्यार्थसंवित्तिः स्यात्। न चाव्युत्पन्नपदपदार्थसंगतीनां जायते। अथ तु पदवद्वाक्यमपि स्वार्थेन संबंधसंविदम
पेक्षते ततो पूर्ववाक्यश्रवणे न कस्यचिदपि वाक्यार्थप्रत्ययः स्यात्। अपि पदपदार्थसंगतिप्रतिपत्तिरंगं वाक्याद्वाक्या
र्थप्रतीताविस्युच्यते॥ ॥तदप्युक्तं॥ ॥यदि हि वाक्यात्मवर्णाः पूर्वपूर्ववर्णजनितसंस्कारसहिताः स्मृत्यारूढा वा व
र्णाः पदार्थेभ्योर्थान्तरमभिदधति तर्हि पदपदार्थसंगतिसंवित्तिरत्र कमिवोपकारं कुर्यात्। पदार्थज्ञानमिति चेत् न
तेनाप्युपकारादर्शनात्। न हि वाक्याद्वाक्यार्थावगतौ पदजनितपदार्थज्ञानेन कश्चिदुपकारः। कोपि नाम कल्प्यतद्

भिचेत्। न त्वेवं दृष्टकल्पने वदोषः। किं चाल्पैरेव पदैः शतशो वापोद्धापभेदेन बहूनि वाक्यानीहरय्यंते। तत्र सर्वेषामेव शक्तिकल्प
नामहान्क्लेशः। न च वाक्यार्थप्रतिपत्तेरनुपपत्तिः यत इमां वेदनामनुभवेम। लोकसिद्धार्थाभिधायिभिः पदैरेव तदुप
पपत्तेः। कथं पुनस्तैरपूर्ववाक्यार्थावगतिः। तत्र टीकाकारस्तावदाह। पदार्था नैव वाक्यार्थं मिथः संगतिशालिनः। आ
चक्षते भिधीयंते पदैस्ते च तथाविधाः। पदार्था एव तावत्परस्परान्विता वाक्यार्थ इत्युच्यंते ते च तथाभूता एव स्वपदैर
भिधीयंते न तेन पदस्यैव वाक्यार्थस्य प्रमाणमिति न चार्थस्वरूपमेव पदाभिधेयं नान्वितमिति वाच्यं। पदानंतरजा ताहि
संविदन्वितगोचरा। अन्विताभिधायित्वं पदानामुपकल्पयेत्। विशिष्टार्थविषयदर्शनेन हि व्यवहरमाणस्य वि
शिष्टविषयैव कल्पिका संविदनुमीयते। सा च पदश्रवणानंतरं जायमाना तत्कारणिकैव निश्चीयते। यद्यपि
च पदसंघातानंतरं विशिष्टज्ञानं जायते तथापि न संघातात्मना वाक्यं वाक्यार्थस्याभिधायकं। अन्वयव्यतिरेका
भ्यां भागशस्तत्तु वाचकं। गामानय शुक्लामानयेत्यादौ गवादिपदावापे गवाद्यर्थावायात् तदुद्धापे चोद्धापाद्वाक्यभा ५०
गानामेव वाक्यार्थभागवाचकत्वावगमात् न संघातस्य वाचकत्वं वा भेच्च त्वं वा संभवति व्यभिचारात्। संबंध
ग्रहणासंभवाच्चानंत्याद्वाक्यवाक्यार्थानां न संगत्यवगमः संभवति। भवत्यदेवाकथमनंतानामेकपदाभिधे

यत्वं।अन्विताभिधायि हि पदं।अन्यच्च गवान्वितादानयनादश्वान्वितमानयनं।तत्कथमत्र संबंधग्रहणं।अव
भिचारो वा।तदुच्यते॥संनिध्यपेक्षायोग्यत्वरूपलक्षणाल्लाभतः।आनंत्येऽप्यन्वितानामस्यात्संबंधग्रहणं मम।आकां
क्षितं सन्निहितं योग्यं च यदर्थांतरं तेनान्वितं स्वार्थमभिदधति पदानीति एकेनैवोपलक्षणेनानामपि वाच्यत्वं सुज्ञानमेवव्य नेतानार
व्यभिचारश्चान्यादृशे प्रयोगप्रतिपत्त्योरसंभवात्।संघातस्यापि तदर्थेनैव प्रकारेण संबंधग्रहणं संभवतीत्येषां प
दानां यदन्विताभिधायित्वं भवतेष्यते तत्पदसंघातस्तदर्थसंघातस्याभिधायक इति शक्यत एव संगतिरस्माभिर
वगंतुमिति न कश्चिद्विशेषः।सत्यमेतत्।शक्तिकल्पनागौरवात्तु नैतदुपपद्यते तदुक्तं।अन्विताभिधानमपि तल्ले
नुपपन्नं।गौरवादेवस्वरूपमात्रमेव तु लाघवात्पदानामभिधेयं वरमाश्रितं।तच्चान्वितप्रतिपत्तेर्निर्मूलत्वप्रसंगा
त्।न हि तस्या मूलांतरमुपलभ्यते।स्वरूपेणैव पदैरभिहिताः पदार्थाः परस्परव्यतिषक्तमात्मानं प्रतिपादयंती
ति चेत्।न।अदर्शनात्।प्रमाणांतरविज्ञातैः पदार्थैर्न हि शक्यते।वाक्यार्थवेदनं।शब्दप्रतीताः कारणं त्वथ।शक्तित्र
यं प्रकल्प्यस्यात्पदानामर्थगोचरा।अर्थानामन्विते शक्तिस्तदाधायकता पदे।न हि प्रमाणांतरावगतानां प्रतिल
ब्धाकांक्षादित्रयसहायानामपि व्यतिषंगप्रतिपादकत्वं दृश्यते।न हि देवदत्तमुपलभ्य कोस्यपितत्पेक्षमाणाः सन्निहि

तमपिमद्गुदत्तंयोगपमपिसहस्रेणाध्यवस्यतिपितरं॥ अथान्यत्राविदितमपिशब्दप्रतीतानामेवार्थानांअन्वितप्रति
पत्तिकरणत्वं कल्प्यतइतितेमतं। एवंतर्हिशक्तित्रयमदृष्टंकल्पितंस्यात्। पदानांतावत्पदार्थस्वरूपाभिधा
नशक्तिः अर्थानांचान्वितप्रतिपादनशक्तिः पदानांचपुनस्तद्युक्ताभिधायकत्वशक्तिरितिकल्पनागौरवमाहुरेके
वपदानामन्वितगोचराशक्तिरभ्युपगता। ननुत्वयान्वितगोचरंशक्तिद्वयंकल्पयितव्यंतत्कथमेकाशक्तिरित्युच्य
च्यते। सत्यमेतत्तथापित्रयकल्पनातोलाघवमस्त्येव। किंचानएवान्वयेशक्तिःकल्पयितव्या। एकैवतुशक्ति
रन्वितपर्यन्ताकल्प्यते। अतःकल्पनालाघवादन्विताभिधायित्वमेववरं। यद्यपिकथंचिच्छक्तिकल्पनास
मानाभवेत्। तथापिप्रथमावगतानामभ्युपेततात्पर्याणांचपदानामेवान्विताभिधायकत्वंयुक्तमेवांगीक
र्तुं। एवंचशाब्दत्वमपिवाक्यार्थस्यसमंजसंभविष्यति। इतरथाक्लिष्टंस्यात्। ननुसामान्यंपदार्थःतच्चना
तरेणविशेषमात्मानंलभतइतितद्विशेषमाक्षिपति। विशेषएवचवाक्यार्थइत्युच्यते। पदार्थस्वरूपंहिसर्वा ४१
वस्थानांसामान्यमन्वितताचास्यावस्थाविशेषइतिपदार्थएववाक्यार्थेप्रमाणमिति॥ ॥नैतद्युक्तं॥ ॥
यद्यपिसामान्यंविशेषमाक्षिपतितथापिकश्चिद्विशेषइत्येतावन्मात्रमाक्षिप्येतनियतैकविशेषविषया

क्षोपस्कदुर्लभ एव। प्रमाणाभावात्। तेन गामानयेति गवैवान्वितमानयनं न प्रतीयेत। सत्यप्युक्ते त्वाकांक्षाद्युपलक्ष
णाशालिनैवार्थान्तरेणान्वितं पदस्याभिधेयमिति युक्तं यद्गवान्वितमानयनं प्रतीयते गोहि स्वपदेन सन्निहितेनार्था
न्तरमिति नियतावगतिसिद्धिः। न च सन्निध्यपेक्षत्वे भवेदन्योन्यसंश्रयः। न केवलाभिधानेन स्मृत्यापि हि भवे
दसौ। न चैवं वाच्यं यदि सन्निहितेनार्थान्तरेणान्वितस्वार्थमभिधत्ते ततो गामानयेत्यत्र गोशब्देन तावत्स्वार्थोना
भिधातव्यः यावदानयतिनानेन स्वार्थो गोशब्देनानभिहितेन स्वार्थोभिधेयः स्यादिति व्यक्तमितरेतराश्रयमि
ति। न ह्येवरूपमभिधानसन्निहितेनैवार्थेनान्वितं शाब्देनाभिधेयं यतोयं दोषः स्यात् संनिधिमात्रस्य तदुप
लक्षणत्वात् संनिधेश्चान्तरेणाप्यभिधानं स्मृत्यापि संभवात् सर्वाणि हि पदानि प्राकृप्रतियोगिसन्निधेः निमि
त्तभूतमर्थं स्वरूपं स्मारयन्ति ततोन्यायावधारितवचनशक्तीति स्ववाक्यार्थमभिदधतीति न कश्चिद्दोषः। न
न्वसन्निहितेनापि नियोज्येनान्विताभिधानं विश्वजिदादौ दृष्टं। नात्र त्वध्याहारेण सन्निधिलाभान्न त्वेवं शब्द ए
व सन्निधिः तदुपलक्षणं। द्वारं द्वारं इत्यादौ अशब्दैरेव संवरणादिभिरन्विताभिधानस्य लोके दृष्टत्वात्। एवं त
र्हि प्रत्यक्षेण श्वेतसन्निहिते गौर्यानीयतामित्यत्र न मतिर्गवाश्वयोः उभयोरपि शब्दप्रत्यक्षाभ्यां सन्निहितत्वात्त्वत्र ग

न्या॰पू॰ वैवकेवलमन्वितमानयनमभिदध्यात्। सन्निध्ययेसात्योग्यत्वानामुभयत्राविशेषात्। नैषदोषः। गवान्वयेनैवानयतेराकां
४२ क्षोपरमादश्वान्वयेप्रमाणाभावात्कथमुभयोःसन्निधानेसतिगवैवनैराकांक्ष्यं नाश्वेननन्वेवं सतिविपर्ययः कस्मान्नभ
वति। अश्वेननैराकांक्ष्यात्र गवान्वयःसंभवतीति। नसंभवतिविपर्ययः। अश्वान्वयेगोपदस्याकांक्षानुपरमात्। न
नुतस्यापिप्रत्यक्षाद्यवगताभिः स्थित्यादिभिरेवक्रियाभिःआकांक्षाविरमेत्तेनप्रमाणान्तरेण। स्थितावश्वेचस
न्निहितेगोरानीयतामित्युक्तेगौस्तिष्ठत्वानीयतामश्वइतिवाक्यद्वयंप्रतीयेत। नत्वेकवाक्यत्वावगमात्। यावं
तिहिपदानिसंहत्यप्रयुज्यन्तेतावन्तांसतिसंभवेसंहत्यैकविशिष्टार्थप्रतिपत्तिपरत्वंलोकेदृष्टं। तच्चश्रुतयोरेवान्वयेनि
र्वहतीति। अन्यथावाध्येत। किंचैकेनैवान्वयेनोभयोराकांक्षोपरमसंभवेअनेकान्वयकल्पनमयुक्तं। गौरवात्।
तस्मात्पदान्येवान्विताभिधायीनिवाक्यार्थस्यप्रमाणमिति। अत्राभिधीयतेनैतन्मतमप्युपपत्तिमत्। अदृष्टकल्पनैत
स्मिन्मतेहिस्याद्गरीयसी। दृष्टबाधप्रसंगश्चतस्मादभिहितान्वयः। दृष्टानुगुण्यंतत्रस्यात्कल्पनाचलघीयसी। अन्वि ४२
ना ताभिधायित्वेहिपदानामवश्यमेवविशेषणाभूतोऽन्वयोभिधातव्यः। अन्यथाचिन्तप्रतीतेरुत्पन्नयोगात्। ततश्चाव
याचितशक्तिद्वयकल्पनाददृष्टकल्पनागुरुतरास्यात्। ननुउक्तंनपृथगन्वयेशक्तिःकल्प्यते। एकैवहिसान्वितपर्यं

नाकल्प्यत इति ॥ तदप्युक्तं ॥ शक्त्यैकया कथं हि स्यादुभयोरभिधेयता । एक एव विशिष्टोऽर्थः सत्यमन्यद्विशेषणं ॥ यद्यपि हि
विशिष्टरूपोऽर्थ एक एव तथापि विशिष्टाद्विशेषणमन्यदेव तस्मिन्नगृहीते न तद्विशिष्टं ग्रहीतुं शक्यते । न च नस्य प्रमाणां
तरं ग्राहकमस्तीति शब्देनैव तदभिधानपुरःसरं विशिष्टमभिधातव्यमिति शक्तिद्वयकल्पनाज्ञोरेवं स्यात् तस्मात्स्वरूप
मात्रमेवाभिधातव्यमिति यदुक्तं । न चैवं वाक्यार्थप्रत्ययस्यानुपपत्तिः । यतः स्यात्स्वरूपाभिधानेऽपि धीर्विशिष्टार्थगोचरा । विशे
षधीर्हि सामान्यादनाया सेन सिध्यति । सर्वावस्थासामान्यात्मनि पदार्थस्वरूपे पदेनाभिहिते तेन तेन एवान्वितरूपावस्थावि
शेषप्रतीतिसिद्धेर्न तावदभिधाशक्तिरूपं कल्पयितुं शक्यते । यच्चैवं सति गोरानीयतामित्यत्र कारकेण क्रियया च क्रिया
कारकमात्राक्षेपान्नियमेन गोरानयनेनानयनं च गवा च यं लभेतेत्युक्तं तत्रोच्यते । तुल्योऽभिधानपक्षेऽपि स दोषः शब्द
गोचरः । यत्तु तत्रैकवाक्यत्वं पदार्थेष्वपि तत्समं । योऽप्यभिधानिकमन्वयमिच्छति तस्यापि तुल्योऽयं दोषः प्रमाणान्तरेण
क्रियान्तरे स्थित्यादिके कारकान्तरे चाश्वादिके सन्निहिते सति गोरानीयतामित्येतत्पदद्वयमुच्चारितं संनिधापयेत्तद्योग्यता
नामविशेषात् स्थित्युचितां गामानयनं चाश्वोचितमभिदध्यात् । न नियमेन गवानयनान्वयसिद्धिरिति । तत्र यदुक्तं तथा
सत्येकवाक्यत्वं बाध्येतेति । तत्पदार्थेष्वपि समानं । यद्यपि गोपदार्थेन क्रियामात्राच्च यत्राक्षिप्यते । आनयत्यर्थेनापि कारक

न्या·पू·
४३
43

मात्रान्वयः। तथापि तत्प्रतिपादकयोः पदयोरेकविशिष्टार्थप्रतीतिपरत्वलक्षणैकवाक्यत्वावगमात्तन्माबाधीति श्रुतयोरे
व परस्परनियमः। यत एव चायं नियमः पदांतरसमभिव्याहारात्मकाद्वाक्यादेव सिध्यति न पदार्थसामर्थ्यमात्राद् अत एव श
ब्दस्य प्रमाणांतरत्वमन्यथानुमानं स्यात्तेन पदार्थसामर्थ्याद् नियमेनानेकवाक्यार्थपरिप्लवे सत्यथ सत्यामपि च वाक्या
र्थे विशेषव्याप्तौ परस्परसमभिव्याहारादेव विशिष्टवाक्यार्थावगतिसिद्धिः। आह च। तत्रानैकांतिकानेकवाक्यार्थोपप्लवे
मति। अन्योन्यात्मव्यवच्छेदादेकत्रस्था यत्ते मतिः। अतोऽन्वयातिरेकाभ्यामनुमानेयदिष्यते। ऐकार्थ्यैकांतिकत्वं तदन्य
थैवात्र लभ्यत इति। यदनुमाने व्याप्तेः फलमेकार्थनिर्णयलक्षणं तदत्रान्यत एव पदांतरसमभिव्याहारलक्षणाद्वाक्या
त् सिध्यतीत्यर्थः। तेनैतदुक्तं भवति। उभयोरपि वादिनोरनेकसाधारणाचित्तप्रतिपादकशक्तिरेकवाक्यतयामि
थो नियम्यत इत्येतावदवश्यं कल्पनीयं तिव प्रमाणांतरेणाक्षियांतरे सन्निहिते पदांतरेणाचानयने गोपदमा
कांत्वाद्यविशेषादुभयाचितगोप्रतिपादनसमर्थमथानयत्येकवाक्यतयातदचितमेव स्वार्थमभिधत्त इति क ४३
ल्प्यं। मम तु गोपदार्थस्वभावादेवयेनकेनचिदचितं स्वात्मानं प्रतिपादयितुं समर्थः पदांतरैकवाक्यतयातदर्था
न्वितमेवात्मानं प्रतिपादयतीति कल्पयामि त्येतावदावयोस्तुल्यत्वं। पदस्यानुभवान्विशिष्टशक्तिं कल्पयति।

वयंतु स्वरूपमात्र इति महान्विशेषः। अपेक्षाभावाददोष इति चेत्। न। सत्यामप्यदर्शनात्। स्यादेतत्। न वयं साधारणीपद
शक्तिरेकवाक्यतया नियम्यत इति कल्पयामः। कथं तर्ह्यर्थांतरेणान्विताभिधानं न भवत्यपेक्षाभावात्। सात्वन्विताभिधा
नोपलक्षणं। नच प्रमाणांतरप्रतीतयोः क्रियाकारकयोरपेक्षा विद्यते। श्रुतयोस्त्वपेक्षा सा च परस्परसंबंधादपि निवर्त्तत इ
इति नार्थांतरान्वयप्रसंग इति। तन्नैवं। सत्यामप्यपेक्षायामन्वयादर्शनात्। भवति हि कदाचिदियमवस्था यदेकस्मिन्देशे हे
षादिशब्देनाश्वमनुमाय तस्य क्रियाविशेषं जिज्ञासते किमश्वो गच्छति तिष्ठति वेति। प्रदेशांतरे च पदनिक्षेपशब्देन
गतिमनुमाय कारकविशेषं जिज्ञासते किमत्र गौरश्वो वा गच्छतीति तस्यामवस्थायां गौस्तिष्ठतीति पदद्वयं कश्चित्
उच्चारयति। तत्र यद्येकवाक्यत्वं नियामकं नेष्यते ततो हेषादिशब्दानुमितस्याश्वस्य क्रियाविशेषापेक्षत्वात् तिष्ठ
तीतिपदावगतायाः क्रियायाः कारकविशेषापेक्षत्वात् परस्परान्वयः स्यात् तिष्ठत्यश्व इति। तथा पदनिक्षेपशब्दानुमित
स्य गमनस्य कारकापेक्षत्वाद्गोपदावगतायाश्च गोः क्रियापेक्षत्वादन्योन्यान्वयः स्यात् गौर्गच्छतीति न नियमेन गौस्ति
ष्ठतीत्यन्वयः सिध्येत्। सन्निध्यपेक्षायोग्यत्वानामविशेषात्। न चैवं दृश्यते॥ न च पदसामर्थ्यमेव पदांतरस्मारितान्वित
स्वार्थविषयावबोधनाय व्यवस्थापकमिति वक्तव्यं। अशाब्देऽप्यन्विताभिधानस्येष्टत्वात्। तस्मान्न पदसामर्थ्यान्निय

मसिद्धिः। अत एकवाक्यतैव शरणमर्थेनाप्यनियतैकान्वयबोधनाय पदैरर्थचिताभिधायिभिः। साच पदार्थैरपि स्वभावसिद्धा
न्वयबोधनसामर्थ्यैस्तन्नियमायापेक्षितुं शक्यत इति कृतमन्विताभिधानपरिकल्पनव्यसनेन। किंच। धव खदिरावित्यादि
षु युगपद्धिरसौ द्वंद्व इत्यभ्युपगमाद्वाचकत्वानभ्युपगमाच्च अश्वकर्णखदिरौ द्विवचनान्वयाय सद्वितीयमात्मानं ल
क्षयति। नाभिधत्ते। येन केनापि सद्वितीयस्य तदन्वयोपपत्तौ किमिति धवसद्वितीयमेवात्मानं लक्षयति तत्तदेकवा
क्यत्वादिति चेत्। न हि तदेव सर्वत्र पदार्थानामन्वितात्मलक्षणायां कारणं भवतीति न कदाचिदलक्षकल्पनं॥
यद्यपि तुल्यैव शक्तिकल्पना स्यात्तथापि पदार्था एव वाक्यार्थे प्रमाणं युक्तमंगीकर्तुं न पदान्यानंतर्यव्यवधानाभ्या
मन्विताभिधानवादेपि हि पदैः पदार्थेष्ववगतेषु पश्चाद्वाक्यार्थज्ञानं जायते॥ अन्यथा सन्निधेर्दुर्लभत्वात्। ते तु तैर
भिहिताः स्मारिता वा इत्यत्र विवादः सर्वथा तावत्पदग्रहणानंतरं पदार्थेषु प्रतीतेषु वाक्यार्थावगतिरित्यविवादं त
तश्चानंतरानुभूतपदार्थातिक्रमेण व्यवहितानि पदानि न युक्तं यद्वाक्यार्थावगतेः कारणं भवंतीति कल्पयितुं। न ४४
च पुनः पदानुसंधानमस्तीति किंचन प्रमाणमस्ति। किंच। दीर्घतमेषु वाक्येषु अशक्यमेवानुसंधानं असत्यपि
च तस्मिन्पदार्थानुसंधानमात्रेण वाक्यार्थः प्रतीयत इति सर्वजनीनमेतत्। तेन दृष्टानुगुण्यादपि पदार्थेनिमित्त

क एव वाक्यार्थो न पदनिमित्तः दृष्टबाधप्रसंगात्॥ ॥तदाह॥ ॥पदार्थानां च सामर्थ्याद्गम्यमानमपह्नुतं॥ आनंतर्याच्च
वाक्यार्थस्तद्धेतुत्वं न मुंचतीति॥ एतेन यत्पदानामेवान्विते सामर्थ्यमित्यत्र कारणमुक्तं प्राथम्यादिति तद्धि पर्यायसाधन
मिति वेदितव्यं। यत्तु तात्पर्यात्पदानामेव साक्षादन्वितप्रतिपादकत्वं युक्तमित्युक्तं। तत्काष्ठानामथनपेक्षितत्वाज्ज्वाला
नां पाकसाधनत्वमाग्नेयादीनां चान्तरितावांतरव्यापाराणां परमकार्यसाधनत्वमापादयेत्त्व॥ अथ तत्राग्नेयादि
स्वरूपेषु तिरोहितेषु जायमानं परमापूर्वं न तैः साक्षाज्जनयितुं शक्यते॥ तात्पर्ये चावांतरव्यापारद्वारेणापि साध
यतामविरुद्धमित्युच्यते तदत्रापि समानं॥ अत्रापि तिरोहितेष्वेव पदेषु पदार्थानुसंधानानंतरं अवगम्यमा
नस्य वाक्यार्थस्य पदार्था एव साक्षात्साधनं पदानि तु तद्द्वारेणैव साधनं न साक्षादिति॥ नन्वेवमभिधायकत्वं पदानां
न स्यात्॥ ॥पदार्थस्वरूपावगतेः स्मरणाद्विशिष्टत्वात्स्मारकत्वमेवास्तु नाभिधायकत्वं॥ ॥भवत्वेव
मिति केचित्तथा च भावमावचनस्तावत्तां स्मारयति लोकवत्॥ ॥पदमभ्यधिकाभावात्स्मारकान्न विशिष्यते॥ ते
पि नैवास्मृता यस्माद्वाक्यार्थं गमयंति नः। तस्मात्तत्स्मरणेष्वेव संगतेषु प्रमाणतेत्याहान्ये त्वाहुः प्रत्यासत्ति
निमित्तं स्मारकत्वं। न च यत्पदपदार्थयोः संयोगसमवायादिलक्षणा प्रत्यासत्तिरस्ति। यतः स्मारकत्वं स्यात्। वाचकत्व

यदीति चेन्न तस्य स्वाभाविकत्वात्। स्यादेतद्यथा संबंधांतराभावेपि वाचकत्वमेवं स्मारकत्वमपि भविष्यति। तन्नैवं स्वाभा
४५ विकत्वाद्वाचकत्वस्य प्रत्यायकत्वं हि वाचकत्वं तच्च स्वभावशक्त्या उपपन्नं च चक्षुरादीनामिव रूपादिषु। ननु तत्रापि संयो
ग गसंयुक्तसमवायतत्समवायलक्षणः संबंधो विद्यत एव॥ ॥सत्यं॥ ॥स तु रसादिसाधारणः। शक्तिरेव त्वसाधार
45 णी रूपप्रत्यायकत्वे निमित्तं। तद्वच्छब्दस्यापि स्वाभाविक्यैव शक्त्या प्रतिपादकत्वं भविष्यति। स्मारकत्वं तु संस्कारोद्बोधे
नान च संबंध्यर्थोतरादर्शनेनासावुद्बोधयितुं शक्यते क्वचिदपि। अदर्शनान्नानुप्रत्यायकत्वमथ संबंधिनो नैव
दृष्टं स्वाभाविकशक्तिशालिनामपि चक्षुरादीनां संबंध्येव प्रतिपादकत्वादन्यथा दविष्ठानामपि ग्रहणप्रसंगा
त्। शब्दस्य तु न कश्चिदर्थेन संबंधोस्ति तत्कथमस्य प्रत्यायकत्वं। अथान्यत्रादृष्टमपि तदिहैव कल्प्यते तर्हि स्मार
कत्वमेव किं न कल्प्यते वक्तव्यो वा विशेषः। सउच्यते। सर्वथा तावदन्यत्रासंबंधिनो दृष्टमपि स्मारकत्वं प्रत्यायकत्वं
चात्र शब्दस्य कल्प्यं तत्र प्रत्यायकत्वकल्पनमेव ज्यायः। शब्दानंतरमर्थप्रत्ययदर्शनात्तस्यैव तत्र कारणत्वं कल्प ४५
यितुं युक्तं॥ ननु शब्दात्संस्कारोद्बोधः ततस्त्वर्थप्रतीतिरिति युक्तं। प्रमाणांप्रमाणाभावात्। तस्मादभिधायकमेव
पदं। न स्मारकमिति। गृहीतग्राहित्वात् स्मरणमेव पदजनितं विज्ञानमिति चेन्न। तदसत्। अतल्लक्षणत्वात्।

नगृहीतग्राहित्वं लक्षणं स्मरणस्य किंतु संस्कारमात्रजन्यत्वं। प्रत्युत कारणजनितं तु यद्गृहीतग्राहिज्ञानं तदनुवादरू स
त्पूच्यते न स्मृतिरिति। कथं तर्हि वार्त्तिककारेणासत्यं घट एवानुवादस्यापि गृहीतग्राहित्वात्स्मरणाद्विशिष्टत्वाज्ञाव
नावचनस्ता वत्तां स्मारयति लोकवदित्यादिष्वौपचारिकः स्मरणव्यवहारः। तथा च पदमप्यधिकाभावात्स्मारकान्न
विशिष्यत इत्याह ननु स्मारकमिति दर्शयति नेनार्थस्वरूपमात्रेऽपि वाच्येऽभिधायकत्वं पदस्य युक्तमिति। प्राथम्यं का
रणं प्रत्युत हि पर्यायसाधनं येतात्पर्याभिधातृत्वे तेषां नैकान्तिकी कृतेत्युक्तिसंग्रहश्लोकः। किंच यद्यभिधानत एवा
न्वितप्रतीतिः कथं तर्हि गंगायां घोष इत्यादिषु लाक्षणिकस्य तीरादेर्घोषाद्यन्वितस्य प्रतिपत्तिः। न हि तत्स्वरूपमयि गं
गाशब्दस्याभिधेयं प्रागेवान्वितं। अथोच्येत। गंगाशब्देन निमित्तभूतेऽर्थस्वरूपे स्मारिते सति तेनायत्तं वं धात्स्मारितं
तीरस्वरूपं तेनान्वितं स्वार्थं घोषशब्दोऽभिधत्ते गंगाशब्दस्य तीरस्मरणमात्रोपयोगित्वात्। यत्र न तर्हि सर्वपदानामेव ला
क्षणिकार्थत्वं न कस्यचिदपि मुख्योऽर्थो विद्यते तत्र कथमचिदपि मुख्योऽर्थो विद्यते तत्र कथमन्वितप्रतिपत्तिः। अस्तिवातादृशं
वाक्यं सत्यं यत्र न विद्यते। कार्यं तदन्वितं वापि यथागथागच्छति भूमिपः। सर्वेषामेव पदानां कार्यं तदन्वितं वाभिधेयं
लिडादीनां कार्यमन्येषां तु तदन्वितं। यस्तु लोको कुतूहलप्रश्नप्रतिवचनरूपः सिद्धार्थविषयः शब्दप्रयोगः

कार्यभूम्योर्दृश्यते। यथा कोपं गच्छति भूमियोगच्छतीत्यादि। कवीनां चार्थविशेषवर्णनानुरूपः। यथा नीलोत्पलवनेष्वध
४६ चरंतश्चानुसंरब्धाः रामाः कौशेयसंवीताः कादंबा इव शोभनाः इत्यादि। सलाक्षणिक इति हि भवतां समयः। तत्रापि चाचि
तसंविदस्त्येव न चासौ पदहेतुहेतुमर्हति। तेषामतदभिधायकत्वान्न हि भूमिपशब्दस्य कार्योचितस्वार्थाभिधायित्वा
दाकांक्षादिरूपशालिनापि गच्छत्यर्थेनान्वितः स्वार्थोभिधेयः। तथा गच्छतेरपि तदन्वितो नभिधेय एवेति न पदनिमि
त्तान्वयप्रतीतिर्भवेत्। तेनावश्यं पदस्मारितनिमित्तभूतार्थस्वरूपाभ्यामेवाकांक्षायोग्यत्वैकवाक्यत्वसनाथाभ्यामि
यमन्वितसंविदुदयमासादयतीत्यकामेनाप्यनुज्ञातव्यं। ननु तस्य सर्वत्रैव तथात्वे किमन्विताभिधानकल्पनया। अथ
तत्रानुमानेन संविदन्वितगोचरा जायते न पदैर्नापि पदार्थैरिति मन्यसे। यथा सिद्धार्थेषु न पदनिमित्तवाक्यार्थसंवित्त
थापदार्थनिमित्तापि न भवति। किं त्वनुमाननिमित्ता वाक्यरचना हि पौरुषेयी विशिष्टार्थविवक्षापूर्विकातामनुमाप
यति सा चास्य कारणभूतं विशिष्टविज्ञानं तेन च विषयभूतार्थानुमानसिद्धो न सर्वपदार्थानामन्वितत्वप्रतिपादनमा ४६
मर्थ्यमुपकल्पयितुं शक्यत इति। यद्येवं। यत्रापि कार्यसंवित्तिः तत्राप्येवं प्रसज्यते। पदानामपि सामर्थ्यमन्विते तेन
सिध्यति। गामानयेत्यादिष्वपि त्वदुक्तयैव नीत्यानुमानपरंपरया विशिष्टकार्यावगतिसिद्धेर्न पदानामप्यन्विता

भिधायित्वं मुकल्प्यमिति॥ ॥अथोच्येत॥ ॥यदर्थविषयं वाक्यं तेनासावनुमीयते। नान्यस्तेनान्विते सिद्धे पदानां शक्ति
निर्णयः विशिष्टार्थविषयव्यवहारदर्शनेन हि व्यवहरमाणस्य तद्विषयमेव विज्ञानमुत्पन्नमित्यवश्यमंगीकर्तव्यं। न च
तद्वाक्यमात्रात्सिध्यति। किंतु विशिष्टवाक्यावगमात्। तस्य चार्थविशेषाभिधायित्वमेव विशेषः। विशिष्टार्थविषयवि
ज्ञानानुमानद्वारमर्थविशेषमनुमाय प्रयोज्यवृद्धो विशिष्टार्थव्यवहाराय घटते। नान्यथा तेनावशिष्टं पविशिष्टवाक्यार्थ
प्रतिपादकेन हि वाक्येन तद्विषयविवक्षां वक्तुरनुमापयता विशिष्टार्थप्रतिपादकत्वं वाक्यस्याभ्युपगन्तव्यं। तच्चान्वयव्य
तिरेकाभ्यामवयवश एवेति सिद्धं पदानामन्विताभिधायित्वमिति चेदेवं। सिद्धार्थेभ्योपि वाक्येभ्यो विशिष्टार्थावबोधना
त् पदानां चासमर्थत्वान् पदार्थानां निमित्तता सिद्धार्थेभ्योपि हि वाक्येभ्यः पार्थिवो गच्छतीत्यादिभ्यो राजगमनादिरूप
विशिष्टार्थविषयमेव विज्ञानमुपजायते न च वक्तुर्विशिष्टज्ञानानुमानाद्विशिष्टवाक्यरचनपाचनताद्ज्ञानानु
मानं। वाक्यस्य च विशेषः तदर्थप्रतिपादकतया स्यात्। नान्यथा तेन विशिष्टार्थप्रतिपादकत्वं वाक्यस्याभ्युपगन्तव्यं
। तत्र च पदानां कार्यान्वितस्वार्थाभिधायिनामतादृशसामर्थ्याभावान् पदार्थद्वारेणैव वाक्यस्य विशिष्टार्थप्रतिपाद
कत्वमभ्युपेतव्यं। पक्षश्चेतेनावश्यमन्वितप्रतिपादकेनैव वाक्येन तद्विषयविज्ञानानुमानमर्थविशेषस्मारकपद

संघातविशेषाद्देवविशिष्टानुमानलाभात्तथा हि द्वेदृशीव्याप्तिसंवित् । ये ये पदार्थानामितरेतरान्वययोग्यानां प्रति
४७ 47 पादकानि पदानि आप्तः समुच्चारयति तस्य तेषामन्वये ज्ञानमस्तीति । एवं चान्तरेणापि पदार्थानामन्वितप्रतिपादक
कत्वं पदविशेषरचनयैव ज्ञानानुमानद्वारेणासिद्धार्थेषु वाक्येषु विशिष्टवाक्यार्थानुमानसंभवात् न पदार्थनिमि
त्तत्वं वाक्यार्थस्य सिध्यतीति । एवं तर्हि । कार्यार्थेष्वपि वाक्येष्वेवमेव प्रसिध्यति । वाक्यार्थवेदनं तेन न सिध्ये
दन्वितार्थतैतार्थता । गामानयेत्यादिवाक्येष्वपि पदानां पदार्थस्वरूपाभिधायकत्वमात्रेणापि विशिष्टज्ञानानुमा
नपुरस्सरं विशिष्टवाक्यार्थानुमानसंभवात् नान्विताभिधायित्वं सिध्येत् । विनाप्यन्विताभिधायित्वं स्वरूपाभि
धायित्वमात्रेणापि येषां पदार्थस्वरूपाणामन्वययोग्यानामभिधायकानि पदानि येनाप्तेनोच्चारितानि स तद
न्वयविदितीदृश्येव व्याप्त्या विशिष्टज्ञानानुमानसंभवात् । किंच स्वरूपमात्रमपि नाभिधेयं पदविशेषस्येव वा
चकत्ववद्विशिष्टार्थविषयेणैव विज्ञानेन व्याप्तिग्रहणासंभवाद्यथा हि वाचकत्वं प्रतिपदमर्थविशेषं प्रतिग ४७
ह्यते गोपदं सास्नादिमतो वाचकं अश्वपदं वा तिवाचकमिति तथा तदन्वितार्थविज्ञानव्याप्तिस्तस्य पदस्य ग्रही पर्यवि
तुं शक्यते । आप्तस्य गोपदस्य नान्वितसन्निहितयोग्यार्थान्तरान्वितसास्नादिमद्विज्ञानपूर्विकेति । तत्र अपदा

नां।अर्थस्वरूपवाचित्वमपि नैवप्रसिध्यति। प्रागेवाचितत्वाचित्त्वमतो वेदप्रमाणता। न त्वयं पौरुषेयस्य वक्तृज्ञानानुमान
द्वारं वाक्यार्थप्रतिपादकत्वं वेदवाक्यस्य संभवतीत्यप्रामाण्यं स्यात्। स्यादेतत् शब्दश्रवणसमनंतरभाविनां प्रयोज्यवृद्ध
स्याचेष्टामुपलभ्य विशिष्टार्थविषयाप्रतीतिस्तस्य कल्प्यते सा च शब्दानंतर्यान्न त्वकारणिकेवेति शब्दस्य तद्वाचकशक्तिः
कल्प्यते। पश्चात्तु कस्य चिदयथार्थपदचेरनामुपलभ्य कथं व्यभिचारिणो वाक्यात्प्रयोज्यवृद्धस्यार्थनिश्चयः संजा
तइति विचिकित्स्यैवसवधारयति। नूनमनेनैवायं वक्तैवमवधारितः। नायमनवचितार्थो निपदानि प्रयुंक्ते। तेन नून
मेतेनैषामन्वयो ज्ञात इति ज्ञानानुमानपुरस्सरमर्थनिश्चितवानिति कल्पयति। पूर्वावगतं तु वाचकत्वं न मिथ्यामन्य
ते। तस्माद्स्तिवाचकत्वमिति निर्नेतत्सारं। न हि कार्यादतज्जन्याच्छक्तिः शब्दस्य कल्प्यते। स्यात्तु तज्जन्यताभ्रांते भ्रां
तिः सा च निवर्त्स्यति। न हि प्रयोज्यवृद्धस्य शब्दानंतरभाविनी प्रतीतिः शब्दजन्या यतस्य शक्तिं प्रकल्पयेत्। शब्दानु
मितवक्तृज्ञानलिंगजन्यत्वात्तच्चान्यतो निष्पन्नं कार्यमन्यस्य शक्तिं कल्पयति। अतिप्रसंगात्॥ यद्यपि च तस्यामव
स्थायामजन्यत्वानवधारणाच्छब्दानंतर्याच्छब्दजन्यत्वभ्रांत्या च गम्यशब्दस्य शक्तिभ्रांत्यावगम्यते तथापि पश्चाद
तज्जन्यत्वमवगत्य तज्जन्यत्वभ्रांतो निवृत्तायां तन्निमित्ता शक्तिभ्रांतिरपि निवर्त्स्यत एवेति धूमायमानहि

मजनितधूमध्वजविज्ञानवन्नद्धिस्वरूपेणाबाधितमपि लिंगबाधादेव निवर्त्तते। तथा शब्दस्यापि वाचकत्वकल्पना
५८ कार्यस्यातज्जन्यत्वावधारणान्निवर्त्तितुमर्हतीति। नन्वनुमितमर्थं पश्चादनुवदद्वाक्यं वाचकं शक्तं स्यात्। तन्नानुवा
48 दकत्वे प्रमाणाभावात्। नत्वनुवादकत्वमंतरेण किंचिदनुपपन्नं यतस्तत्कल्प्येत॥ शक्तत्वादनुवादकत्वमितिचेत्
तदितरेतराश्रयं शक्तेरनुवादत्वतश्च शक्तिरिति। तस्मात् न वाचकत्वं सिध्यति। यदि परमर्थविशेषविषयज्ञाना
नुमानसिद्धमर्थं पुनर्वाचकत्वमवस्थाप्येत। तच्चांतरेणापि वाचकत्वं शब्दविशेषस्य ज्ञानविशेषेणैव व्याप्तिग्रहण
संभवादनुपपन्नं। तस्माल्लौकवचसामनुमानत्वेन प्रामाण्यंगीकरणोपपदानां वाचकत्वायोगादप्रतिपादकत्वेना
प्रामाण्यं वेदस्यस्यादिति तत्प्रामाण्यप्रसिद्ध्यर्थं लोकेपि शब्दानां शब्दतयैव प्रामाण्यमभ्युपगंतव्यं। ननु माभूत्तस्य
प्रामाण्यं न तु तावता प्रमाणमंतरेण वाचकशक्तिकल्पयितुं शक्यते न हि किंचित्प्रमाणमस्ति यतः शब्दस्य वाचक
त्वं कल्प्येत तदभावेपि यथोक्तेन न्यायेनानुमानत एव लोके शब्दानंतरमर्थावगमसंभवात्स्यादेतदेवं यद्यास्तवाक्य ५८
श्रवणादेवार्थबुद्धेर्जन्म स्यात्। जन्म तु त्वपत्तुबुद्धीनामाप्तानामगिरां श्रुतौ। नचानाप्तोक्तिजातायां धीलिंगादुत्पत्तुम
र्हति। शब्दशक्तिरतः कल्प्या तदुत्पत्तिप्रसिद्धये। येत्वनाप्तोक्तितो बुद्धेरनुत्पत्तिं प्रचक्षते। लिंगत्वं चाप्तवाक्यस्य ते

षामेव तु दूषणं । एतावानेव भेदः स्यादाप्तानाप्तगिरां मम यन्नानाप्तोक्तिजातायाः प्रामाण्यं स्थाप्यते धियः । वक्तृदोषेणादुष्ट
त्वादाप्तोक्तेर्यानुजायते । प्रामाण्यं स्थाप्यते तत्तस्या वक्तृधीहेतुसंभवात् । वुद्धिजन्मोभयत्रापि विघटेतेतो न दूषणं । अनन्यम
नस्कानां नास्ति मितांतरात्मनां वक्तृधीविशेषं तस्य चाप्तानाप्तत्वमनाकलय्य तामेव यतः कुतश्चिदुच्चरंति पदानि सहसैव सं
विदमर्थगोचरामुत्पादयंतीति सर्वजनीनमेतत् । न च तत्रानुमानं संभवतीति शब्दानामेव वाचकशक्तिरवश्यं कल
नीया । तेन नास्माकं किंचिद्दूषणं । येतु सर्वजनसिद्धमर्थे तदपह्नुत्यानुमानत्वमेव लौकिकवचसां संगिरंते तेषामेव
वेदाप्रामाण्यमापद्यते । न ह्येतदुत्पन्नाद्वाक्यार्थविज्ञानाच्छब्दस्याभिधायकत्वं कल्पयितुं शक्यते प्रागेवान्विताभिधा
यित्वां असिद्धाच्चाद्यान्वितप्रतीतेः । न हि शब्दश्रवणानंतरं प्रयोज्यवृद्धस्यान्वितसंविदुदये किंचन प्रमाणमस्ति यद
न्वितार्थविषयता शब्दस्य सिद्ध्येत् । प्रमाणमनुमानं चेन्न तद्धेतोरदर्शनात् । अथ प्रवृत्तिर्लिंगं चेत्तन्नानैकांतिकी हि सा
स्यादेतदनुमाने न प्रयोज्यवृद्धस्यान्वितप्रतीतिरवगम्यत इति । तन्न । अनुमानस्य लिंगादर्शनात् । ननु प्रवृत्तिरेव लिंगं सा
हि विशिष्टावगतिपूर्विका तामनुमापयतीति । तन्नानैकांतिकत्वात्प्रवृत्तेः । सा हि भवन्मते शुक्तिकायामिव रजतार्थि
नो विवेकाग्रहणादपि सिध्यति । तेन गामानयेत्यत्र गोप्रातिपदिके न द्वितीयया धातुना विधिप्रत्ययेन च चतुर्थ्यर्थेषु

स्वतन्त्रमात्रेणाभिहितेषु पुनरनभिहितेषु च वचये नन्वयाग्रहणादेव प्रवृत्तिसिद्धेर्नोन्वितप्रतीतिः कल्पयितुं शक्यते यो हि रजत
४९ मिदमिति पुरःस्थितवस्तुगोचरां संविदमुदीयमानां साक्षात्कुर्वाणोपि लक्षणकारणानुपलब्ध्यापकृत्यात्पत्राह ष्ट
४९ मपि भेदाग्रहणस्य प्रवृत्तिहेतुत्वं स्वदृष्टकल्पनाविशेषेपि दोषसहितं द्वियादेरयथार्थज्ञानजनकत्वमवगत्य नु
सार्थं च कल्पयित्वा कल्पयति स कथं लक्षणप्रवृत्तिहेतुभावमेदाग्रहणादपि सिध्यंत्याप्रवृत्त्या सुट्टत्ये नैकांतिका
न्वितसंविदं परस्यानुमापयतः कारणत्वेन चान्यत्राक्लृप्तमपि शक्तस्य सामर्थ्यं कल्पयन्न लज्जते। यच्च स्वने भेदाग्रह
णानिबंधनव्यवहारस्य विसंवादो भवति यथा तस्यैव शुक्तिकायां रजतव्यवहारस्य न च गामानयेत्यादिषु विसंवादः
समस्ति तस्मान्नाग्रहणनिबंधन इति॥ ॥तदप्युक्तं॥ ॥अग्रहणनिबंधनस्यापि ह्यालेकत्वव्यवहारस्योह्यमज
नू लव्यवहारस्य चाविसंवाददर्शनात्त्वा। तथा। विधूमपावकादेशादूर्ध्वं बाष्पं विलोकयन्। अग्निमत्ताभिमानेन प्र
वृत्तो न विहन्यते। इदमपरमुदाहरणं। यदेकस्मिन्देशे विधूमाग्निरवस्थितः तस्य चोपरि वाष्पोद्गमो भवति तं च ४९
कश्चिद्धूमं मत्वा तस्याधस्तादग्निरस्तीत्यभिमन्यमानो ग्रथीनदाजिहार्षया पतमानो ग्निप्रतिलंभान्न विसंवादं ग
च्छति। तद्वत्तत्राग्रहणनिबंधनस्यापि व्यवहारस्याविसंवाददर्शनादनैकांतिको व्यवहाराविसंवादेनान्वितज्ञानो

त्पत्तिकल्पनायां प्रमाणं भवितुमर्हतीति। तदपरिकल्पनाच्च नान्वितार्थत्वं शब्दस्य सिध्यतीत्यप्रामाण्यं वेदस्य वाक्यार्थे प्रति
स्यात्। तदेवमन्वितज्ञानस्यासिद्धत्वात् सिद्धत्वेपि चस्वेपि न्वितस्य शब्दशक्तिमंतरेणोव वक्तृज्ञानानुमानद्वारेणात्मलाभसंभ
वात् वाक्यजन्यत्वेपि सिद्धार्थपरेष्विव वाक्येषु पदावगतपदार्थसामर्थ्यात् प्रत्तावितत्वसंभवात्तवन्मते तावदप्रमाणा
कं पदानामन्विताभिधायित्वमिति सिद्धं। अस्मन्मते तु यद्यप्यगृहणाधीनव्यवहारासंभवादनुमानत्वेन प्रामाण्यं नांगीक
रणात् सिद्धार्थेष्वपि वाक्येषु शब्दानां श्रुतिवृत्तत्वादित्यादिभिर्हेतुभिरन्विताभिधायित्वं निराकर्तुं न शक्यते तथापि दृ
ष्टबाधात्कल्पनागौरवाच्च तन्निरासः। कथं पुनः कल्पनागौरवमेतावती हि शक्तिर्भवतोन्विताभिधानमंगीकुर्वतः
कल्पनीया पदानामाकांक्षितं योग्यमेकवाक्यभूतपदप्रतीतं च यदर्थांतरं तेनान्वितं स्वार्थमभिदधति पदानीति न
चैवमध्याहृतैः संवरणादिभिर्द्वारादेरनयप्रसंगः। तत्रापि भवन्मते संव्रियतामित्यादिकस्य पदस्यैवैकवाक्यभूतस्या
ध्याहृतैः संवरणादिभिरन्वयसंभवात्। एतावती च पदार्थानामपि कल्पनीयैवेति तेसामर्थ्यं पदार्थानां स्वभावतः।
एकवाक्यतया तत्र कल्प्यं नियममात्रकं। अक्लृप्तमेकवर्थंशक्तिकल्पनागौरवमस्माकमिति॥ उच्यते॥ क्लृप्तम
न्विसामर्थ्यं पदानामन्वितेर्थे वाक्कल्प्यं स्वरूपक्लृप्तिश्च गुर्वी नियमकल्पनात्। पदानां तावत्पदार्थस्वरूपे शक्तिक

हारात्तत्प्रतिपा ३

ल्पनमुभयोरपि पक्षयोरविशिष्टमभिहितान्वयपक्षे पदार्थानामन्वितप्रतिपादत्वसामर्थ्यं क्लृप्तमेव। नियममात्रमे
५० कवाक्यतया कल्पयितव्यं। तच्च लघीयः पदानां त्वत्पक्षे क्लृप्तमेवान्वितप्रत्यायकत्वे कल्प्यं। तच्च गरीयः। दृष्टानु
50 गुणत्वं च प्रागेव समर्थितं। यत्तु सन्निध्यपेक्षयोग्यत्वाविशेषेपि प्रमाणान्तरावगतानामर्थानां नियतान्वयनिमित्तत्व
न दृष्टं। शाब्दावगतानां च तत्कल्पने शक्तित्रयकल्पनमित्युक्तं। तत्सन्निधिमात्रस्याङ्गतानङ्गीकरणात् परिहृतं। स्वा
भिधायकपदैकवाक्यभूतपदान्तराधीनो हि सन्निधिः पदार्थानां नियतैकान्वितबोधनेऽङ्गं न चासौ प्रमाणान्तरा
वगते घस्ताति न तत्र नियतैकवाक्यार्थावगतिः। यत एव चैकवाक्यभूतपदान्तराधीन एव सन्निधिः पदार्थानाम
न्वितबोधनेऽङ्गं न सन्निधिमात्रं अत एवापरिपूर्णेषु विश्वजिदादिवाक्येषु आकाङ्क्षितस्यार्थस्य शाब्दसन्निध्यर्थं श
ब्दस्यैव कल्पनाध्याहृतार्थोपनतेः शब्दगोचरत्वसिद्धिः। तथा चातिदिष्टेषु मन्त्रादिषु प्राकृताग्न्यादिपदेऽर्थलोपान्निवृ
त्ते निर्वापादिषु सूर्यादिपदस्याध्याहाराद्ऊहसिद्धिः। अन्यथासौ न स्यादित्यास्तां तावत्। यद्यपि पदानां पदार्थानां
चोभयेषामपि सामर्थ्यमपूर्वमेव कल्पयितव्यं तथापि पदार्थानामेव कल्पयितुं युक्तं। न पदानां तथा हि यत्र ताव ५०
देकं पदमेकश्च पदार्थः तत्रान्विताभिधानपक्षे पदस्य द्वे शक्ती कल्प्ये। अभिहितान्वयपक्षेपि पदस्यैका प

दार्थस्य चैकैकनिष्ठत्वेति तुल्यं। यत्राथैकशब्दस्यानेकेऽर्था वाच्याः यथाक्षशब्दस्य विदेवनादित्रयं। तत्राथचिन्ताभिधायित्वे
प्रत्यर्थं शब्दस्य शक्तिद्वयकल्पनात्षट् शक्तयः अभिहितान्वयेपि शब्दस्य प्रत्यर्थमेकैकशक्तिकल्पनात्तिस्रः। पदार्था
नां चत्रयाणां तिस्र इति षडेवेति तुल्यमेव॥ यत्र तु बहवः शब्दा एकस्यार्थस्य वाचकाः यथा पाणिकरहस्तशब्दाः। त
त्रान्विताभिधानपक्षे प्रतिशब्दं शक्तिद्वयकल्पनात् षट् शक्तयः स्युः। अभिहितान्वयपक्षे तु त्रयाणां शब्दानामर्थस्य
चैकैकशक्तिकल्पनाच्च तिस्र इति लाघवं। एवं चतुःपंचखंडादिषु शक्त्युपचयो दर्शयितव्यः। चतुर्षु त्र्याधिक्यं पंच
सु चतुष्काधिक्यं षट्सु पंचकाधिक्यमित्यूहनीयं। शक्तिकल्पनातुल्यत्वेपि चानंतर्यात्पदार्थानामेव वाक्यार्थनिमि
त्तत्वं युक्तं। न तु पदानामित्युक्तं। तस्मादभिहितान्वय एव ज्यायान्। तथा च सूत्रकारोऽर्थस्य तन्निमित्तत्वादिति व्यक्तमेव प
दार्थनिमित्तकत्वं वाक्यार्थस्य दर्शयति। भाष्यकारोपि त्वमूनि पदानि स्वमर्थमभिधाय निवृत्तव्यापाराणि। अथेदानीं
पदार्था अभिहिताः संतो वाक्यार्थमवबोधयंतीत्याह। यत्त्वस्य व्याख्यानं क्रियते व्यतिषक्ताभिधायि पदं न व्यतिषं
गाभिधायि व्यतिषक्तोवगतेर्व्यतिषंगस्येति तस्य तावदयमर्थः यथैवाकृत्या शब्देनाभिधीयमानया सह प्रतीय
माना व्यक्तिः शब्दजन्यप्रतीतिगोचरो थाकृतिगम्येत्युच्यते आकृतिप्रत्ययो हि व्यक्तिप्रत्ययस्य निमित्तमिति न हि

न्या॰पू॰ ५१ तत्राकृतिमात्रं शब्देनावगम्यते तया व्यक्तिरपीति युक्तं केवलाया जातेः प्रत्येतुमशक्यत्वात्। स्वभावः खल्वसावाकृ
तेः यदसौ नान्तरेण व्यक्तिं प्रतीतिमारोढुं क्षमते। रूपं हि सा[illegible]दिसो व्यक्तेः न च रूपशून्या रूपे बुद्धिरस्ति यादिस्या
51 त् रूपपत्तेव न स्यात्। तस्मात्सह व्यक्त्यैव जातिः प्रतीयते। अथ चाकृतिप्रत्ययो व्यक्तिप्रत्ययस्य निमित्तमित्युच्यते। त
त्कस्य हेतोः शब्दो हि स्वशक्त्या जातिमेवाभिधत्ते। तस्याश्च व्यक्तिमन्तरेण प्रत्याययितुमशक्यत्वात् व्यक्तिम
पि प्रत्याययतीति न स्वाभाविकं शब्दस्याकृतिप्रत्यायकत्वं तन्निमित्तं तु व्यक्तिप्रत्यायकत्वमित्याकृतिप्रत्य
यो व्यक्तिप्रत्ययस्य निमित्तमित्युच्यते। न तु शब्देन प्रथममवगताकृतिः पश्चाद्व्यक्तिमवबोधयतीति। तथाचि
ताभिधायिना शब्देनान्वयमन्तरेणान्वितस्यावबोधयितुमशक्यत्वात् न्यन्वयो वबोध्यमानः पदार्थे निमित्तक
इत्युच्यते। भाष्ये च पदार्थे शब्देनान्वित इत्युच्यते वाक्यार्थे शब्देनान्वयः। पदार्थाः वाक्यार्थमवबोधयन्तीति अन्विता
न्वयमवबोधयन्तीत्यर्थः। अन्वितप्रतिपादकत्वं निमित्तमन्वयप्रतिपादकत्वमिति यावत् इति। सेयं क्लिष्टेन ५१
मार्गेण ग्रन्थव्याख्या न शोभते। पदार्थानां हि वाक्यार्थे स्पष्टे ज्ञात्र निमित्तता। यच्चान्विताभिधायित्वं पदानां युक्ति
भिर्दृढं। क्लिष्टेनापि प्रकारेण ग्रंथव्याख्या ततो भवेत्। पदैरभिहिताः स्वार्था वाक्यार्थस्यावबोधकाः। प्रसाधि

नायशयुक्त्यानवद्येनेपोपपद्यते॥ अचितप्रतिपन्ने अनिमित्तंपूर्वयपत्तिणा। आत्तिसंतेनतन्मूलं भाष्येणानेनकथ्यते। अभ्यु
पेत्याचितेमूलंयदिस्यात्पूर्वयत्तिणा। आत्तिप्रमन्यचयेमूलंसमाधीयेनतत्वतः। नत्वेनंदव्याख्यानंनोपपद्यते।यत्तुव्यक्ति दक्षितेने
वदित्युक्तंतद्युक्तंनशब्दतः।व्यक्तिप्रतीतिरस्माकंजातिरेवतुशक्तितः। प्रथमावगताप अव्यक्तिंयांकांचिदाक्षिपेत्। जा
त्यभिधायीहिशब्दःतामेवबोधयतिनव्यक्तिंतत्रासमर्थत्वात्। असमर्थोव्यक्तौयोत्यन्तावतिप्रसंगात्। जात्यवगते
रपिअसमर्थोदेवोत्पत्तिसंभवात्। अथव्यक्तावपिशब्दस्यसामर्थ्यमस्तीत्युच्यते। तर्हिसाप्यभिधेयास्यात्। यदित्तुपत्रस्वा
भाविकीशक्तिःतदभिधेयं।जातिश्चतथा।तदभिधायकत्वनिमित्ताचव्यक्तौशक्तिरस्ति।ततोनासावभिधेयेत्युच्यते।त
दयुक्तं।प्रमाणाभावात्।यदितस्यार्थद्वयेपिशक्तिद्वयंशब्दस्यकल्प्यतेततः केनप्रमाणेनायमवांतरविभागोवग
म्यते स्वाभाविक्याहतोशक्तिःव्यक्तौतुतन्निबंधनेति। अथनव्यक्तौशब्दस्यशक्तिःकिंतुजातावेव।सातुशब्देनेवप्र
तीयमानावस्तस्वभावाद्यक्त्यासहप्रतीयतइत्युच्यते।तच्चान्न।व्यक्तिप्रतीतेःकारणाभावात्।अप्रतीयमानयाचत
यासहजातेःप्रत्येतुमशक्यत्वात्।कथंव्यक्तिप्रतीतेःकारणंनास्तीत्युच्यते शब्दस्याशक्तत्वेनाकारणत्वात्। जाति
प्रतीतेश्चततःपूर्वमनिष्पन्नत्वेनतत्कारणत्वायोगात्।तेनपूर्वावगतिर्जातेरंगीकर्त्तव्यानकेवलाप्रत्येतुंशक्यते।ए
नच्चसो १

वंनत्वेऽस्याप्रतीतिः प्रसज्येत। व्यक्तिस्तावत्तत्त्वायकाभावान्न प्रतीयते। तत्सर्वे चाप्रतीयमानायां न तया सह जातिः प्र
५२ त्येतुं शक्यते। केवला च न प्रतीयत इत्यप्रतीतिरेव जातेः स्यादिति। तस्माज्जातिरेव शब्दात्प्रतीयत इत्ययं गीकर्तव्यं। नृपि
52 शून्या च नृपे पुंबुद्धिरस्त्येव तद्यथा। हिमवत्तिनि हेमंतेषु त्ये संवित्वर्गि द्वियात्। तथा गंधवति द्रव्ये नासाग्रमधिरोह
ति। न द्रव्ये जायते संविद्गंधस्य वस्तु जायते। तस्माज्जात्यभिधायित्वात् शब्दस्तामेव बोधयेत्। सा तु शब्देन विज्ञाताप
श्चाद्व्यक्तिं प्रबोधयेत्। भवतु वा जातिमात्राभिधानशक्तेनापि शब्देनापर्यवसानादेवावगम्यमाना व्यक्तिर्न पृथक्शु
द्ध्शक्तिं प्रकल्पयतीति न चिह्नतत्तथा पृथक्शक्तिमंतरेणान्वयप्रतीत्यसंभवात्। जातिर्हि व्यक्तेरर्थान्तरत्वानुपायु
क्तं यत्तस्यामभिधीयमानायामपि न व्यक्तिरभिधानमनुप्रविशतीति। न हि व्यक्तिमंतरेण जातेर्नूपं येनाभिधेयानुप्रवे
शाद्व्यक्तेरर्थाभिधेयत्वं स्यात्। प्रत्युचितस्य त्वच्चयवस्यैव नूपमिति तस्मिन्नभिधीयमाने प्रत्ययस्याभिधानानुप्रवे ५२
शः स्यादेव तत्तत्रापि शक्तिः कल्पनीया। अथोचितशब्देन पदार्थस्वरूपमुपलक्ष्यते। तद्यानाभिधायाथ च यमभिधा
तुं शक्यत इत्युच्यते नितर्हि शब्देनाच यप्रतीतिसिद्धिः। न हि जातिवद्व्यक्तिमव्ययमंतरेण पदार्थस्वरूपमनिरूप्यं। ये
न तद पर्यवसानाच्छब्देन प्रत्याय्येत। ननु यथा जातिर्न व्यक्तिविकल्पं कांचिदुपयुगता तथापदार्थोऽपि न यति

षंगविकल्पाः क्वचिदुपलभ्यंते। अंततोऽस्यार्थेनापि सर्वत्र सर्वे पदार्था नामन्वितत्वं। तस्मात्तस्यार्थपर्यवसानादेव सिद्धेर्नो
भिधेयत्वमिति। सत्यं। अन्वयमात्रमपर्यवसानात् गम्यते। न हि विशेषस्कन्नांतरेणाभिधानं शाब्दी प्रतिपत्तिमारोहति। त
स्मादन्विताभिधायित्वे शब्दस्य शक्तिकल्पनागौरवात्स्वरूपमात्रमभिधेयं कथं तर्हि भाष्यकारेण प्रातिपदिकाद्दृष्ट
ऽन्तौ हि नीयाविभक्तिः प्रातिपदिकार्थो विशेषक इत्याहेति प्रत्ययस्यान्विताभिधायित्वमुच्यते। भवन्मतेनवा कथं सर्वशब्दाना
मन्विताभिधायित्वे सति विशेषेण प्रत्ययस्य तत्कथ्यते तेन ग्रंथानुगुण्याच्छब्दानां स्वरूपमात्राभिधायित्वं प्रत्यय
स्य त्वन्विताभिधायित्वमिति व्यवस्थार्थं। यद्वा अनेनान्विताभिधायित्वं प्रत्ययस्य नोच्यते। किं तर्हि प्रत्ययेन स्वार्थो।
भिधीयमानः प्रथमावगतप्रकृत्यर्थानुरक्त एवावगम्यत इति। अन्वयव्यतिरेकाभ्यां प्रकृतेः प्रत्ययस्य च स्वे स्वेऽर्थेऽनुरा
गांशे च प्रकृतिप्रत्ययसमभिव्याहारस्यैव निमित्तत्वं विविच्यते। यथा ग्रहणस्मरणात्मनि प्रत्यभिज्ञाने ग्रहणांशस्यें
द्रियनिमित्तत्वं स्मरणांशस्य च संस्कारनिमित्तत्वं यथा च वस्त्वंतराभावविशिष्टे वस्त्वंतरे ग्रहणमाणे विशेष्यस्य भावां
शस्य प्रत्यक्षादिविषयत्वं विशेषणस्य चाभावांशस्याभावविषयत्वं विविच्यते तथात्राथानुरागांशस्य प्रकृतिप्रत्ययस
मभिव्याहारादेव प्रतीतिसिद्धेर्न प्रत्ययस्य तदभिधायकत्वं। स तु स्वार्थमेवाभिधत्ते। आह च। प्रकृतिप्रत्ययौ ब्रूतः प्र

न्या॰पू॰ ५३ 53 त्वयार्थे सहेतिपत् । भेदेनैवाभिधानेपि प्राधानेऽप्राधान्ये न तदुच्यते । पाकं हि पचिरेवाह कर्त्तारं मत्वर्थीयो थकः । पाकयुक्तः
पुनः कर्त्ता वाच्यो नेकस्य कस्यचिदिति । मत्वर्थीयास्तु विशिष्टमेवाभिदधीत । न हि तेषां वाच्यांतरं निरूप्यते । हिरण्य
मालिनऋत्विज इत्यत्र विशेषणीभूताद्धिरण्यमाला तावन्मत्वर्थीयेनैवाभिहिता । ऋत्विजोपि विशेष्याः स्वशब्देनैवाम
तुप् किमभिदध्यात् । अन्यद्धि शिष्टात् । तदसौ विशिष्टाभिधाय्येवान्येषामतुपेषां युगपदनेकार्थाभिधायित्वं वि
भक्तेरिव लिंगसंख्याकारकाणां तेषामर्थ्यचितेनाभिधायित्वं एतच्च सर्व्वमेवमनिर्णय एव वक्ष्याम इति । इत्थंभेषां तु शब्दानां स्वा
र्थरूपमेवाभिधेयमचितत्रपरक्तवाक्यार्थः पदार्थेगम्य इति । अतएव वाक्यार्थो लाक्षणिक इति मीमांसकाः अभिहिता
र्थसंबंधादवगम्यमानत्वात् । न च विनाभावनिमित्ता लक्षणा न च पदार्थाः वाक्यार्थविशेषेणाविनाभूता इति स कथं
लक्ष्यते । नावश्यं अविनाभावनिमित्तैव लक्षणा । एकवाक्यतापि तत्र निमित्तं । अतएवासत्यप्यविनाभावे व्रीहीन
वहंतीत्यत्र दर्शपूर्णमासैकवाक्यतया तत्साधनत्वलक्षणोपपत्तिः । एकवाक्यता च कचित्प्रत्यक्षा यथा सोमेन
यजेतेति । क्वचित्प्रकरणाद्यनुमेया यथा दर्शपूर्णमासाभ्यां यजेत समिधो यजतीत्यनयोः समिदुपेता दर्शपूर्णमास ५३
भावनाकर्त्तव्येत्येवंरूपैकवाक्यता कल्प्यते । एवमन्यत्रापि द्रष्टव्यं । तस्मादवाक्यं न पदानि साक्षाद्वाक्यार्थबुद्धिं जन

यंति किं तु पदस्वरूपाभिहितैः पदार्थैः संलक्ष्यते सा वितिसिद्धमेतत्॥ ॥पार्थसारथिमिश्रैरानिर्णयोभिहिताश्चये। यथा
गमं यथाप्रज्ञं वार्त्तिकोक्तः पूर्वदर्शितः॥ ॥इत्थं वार्त्तिककारस्य विशेषः काम्यनित्ययोः। अंगसाकल्यवैकल्यलक्षणः प्रति
पाद्यते। केचित्किल नास्त्येव नित्यकाम्ययोर्वैषम्यमुभयत्रापि सकलांगोपसंहारादिति मन्यते। एकदेशिभिश्च कैश्चि
दनतिप्रयत्नेन दुर्बलहेत्वभिधानात्तेषामेव प्रसरः स्थिरीकृतः। उभयेषां निराकरणेन सम्यक् न्यायः प्रदर्श्यते। येन सिध्येत्स्फु
टो भेदः कर्मणोः काम्यनित्ययोः। तत्र पूर्वपक्षः अधिकारो हि सर्वत्र विनियोगानुसारतः। अन्यथा त्वनिवार्यो स्या
च्छूद्रादेरथ धिक्रिया। सर्वत्र न केवलं काम्ये अपितु नित्येपीत्यर्थः। यस्मिन् कर्मणि यदंगजातं श्रुत्यादिभिस्स्मृत्याचारेण
वचननामधेयचोदनालिंगनिमित्तातिदेशेन च प्रापितं न तदुपसंहारशक्तियुक्तस्यैव तत्राधिकार इति तिर्यगधिकर
णोस्यापितं। सामग्र्यधीनत्वात्फलसिद्धेरिति कर्त्तव्यतायुक्तस्यैव करणस्य प्रत्त्वात् समुच्चितानां चांगानामुपसंग्रह
णादन्यथात्वदृष्टविधदोषनिदानविकल्पापत्तेर्विकल्पितस्य चाननुष्ठेयत्वात्कुतो यथाशक्तिप्रयोगसिद्धिः। यदि च क
तिपयांगोपसंहारेपि फलसिद्धिः स्यात्काम्येपि स्यादविशेषात्। ननु यावज्जीवादिवाक्येषु निमित्तश्रुत्या तस्मिन्सत्यव
श्यकर्त्तव्यत्वावगमात्करणे च तद्विरोधात्तद्बलेनांगहीनस्यापि फलसाधनत्वावगमात्तथैवानुष्ठीयते। काम्ये

न्या॰ पू॰ त्वेवं विरोधाभावात्सर्व्वांगोपसंहारेणानुष्ठानमिति चेत्। न। निमित्तवशादवश्यकर्त्तव्यत्वमधिकारिणां एव सर्व्व
५४ शक्तियुक्तस्याधिकारी नान्यः। निमित्तवाक्ये सर्व्वेषामधिकारावगमात्तदनुसारेणांगोपसंहारः यो यावंतमुपसंह
54 र्त्तुं समर्थः तस्य तावद्भिरेव फलसिद्धिरिति पक्ष उच्यते। तर्हि काम्येपि स्वर्गकाममात्रस्याधिकारावगतेः तथैवानुष्ठानप्र
संगः यद्दि च निमित्तबलेनांगसंकोचः स्यात्ततः शूद्रस्यानाहिताग्नेराहिताग्नीनां च विद्याविरहितानां तदतिरिक्तां
गानुष्ठानशक्तिशालिनामप्यधिकारः स्यात्तस्मात्सर्व्वांगशक्तिरधिकारिविशेषणमिति। अत एव पंचमाध्या
यात्परमधिकारनिरूपणं शक्त्यपेक्षत्वादधिकारस्य शक्तेश्च शक्यरूपानुष्ठेयाधीननिरूपणत्वात्तस्य च अध्याय
पंचकेनावधारणात् तदुक्तं कार्येज्ञातेऽधिकारः स्यादिति। एतेन ज्ञाप्यज्ञापकभावसंबंधं निराकृत्यावसरलक्षण
मधिकारलक्षणस्याचक्षाणा निरस्ता वेदितव्याः तदुभयत्रापि सर्व्वांगोपसंहार इति। केचित्तु विषयीभावः करणीभा
वपूर्वकः। काम्येतेनांगसाकल्यमाहुर्नित्येविपर्ययं। कार्यं तावदपूर्व्वं प्रधानं वा कार्यं इति स्थितं। न च कृत्यधीनात्म ५४
लाभं कृतिश्चैवं विधेषु पुरुषप्रयत्न एव। स च चेतनं कर्त्तारमपेक्षतेनेतस्य च कर्तृत्वमधिकारापेक्षं यो हि मदर्थमि
दं कर्म्माहमत्र स्वामीति विजानाति स तदनुतिष्ठति नान्यः स चाधिकृत इत्युच्यते। अधिकारश्चैवं विधेषु नियो

ज्ञपतायेत्तः तद्धिकर्म्मैतस्यस्वंभवतियद्यस्यकार्यंसाधयतितेनममेदंकार्यमित्येवंकार्यंबोधयेत्सतत्साधनेकर्मणि
पुरुषस्याधिकारावगमः।पश्चकार्यंस्वकीयत्वेनबुध्यतेसनियोज्यः।नचापूर्वंकार्यंसुखदुःखपरिहारवत्कस्यचिदिच्छा
गोचरः।यतःप्रमाणांतरेणैव तदर्थिनः कार्यत्वागमात्तत्साधनेकर्म्मण्यधिकारःस्यात्।अतोवचनेनैवास्येदंकार्यं
मितिप्रतिपादयितव्यं।तदेवंनियोज्यापेक्षंकार्यं।सचानुपादेयविशेषणविशिष्टः।तच्चफलनिमित्तभेदेनद्विविधं।
तत्रफलमनुत्पन्नंनस्वरूपेणविशेषणंभवितुमर्हति।तिस्वकामनामुखेननियोज्यंविशिनष्टि।फलकामश्चसउच्य
तेयःफलमात्मनःसाधयितुमिच्छति।सचतदेवकार्यंबुध्यतेयत्स्वकामानुगुणमितिनियोगस्यफलानुकूल्यंप्रधानस्या
पिस्वसिध्यर्थंविशिष्टनियोज्यसंबंधार्थमास्थेयं।तच्चकार्यंप्रयत्नसंपाद्यंप्रयत्नस्यानवच्छिन्नस्यानिरूपणात्तदव
च्छेदकमपेक्षते।अवच्छेदकश्चप्रायेणभावार्थः।तस्यैवस्वरूपेणतत्संबंधित्वात्।नखल्वबलवत्पाकादिभावार्थ
विषयःप्रयत्नोलोकेदृश्यते।क्वचिच्चशब्दवशेनद्रव्यदेवतासंबंधादिर्भावार्थेनिर्वोढितप्रयत्नसंबंधोवच्छेदको
भवतितदेवंकार्यस्यकृत्यवच्छिन्नत्वात्कृतेश्चभावार्थाद्यवच्छेदकमंतरेणाप्रतीतेःकृतिप्रत्ययाकार्यस्य
भवतिभावार्थादिरवच्छेदकः।अवच्छेदकश्चविषयइत्युच्यतेप्रतीत्यनुबंधोहिविषयः।अनवच्छिन्नंचकार्यं

न्या॰ पू॰ ५५

55

प्रत्येतुमशक्यमितितदवच्छेदकं तत्प्रतीत्यनुबंधितयाभवतिविषयः। सचभावार्थः कामानुगुणस्य कार्यस्यविष
यभावात्पुरुषकृतकामोपायभावः शक्योधिगंतुमित्युपायत्वेनैवरूपेणविषयाभवतीति तदुपायता च निखिलांग
ग्रामसंपादितोपकारस्यैत्यंगानुषंगव्यतिक्रमेसमस्तांगजन्यांगोपकारस्यासंपत्तेनुपायत्वाभावेविषयत्वाभा
वाद्विषयिणोपिकार्यस्याप्रतीतेर्नैतद्वलेनदानागकर्म्मानुष्ठानंभवेत्। नित्येतुनायंप्रकारःसंभवति। नहित
त्रफलकामोनियोज्यः। येनानुपायं कार्यंकार्यतयानवुद्ध्येत। सिद्धविशेषणाविशिष्टस्यभावार्थावच्छिन्नमेव
कार्यंप्रथममवगच्छति। प्रतीतसविषयकार्यस्यकृतिंविनाकार्याभावात्कृतेश्चाकरणकाया असंभवात्करण
मपेक्षमाणः सन्निहितस्यभावार्थस्यविषयीभूतस्यकरणतामुपकल्पयति। कथंपुनः कृतिनिर्वर्त्य एवभावा
र्थस्तांप्रतिकरणमितिचेत्। तदवच्छिन्नायास्तस्यास्तदपूर्वविशेषकृतित्वात्तथाविधस्यचलोकेकरणत्वप्रसि
द्धेः। यथाछेत्तुरुद्यमननिपातनलक्षणायाक्रिययापरशुर्व्याप्यमानोपितामेवप्रतिकरणं। तद्विषयायास्तस्याद्वै ५५
धीभावफलत्वात्। नहिलोष्टविषयेउद्यमननिपातनेद्वैधीभावंफलतः। एवंयद्यपिकृत्याभावार्थोव्याप्यतेतथाप्य
पूर्वविशेषकृतित्वंतस्यास्तद्विषयत्वाधीनमितियुक्तएवकरणभावोभावार्थस्यापूर्वस्यतद्रूपत्वात्कार्यत्वात्। तदेवं

नित्ये विषयीभूतस्य भावार्थस्य पश्चात्करणात्त्वमिति कार्त्तन्यतासाहित्यं च तस्य प्रतीयत इति नांगत्वोपेऽपि विषयाभावस्ततश्च
विषयाधीनप्रतीतेः कार्यस्य विषयाविलयेऽप्यविलयात्तत्साधनेकर्मण्यपधिकारप्रतीतेस्तद्बलेन हीनांगकमपि कर्मानुष्ठा
पयति नियोगो वै कृत इव भस्यात्रानप्रतिषिद्धत्वे प्रार्थांगवातिरिक्तांगानुष्ठानमिति सिद्धः काम्यनित्यविशेषः। तदेतत्सापा
तकव्याख्यानं सूत्रमन्यैरपरद्व्याख्यानि पुराणानि तृथमारामारकूटायते। कथं फलस्य विप्रकृष्टत्वाद् पूर्वोनभिधानतः। त
त्साधान्यप्रहान्यैश्च विषयत्वोपपत्तितः। समप्रधानभावेन स्वरूपस्यानपायतः। अप्रयोजकभावेन जाने ष्टेश्च प्रसंगतः। वि
प्रकृष्टं हि परं नरोपात्तं फलं भावार्थस्य। सन्निकृष्टं तु स्वपदोपात्तमपूर्वं तत्र विप्रकृष्टेन प्रथमं साधनतयाचीर्यविप्रकृष्ट
तरैर्वाक्यान्तरोपात्तैरंगैः संबध्यत इत्युचितेन न्यूपेरा स्वपदप्रतिपाद्यमपूर्वं पश्चादवच्छिनत्तीति कः श्रुतिवाक्यबलाद
त्तद्ब्राभिद्धीत भयद्यपिकामोपायस्य कार्यस्य विषयीभवतो भावार्थस्य तत्साधनत्वमवश्यं भावितथापि नतत्प्रथ
मं निरूपयितव्यं। नहि येन विना यदुक्तं नोपपद्यते तन्निरूपणापुरस्सरमेव तदुक्तं प्रत्येतव्यं। प्रतिपन्नेऽपि वस्तुनि तदुपपा
दकं वस्तु पश्चादपि प्रतीयत एव धूम इव धूमध्वजस्तेन प्रथमं पदश्रुत्या भावार्थमात्रविषयमपूर्वं प्रतिपद्य पश्चात्त
लोपायभूतकार्यविषयत्वान्यथानुपपत्त्या तत्साधनभावस्तदुपपत्तये चांगान्चयः प्रतीयत इति नास्त्यंगत्वोपे विषय

विलोप इति। यद्यपि च विप्रकृष्टसमाराधकं चरमं निरूपणमपि साधकत्वमवश्यंभावीति कृत्वा विषयकोटौ निवेश्य तत
तो नित्येऽपि विषयीभवन्तस्तत्करणत्वाकश्यंभावादंशोऽपेतस्य च तत्त्वात्तथैव विषयत्वमित्यंगाभावे विषयविल
यः प्रसज्येत। नायस्तत्ववदतिनावश्यंपनित्ये नियोगविषयस्य तत्करणत्वमकरणभूतस्यापि नञर्थस्य नियोगविष
यत्वदर्शनादिति। सवक्तव्यः। कास्य नियोगविषयस्यापि नैकांतिकं फलकरणत्वं द्रव्यदेवतासंबंधस्याकरण
भूतस्यापि सोमयोदिवाक्येषु विषयत्वदर्शनादिति। स नैवमुक्तः प्रतिब्रूयात् करणभूतोऽपि द्रव्यदेवतासंबंधः
तद्विनाभूतस्तेन रूपेण विषय इति। प्रतिब्रूयादेनं एवं नञर्थस्यापि तद्विनाभूतस्य तेनैव रूपेण विषयत्वमिति
तुल्या चर्चो तस्माद्यथा नित्येषु भावार्थमात्रे विषयीभूते पश्चात्करणत्वमितिकर्तव्यतान्वयश्च प्रतीयते तथा का
म्येष्वपि। श्रुत्या भावार्थमात्रस्य विषयत्वे निरूपिते पश्चात्फलादिसंबंधो वाक्यादेः संप्रतीयते। एवंपरंतरोपा
दानलक्षणस्तावदेको विप्रकर्षः लक्षणानिमित्तश्चापरं। तथा हि। न स्वर्गकामशब्देन स्वर्गस्य साध्यत्वमभिधी
यते कामसंबंधात्तु स्वर्गस्य साध्यत्वमनुमीयते ततः स्वर्गसाधनत्वयोगस्य निरूपयितव्यमिति विप्रकर्षः यत्र च द्र
व्यदेवतासंबंधो नियोगविषयः तत्र तस्य करणत्वान्नमुपसंहारादकरणीभूतस्य विषयत्वानुपपत्तेरेवं वक्तव्यं॥ ५६

।करणीभूतयागसंपाद्यो द्रव्यदेवतासंबंधो नियोगस्य विषयः। अंगाभावे च करणीभूतयागाभावात्तत्संपाद्यद्रव्यदे-
वतासंबंधाभावेन विषयविलय इति। ततश्च द्रव्यदेवतासंबंधेन यागमनुमाय तस्य च करणत्वं परिकल्प्य तत्संपाद्यद्र-
व्यदेवतासंबंधस्य विषयत्वनिरूपणमिति विप्रकर्षो विश्वजिदादौ च यत्र फलकामो नियोज्यो न श्रूयते तत्र नियो-
ज्यं कल्पयित्वा तत्संबंधेन यागस्य करणत्वं परिकल्प्य तादृशस्य विषयत्वं निरूपयितव्यमित्यपि विप्रकर्षः किंच
तत्र नियोज्यपरिकल्पने निमित्तं न तावन्नियोगः तस्याप्रतिपन्नत्वात् न ह्यप्रतिपन्नं कल्पकं कल्पनाय कल्पते
।अप्रतिपन्नश्चात्र नियोगो विषयाभिनिरूपणात्। अविषयकार्यप्रतीत्यनुपपत्तेः। करणीभूतो हि यागो नियोगवि-
षयो न चाकल्पिते नियोज्ये फलकामे करणीभूतयागसिद्धिः तत्सिद्धौ च नियोगसिद्धिस्तत्सिद्धौ च नियोज्यसि-
द्धिस्तदधीना च करणीभूतयागसिद्धिरिति चक्रकमप्रतिष्ठितमापद्येत तेन तत्र प्रथमं भावार्थमात्रविषयमपू-
र्वं प्रतीत्य ततो नियोज्यत्वादिकल्पनमित्यगत्यापि विषयाविलयाद्यथाशक्तिप्रयोगप्रसंगः। किंच सोमादिषु साध
धनेषु स्ववाक्येषु श्रूयमाणेष्वपि तत्साध्यनिरूपणाविषयत्वमनभ्युपगम्य फलश्रवणाबलेन तत्साधननिरूपस्य वि-
षयत्वमिच्छद्भिः स्वदर्शनानुरागो नातिवाविःकृतः। कः खलु पदान्तरेभ्यः फलपदे विशेषः। तदधीनसिद्धित्वमिति

चेत्। न व्याघातात्। स्यादेतत्फलकामिनियोज्यत्वं एवं च फले न हि यागस्य तत्साधनत्वानुपपत्त्या तद्व्यतिरिक्तमपूर्वं सि
५८ ध्यत्तदानुकूल्येन सिध्यतीत्यवश्यं तद्विषयस्य तत्साधनत्वेन भवितव्यमित्यस्तित्रियदं तरेभ्यः फलपदस्य विशेषः
।तत्र व्याघाताद्यस्मात् तत्सिकस्य यागस्य फलसाधनत्वं नोपपद्यते तस्मात्फलकामीनतत्कार्येन यावुध्यते अ
57 पि तु फलसाधनभूतयागविषयमपूर्वं बुध्यत इति कथमिदं परस्परव्याहतं बुद्धिमन्तो मिदधीरन्। कश्चित्तु निपुणंम
न्यः प्रभाकरदर्शनं शिक्षयन्निदं व्रताख्यामुत्सृजति। नैव भावार्थस्य फलकरणभूतस्य विषयत्वं किंतर्हि फलका
मस्य यत्कार्ये तत्तत्सामग्र्यवच्छिन्नमेव तेन प्रत्येतव्यं सामग्री च करणेतिकर्त्तव्यतारूपा तेनेतिकर्त्तव्यतालोपे विष
यविलय इति। न चैवं यागस्याविषयत्वं। सामग्र्यावच्छिन्नस्यापि तद्विशेषापरिज्ञाने साकांक्षत्वात्तेन स्वपदावगतो
नियोगः पश्चाद्यागेनावच्छिद्यते न तु याग एव फलान्वितोवच्छेदक इति। नस्यापि तदस्मत्प्रथमे वक्ष्यमाणदंडोग्रसते
फलस्य विप्रकृष्टत्वादिति। न खलु पदान्तरोपात्तफलाविनाभावप्रतीतान्तसामग्रीस्वपदस्याद्यागात्पूर्वमेवापू ५८
र्वमवच्छेत्तुं पारयति। यथा न यागो पूर्वं विहाय फलेन प्रथमं संबध्यते तथा पूर्वमपि यागं विहाय फलसामग्र्यावि
प्रकर्षस्य तुल्यत्वादित्यलमनेन प्रसिद्ध एव मार्गे दूषणान्तरमुच्यते। यच्चिकरणीभूतो यागो विषयः ततोवि

योगस्य विषयाधीननिरूपणत्वाद् निरूपिते च विषये तदधीननिरूपणाशक्तेर्नियोगप्रतिपत्तेः पूर्वमेव फलसाधनत्वं
यागस्य निरूपयितव्यं। निरूपितफलकरणभावं च यागं फलकामी कार्यतया बोद्धुमलमेवेति न नियोज्यसंबंधानुपप
त्त्या क्रियातिरिक्तकार्याभिधानकल्पनाबीजं लिङादीनां सिद्ध्यतीति सर्वं भवदीयसिद्धान्तकोशसारभूतमपूर्वाभिधान
मुक्तन्न संकथं जातं सिद्धान्तु वाभिधानं न पुनः प्राधान्यं संभवति परार्थभूतभावार्थविषयत्वादंगप्रधानोत्यत्तिनियो
गवत्। यो हि साधिकारवाक्यप्रधानभूतकार्याभिधायित्वे नप्रज्ञातानामपि लिङादीनां प्रयाजादिवाक्येषु विनियु
क्तविषयतया प्राधान्यं विहाय लक्षणया गुणभूतकार्याभिधानमाश्रयति स कथमन्यत्राविदितप्रधानकार्याभिधा
नशक्तीनामेवाधिकारवाक्ये विनियुक्तविषयत्वे सत्यपि प्रधानकार्याभिधानमाश्रयेत्तेनापूर्वस्य प्राधान्यं विहा
यत इति। किं चोपपद्यत एव यागस्याकरणभूतस्यापि विषयत्वं नियोगो हि फलसाधनं तस्य यागः स्वरूपेणैव विषय
इति किं नोपपद्यते। उच्यते सत्यमपूर्वं फलसाधनं तत्तु न स्वरूपेणाकृतिगोचरः भावार्थगोचरया तु तया साध्यं। त
थैव च कृत्यान्तरगोचरया पूर्वद्वारेण फलमपि साध्यते तेनैकयैव कृत्यैकभावार्थगोचरयापूर्वं फलं च साध्यत इति अपू
र्वविषयस्य भावार्थस्य फलकरणत्वसवरूपं भावीति। सत्यमेवं किं त्वपूर्वकरणत्वनिरूपणापुरोधान एव सति फ

लकरणत्वमुक्तं भवति। तत्करणत्वं च विषयपुरःसरमिति विषयभूतस्य करणत्वप्रसंगः। अवश्यं चापू
५८ र्वकरणत्वपुरःसरमेव क्रियायाः फलकरणत्वं निरूपयितव्यं। अन्यथा कथं क्षणिकायास्तस्याः कालांतरभावि
निष्फलसाधनत्वसंभावना न च तत्र व्यापारो नाम संभूतो लब्धस्तु किमिति न संभवति। किमत्र व्यापारे लब्धे। किं तद
58 पूर्वं तत्वांतरं वा। तत्वांतरत्वे तावत्तत एव यागस्य करणत्वोपपत्तेर्दृष्टं जलांजल्यपूर्वं प्रसज्येत। अपूर्वे द्वा
रेण तु फलसाधनत्वं च अपूर्वसाधनत्वनिरूपणाधीननिरूपणं। तद्धि तस्य द्वारमुच्यते यद्येन स्वफलोद्देशात्प्र
वृत्तेननन्तिरूढार्थमंतरा साध्यते। तदेवं सत्यपि यज्ञकरणीभूतस्य विषयत्वमुच्यते ततः फलकरणत्वाधी
नं नियोगविषयत्वं तदधीनं च नियोगं प्रतिकरणत्वं तदधीनं च फलकरणत्वमिति चक्रकमापद्येत। किं
चैवमंगलोपे विषयविलयं ब्रुवाणः प्रष्टव्यः किमंगविशिष्टस्य विषयत्वं उत तदुपलक्षितस्येति। किंचा
तः यदि तावदंगविशिष्टस्य ततः सर्वेषामेव प्रयाजादीनामाग्नेयादीनां च समप्राधान्यं प्रसज्येत। गुणाधि ५८
कारवत्। यथा हि दधिविशिष्टहोमस्येंद्रियकामापूर्वसाधनत्वे दधिहोमयोरपि समप्राधान्यं न गुणप्रधा
नभावः। नेह तदिहापि स्यात्। अथांगोपलक्षितस्य यागस्वरूपस्य तस्य तर्हि पुरोडाशाद्युपलक्षितस्येवांतरा

त्वकालस्यांगलोपेपि एकपुरोडाशायामिवानपायान्नास्त्यंगलोपे विषयविलयः। किं चैवमपूर्वप्रयुक्तिरपूर्वेणग्रहणां
चांगानां न स्यात्। साधिकारो विधिः प्रतिपन्नः सन् स्वसन्निधिसमाम्नातान्प्रयाजादीनवघातादींश्च स्वानुवादशंकानि
रूढ्नियोगांतरविषयभावानुस्वार्थतया गृहीत्वा स्वगृहीत्वा स्वगृह्ये तेष्वेव व्रीह्यादिषु द्वारभूतेषु स्वरूपातिक्रमे यो
वत्स्वसाधनविशेषरूपे विनियुंक्ते। अंगसंबंधात्तु प्राग्विषयाभावेनाप्रतिपन्ने नियोगे सर्वमिदमजातपुत्रक्रीडनकमाप
घते। फलं करणं वा प्रयोजकं स्यादंगानामप्रयोजकभावेनेत्यस्यापरा व्याख्या। फलसाधनरूपेणाभावार्थे नियोगेन सं
बध्यमानेर्थाभिधानकर्मा चेत्यनेनन्यायेन तुषोपवापवत्कपालस्याप्रयोजकं सांगस्याप्यागस्यापूर्वं प्रसज्येत। न चेद
मेवकाम्येषु विधेरप्रयोजकत्वमत एव शेपनस्याविधेयत्वादनर्थत्वं। यद्धि विधिसिद्ध्यर्थमनुष्ठीयते यस्य विधिः स्व
सिद्ध्यर्थमनुष्ठानमाक्षिपति तद्धि धेयं नतु विधिसाधनमात्रं। काम्येषु तु फलततया वानुष्ठीयमानं कर्मा विधिमपि साध
यतीति न विधेयमिति। किमिदानीमंगे कथं प्रयोजको विशिष्यते। सांगस्य हि फलसाधनस्याविषयत्वोपगमे तादृशस्यै धि
वफलप्रयुक्तस्यापजीवनादप्रयोजको विधिरंगानामपि स्यात्। ततश्चाग्नीषोमीयहिंसा विधेयत्वाभावान्निषेधगोचरो न
र्थः स्यात्। अत्र कश्चिद्द्ध्ययात्यादेव माहमाभूदंगानां विधेयत्वं। न चैतावताग्नीषोमीयादेर्निषेधप्रसंगः। द्विविधस्यासंभा

पि निषेधस्यासंभावनीयत्वाद्धि यथा हि किंचित्फलोद्देशेनानुष्ठीयमानं कर्म्म निषिध्यते फलपर्यंतं वा साधनमात्रपर्य
वसानं वा तद्यथा सुखार्थं मदिरास्वादः प्रसक्तः एवं निषिध्यते । नानेन सुखमवाप्तव्यं अकार्यमेतत्साध्यं सुखमिति
५९ क्वचित्साधनत्वमात्रं निषिध्यते । तद्यथा रोगार्त्तस्तदुपशमार्थी तदपकारकं भेषजबुद्ध्या प्रवर्त्तमानो निषिध्यते
59 मैवं कार्षीर्नैरमस्योपशमसाधनमिति । तत्र न तावदग्नीषोमीये फलपर्यंतनिषेधसंभवः । स्वर्गस्य निरतिशयसु
न खरूपस्य कार्यत्वे सर्व्वजनविदितस्याकार्यत्वाभिधाने प्रमाणांतरविरोधप्रसंगात् । नापि साधनत्वनिषेधः वच
नविरोधात् तस्मान्न निषेध्यचमिति । तदिदमतितुछं न निराकरणमपि प्रयोजयति । यथा हि मदिरास्वादनं संपा
द्यं सुखं प्रमाणांतरेण कार्यं विदितमथ कार्यमुच्यते वचनेन न तथा स्वर्गसुखमपीति किमिति नोच्यते प्रमाणांतरं
हि त्तिप्रमेवाग्रहणात्तयाव्याख्यायते । तस्मादंगेषु प्रयोजकत्वमनिष्टमेव तच्चापद्येतांगविशिष्टस्य विषय
त्वे आह सत्यमंगविशिष्टस्य विषयत्वे समप्राधान्यमप्रयोजकत्वं च स्यान्न नु तद्धि शिष्टे विषयः करणीभूतस्य
विषयः तद्भावश्चांगलोपे लुप्यत इत्यंगलोपे विषयविलय इत्युच्यते न त्वंगोपेतस्यैव विषयत्वं तस्माददोष इति ५९
। नैतद्युक्तं । यद्यंगलोपे करणत्वं नास्ति नित्येपि तर्हि हीनांगस्य करणत्वं नास्तीत्यननुष्ठानं स्यात् । अथ तत्र वि

धिनायावदंगं प्रार्थ्यते तदुपेतस्यैव करणत्वं भवतीति तदितरत्रापि क्रियाङ्गिरंगैरूपेतस्य करणत्वं इत्यनवगमाद्धि धिनाग
हीतानामेवांगानां संग्रहणात् यावत्संगानि विधिनाप्रार्थ्यन्ते तदुपेतस्यैव करणत्वं भवतीति नास्त्यंगलोपे विषयविलयः।
किंच जातेष्टौ संवलिताधिकाराभ्युपगमात्करणीभूतस्यैव विषयत्वमिति न यथाशक्तिप्रयोगः स्यात्। तत्र श्वांगसंपत्त्यर्थमे
वोत्कर्षस्य वक्तुं शक्यत्वाच्छेषिविरोधेन निमित्तस्य भावमंगार्थमाधमधिकरणमनर्थकं स्यात्। ननु तत्र निमित्तश्रवणाव
लादंगहनं स्यादिति। श्रुतेपि निमित्ते विषयाभावे नाधिकारविलयात् श्रुतेपि हि निमित्ते नैमित्तिकमेव कर्तव्यं नान्यत्करण
भूतभावार्थविषयं तत्कार्यं नैमित्तिकमिति कुतो नीदृशस्यानुष्ठानमित्यलमनेन करणीभूतविषयत्वेन। तदेतत्सर्वं सि
द्धांतकोशसारं समुद्धरन्। को हि शंखनिधिं प्राज्ञः स्वगृहे स्थापयेत्स्वयं। तस्मात्सर्वत्र नित्ये काम्ये च निखिलांगोपसंहार
इति। अत्राभिधीयते निमित्तश्रवणान्नित्यं यथाशक्ति प्रयुज्यते। काम्यं तु तदभावे न निखिलांगसमन्वितं। इह हि या
वज्जीवमग्निहोत्रं जुहोतीति यावच्छब्दोपबंधाज्जीवनं होमनिमित्तत्वेनावगम्यते। निमित्तस्य चैतद्रूपं यत्तस्मिन्सति
नैमित्तिकं अवश्यं कार्यं। किमिदमवश्यं कार्यमिति अवश्यमेव कर्तारमभिमतेन फलेन योजयतीत्यर्थः। यथा चैतदेव कार्य
त्वं तथा प्रतिपादितं विधिविवेके। अत एवैषु सर्वेषामभिमतः प्रत्यवायपरिहारः प्रयोजनमवकल्प्यते। यदि ह्यन्यथाल

त्तरां फलं स्यात् ततः सर्वेषां फलसाधनत्वं श्रुतमुपरुध्येत ननु सर्वेषामभिमतः स्वर्गः किमिति न कल्प्यते। न तस्य मुमुक्षुभि
रप्रार्थितत्वात्। प्रत्यवायपरिहारस्तु तैरपि इष्यत एव कथं तर्हि स स्वर्गः स्यात् सर्वोत्प्रत्यविशिष्टत्वादिति। नन्वेवं सति विश्व
जित्यपि प्रत्यवायपरिहार एव फलं स्यात्। पापक्षयार्थस्य च नित्यत्वे विधुनैकत्रिकादीनामपि पापक्षयार्थानां नित्यत्वं
स्यात् तथा च यथाशक्ति प्रयोगः स्यादुच्यते न तावद्विश्वजितिप्रत्यवायपरिहारः फलं प्रसज्यते गौरवात्। प्रत्यवायो
दिनतावत्त्वरूपेण फलमपुरुषार्थत्वात्। न च तत्प्रागभावः तस्य स्वयमेव सिद्धत्वात्। न तत्प्रध्वंसः उत्पन्नस्य दुःख
स्य स्वयमेव विनाशात्। तेन प्रत्यवायहेतुभूतादृष्टप्रध्वंसः फलं कल्पयितव्यं। तत्रश्च प्रत्यवायावच्छिन्नं तद्धेतु
निरूप्य तदभावः फलं कल्पयितव्य इति गौरवं। सुखस्य तु स्वयमेव साध्यत्वं सुकल्पमिति लाघवं तेन सुखरूपेण ता
वत्साध्ये कल्पयितव्ये पशुपुत्रादिसुखविशेषापेक्षयानवच्छिन्नसुखरूपस्य स्वर्गस्य सर्वोत्प्रत्यविशिष्टत्वादिति विशे
ष उच्यते। ये पि जीवदधिकारप्रयुक्तिकल्पनाभयादनिस्वकामाधिकारमिच्छन्ति तैरपि प्रत्यवायनिवृत्तिकाममुत्सृ ६०
ज्य स्वर्गकामकल्पनेयमेव न्यायः समाश्रयितव्यः। विधंते हि तेषामपि दर्शनेशाद्यधिकरणसिद्धान्तात्केचित्प्रत्यवाय
करणनिषिद्धः अभ्युपगम्यैतदुच्यते। ननु जीवनेधिकारिविशेषणे किंचिन्न गौरवं। ननु निमित्ताधिकारे विधेः प्रयोजन

कत्वमपिकल्पयितव्यं।इतरत्रापिविधेःफलसाधनत्वंकल्पयितव्यमित्यविशेषःप्रत्युतप्रयोजकत्वमेवविधेःस्वाभावि
कमप्रयोजकत्वंत्वपवादः।किंचाख्यातार्थाविनाभावप्रतीतकर्तृत्वबलेनैवाजीवनस्तदनुपपत्तेर्जीवनंप्रतिपन्नेतस्याधि
कारिविशेषणत्वमेवकेवलंकल्प्यमितरत्रफलकामनास्वरूपमेवात्यंताप्रतिपन्नंकल्प्यमितिमहान्विशेषइतिप्रकृ
तमनुसरामः।नदेवंविश्वजितिनावत्स्वर्गःफलंयावज्जीवादिष्वावश्यकत्वात्यापत्त्यइत्युक्तंयत्तुवियुनादीनामथावश्य
कत्वंतत्फलत्वादितिनत्वावश्यकानांपायश्चित्तःफलमुच्यतेननतत्फलानामावश्यकत्वमिति।कःपुनरनयोर्विशेषः।अ
यमस्तिविशेषःयत्फलमवश्यमेवसाधयतितदावश्यकं।नैमित्तिकंचतथाविधनादितुनावश्यंकर्मफलंसाधयती
तिशास्त्रोक्तिनिमित्ताश्रवणात्फलंतुसर्वेषामिष्टंनामभवतु।फलसाधनत्वावश्यंभावश्चांगसंकोचनिमित्तमितिन
यथाशक्तिप्रयोगप्रसंगइतिगंभीरोयंन्यायमहार्णवः।आहकथंपुनरवश्यंभावादंगसंकोचइत्युच्यते।अवश्यमेवास्मि।
त्सतीदंकृतंफलंसाधयतीतिप्रतीयतेयदित्वंगलोपेनसाधयेत्अवश्यसाधनत्वंविरुध्येतनचाधिकारिणाकृतमव
श्यंसाधयतीतिवक्तव्यमितरथाशूद्रादिकृतमपिसाधयेत्।अकालेचसर्वांगशक्तश्चाधिकारीत्यन्यादृशेनकृत
मसाधनमिति।तदुच्यतेननावच्छक्तिरधिकारिविशेषणंश्रूयतेसाअनुष्ठानोपदेशान्यथानुपपत्त्या।शक्तस्यतदुपदेशा

संभवात्कल्प्यते। तत्र यावत्प्रयोगविधिना श्रुत्यार्थाद्यनुष्ठाप्यते तच्छक्तिरधिकारिविशेषणं। स च स्ववाक्यश्रुतनिमि
६१ त्ताविरोध्यंगमनुष्ठापयति। नित्यावैत्यंगानि यदनुष्ठातुं शक्यं तेतावंति तदनुष्ठापयति। न चैवमंगोपादानपरित्या
गाभ्यां वैरूप्यं प्रसज्यते। यथाशक्ति कुर्यादित्येवं विधेकरूपैवचोभंगोपाभयसिद्धेः। एतत्त्वप्रयोगविध्यनुष्ठाप्ये
61 ष्वंगेषूच्यते यद्धि कुर्यादित्युच्यते तद्यथाशक्त्येत्युपयवध्यते यानि तु स्वभावसिद्धानि विधेयंतरसिद्धानि चोपजी
व्यंते यथा लोके वर्जनादि। वेदकालो विद्याग्न्ययश्च तेषां स्वरूपयोगो वाधिकारिविशेषणत्वममावास्यासंबंधी द्रव्य
वान् विद्वानग्निमानिति। एतदुक्तं भवति। अंगं हि नाम विधिसंबंधादुपादीयते निमित्तानुरोधादित्युच्यते उ
भयानुग्रहार्थं वा शक्तं प्रत्युपादीयते अशक्तं प्रतित्यज्यत इति नान्या गतिरस्ति। तत्रोभयानुग्रहस्तावत्साधीया
न्यदि संभवेच्चोपादेयेष्वंगेषु यथाशक्ति व्रीह्यादीन्संपादयेद्यथाशक्त्याहवन्यादित्याहवनीयादिस्वरूपं तु नानेन वि
धिनोपादीयते। यद्यपि होमं प्रत्युपादीयते स्वरूपं तु नोपादीयते तत्र यद्याहिताग्निराहवनीये जुहुयादितर ६१
श्च यत्र कुत्रचिदिति विधीयते ततो वैरूप्यं प्रसज्येत। न च यथाशक्त्याहवनीयं संपाद्य जुहुयादित्युभयसाधारण्ये
नैन विधानं संभवत्याहवनीयादिसंपादनस्यान्यार्थोदपित्रीत्यादिसंपादनवद्विधानान्नेनाहवनीयमनाहिते
ति। संभव ४

वहोममात्रमनुष्ठाथेनाहवनीयवंतंवाधिकृत्याहवनीयेहोमः तत्रानादरेसत्याहवनीयविधेरत्यंतबाधप्रसंगाद्यावज्जी
वेशब्दस्यनदीयजीवनेपिकृतार्थत्वात् नात्यंतपीडाभावादग्निमाजीवनञ्जुहुयादित्येवमाश्रीयते। अनेनकालविद्याद
योव्याख्याताः। नित्येवमंगांतरेपिकिमितिजीवनंनोपसंक्रियतेनच्छक्तिमान् जीवन्नितिशब्दस्यापेक्षयाप्युपसंहारे तेषाम
बाधा त्यंतविरोधाबाधाभावात् तत्रनिमित्तं चांगानुरोधेनकिंचिदुत्पद्यते अंगानिवानिमित्तानुरोधेनेतिचिंतायांप्रधानत्वाकृ
स्यापि श्रुतत्वेननिमित्तंप्रथमंप्रधानमनुरुध्यप्रधानानुरोधेनांगानिसंबध्यन्ति। काम्येषुप्रधानमनिमित्तंवाकस्यकंश्चिद क्वचि
पिविरोधोनास्तीत्यंगान्यपेक्षितान्युपसंह्रियंतइतिनिखिलांगयुक्तस्यैवप्रयोगः नित्येतुयथोक्तेनन्यायेनविद्याग्निका
लआर्षेयवरणपरित्यागेनान्येषामंगानांयथाशक्त्युपसंहारइतिसिद्धः काम्यनित्यविशेषः। आह भवेदेवंयदिनि
मित्तानंतरमवश्यंनैमित्तिकेनभवितव्यंनतुतदस्ति। कारणपर्यायोहिनिमित्तशब्दोनचावश्यंकारणानिकार्यवंति।
सत्यपिहिकारणेसहकार्यपेक्षयाकार्यविलंबदर्शनात्तदुच्यते। कारणशब्दस्तावदनेकेष्वनेकविधेषुचभावेषुकार्य
जननंनिमित्तीकृत्यप्रवर्त्तमानोनतदन्तिवर्त्तितुमर्हतिनखलुम्रष्ब्रजंपुरुषंलगिरणामाचक्षते। यस्त्वकुर्वत्यपिमृ
त्पिंडेघटकारणव्यपदेशःसलक्षणायेतिदृष्टव्यंनचयावज्जीवादिशब्दस्यलक्षणाकारणमस्तीतिमुख्यमेवजीवनादि

न्या० पू०
६२
62

नांनिमित्तत्वंतादृशंचकार्याव्यभिचारीतिभवत्येवनैमित्तिकस्यावश्यंभावइतियुक्तएवौगसंकोचइति।यस्यनैमित्ति
कंकर्मविफलंतस्यतादृशिअनुष्ठानंकुतःसिद्धोयथाशक्तिकुतस्तरांकार्यस्यहिनफलापेक्षास्तिस्वयमेवकार्य
रूपत्वात्।विश्वजिदादावपिनफलापेक्षयास्वर्गःकल्प्यतेकिंतुकार्यस्यकृत्यधीनत्वात्कृतेश्चकर्तृत्वाधिकारप्र
णाडिकयानियोज्यापेक्षत्वात्तस्यचाविशिष्टस्यानुपपत्तेःतद्विशेषणापेक्षयास्वर्गःतद्विशेषणापेक्षयास्वर्गःतद्वि
शेषणेनयाकल्प्यतेनफलतया।तथाविधस्यचतस्यवादर्येधिकरणन्यायेनफलत्वंसंपत्स्यतेनैमित्तिकेषुतुनि
मित्तस्यैवनियोज्यविशेषणस्यलब्धत्वान्नतद्विशेषणतयाफलसिद्धिर्नचफलंनयानयेदितित्वाद्भावनायाहिवा
क्यार्थत्वेस्यात्।भाव्यापेक्षाभावनोपसर्जनस्यतुभाव्यरूपस्यापूर्वस्यवाक्यार्थत्वेनफलापेक्षासमस्तीतिनैमित्तिकं भावा
कर्मणोनुष्ठानमेवनसिद्ध्यतिप्रागेवतुयथाशक्त्यनुष्ठानं।कार्यावगमात्प्रवृत्तिर्नफलमपेक्षतइतिचेत्।न।।फलस्यवला
दतेकार्यत्वस्यैवासंभवात्कृतिप्रधानंहिकार्यमुच्यतेनचसुखदुःखपरिहारतत्साधनव्यतिरिक्तंकृतेःप्रधानंभ ६२
वितुमर्हति।नन्विदमनुमानेनागमनिरूढमुखंनोत्पत्तुमर्हति।आगमेनत्वपूर्वस्यकार्यत्वमुच्यतेतत्कथमनुमाने
ननिराक्रियते।सत्यंप्रवृत्तएवागमोनुमानेननिरुणद्धि।नत्प्रवृत्तिरेवतुपदार्थयोग्यत्वाधीनानचासुखस्यातत्साध
कर्मविफलमितियस्यदर्शनंतस्यमतेतादृग्भूतस्यविफलस्य ५

नस्य चापूर्वस्य कृतिं प्रति प्राधान्ययोग्यतास्ति एकशब्दवाच्यत्वाद् विरोध इति चेन्न। व्युत्पत्तिविरोधात्। यदि मन्येत एके न हि
प्रस्य येन हेतिस्तत्प्रधाने च कार्यमुच्यते अतस्तत्र योग्यत्वमकारणं। यत्र त्वनवच्छिन्नौ स्तो नोपश्चादवच्छिन्नावभिधेयौ तत्र यो
ग्यत्वं कारणमिति। न च व्युत्पत्तिविरोधः। उच्यते योग्ययोरर्थयोरनेन शब्देनेमाववच्छिन्नावभिधेयाविति व्युत्पत्तेरेवासंभा

नीयाते

वेनायोग्यताभिन्नशब्दवाच्ययोरन्वयं निरूढि। एकशब्दवाच्ययोरुक्तव्युत्पत्तिमपि। व्युत्पत्त्यवसरे नास्त्ययोग्यत्वमिति चेन्न
तरत्रापि प्रसंगात्। स्यादेतत् कामाधिकारे त्वपूर्वस्याभिधेयत्वं निरूप्यते तत्र च फलानुकूलत्वादस्त्येव कृतिप्राधान्ययोग्य
त्वमपूर्वस्येति। तन्नैवं सति नैमित्तिकेऽपि फलं प्रसज्येत। यदा हि कामाधिकारे कार्यत्वनिर्वाहकत्वेन फलवत्त्वमंगीकृतं
तदा नैमित्तिकेऽपि कार्यत्वाभ्युपगमेन तन्निर्वाहकं फलवत्त्वमपि नियोज्यवदंगीकर्तव्यं। तदभावे नियोज्याभाव इव कार्यत्वमे
व प्रतिलपान्नानुष्ठानं सिध्यतीति न तथा यथा शंक्यानुरूपत्वमित्यास्तां तावत्। ननु च निमित्तफलसंबंध एकवाक्येन युज्य
ते। उद्देश्यद्वयसंबंधे वाक्यभेदः प्रसज्यते। निमित्तफलयोर्हि द्वयोरनुद्देश्ययोरेकवाक्यसंबंधाभावात् तुद्देश्यं वाक्यप
रिसमाप्तेर्नैमित्तिकवाक्ये दुरभ्युपगमं फलमित्युच्यते। द्वाभ्यां विधेयसंबंधे वाक्यभेदः प्रसज्यते। उद्देश्येन निमित्तेन वि
धेयस्य न संगतिः। विधेयस्य हि द्वाभ्यामुद्देश्याभ्यां संबंधे भेदे वाक्यभेदो भवति न चेह तथा विधेयस्य कर्मणः फलेन संबं

न्या·पू· धानत्कर्त्तव्यतापाश्वनिमित्तेन। न चैवं सति वाक्यभेदो भवति साकांक्षत्वात्। भवतीत्यस्मिन्सतीदं कुर्यादित्युक्ते किमर्थमि
६३ त्याकांक्षा तत्रैतदर्थमिति संबध्यमानं फलं न वाक्यं भिनत्ति। समानजातीयं त्वुद्देश्यद्वयं वाक्यं भिनत्ति न विजातीयं
। यथा पश्यपितापितामहः सोमं न पिवेदिति निमित्तद्वयं यः प्रजाकामः पशुकाम इति फलद्वयं। तस्मान्नास्ति वाक्य
 भेद इति। यत्तु भगवता मंडनाचार्येण निमित्तस्योद्देश्यत्वे वाक्यभेदपरिहारार्थं निराकृतं तद्विधेयं प्रत्युद्देश्यभावा
भिप्रायं। वार्त्तिके बहुशो निमित्तस्योद्देश्यत्वाभिधानादित्यलमतिविस्तरेण। तस्मात्सिद्धः काम्यनित्यविशेष इति॥
॥ पार्थसारथिना सम्यग्विशेषो नित्यकाम्ययोः। आचार्यमतमाश्रित्य न्यायलेशः प्रदर्शितः॥ ॥ इति श्रीपार्थ
सारथिमिश्रविरचितायां न्यायरत्नमालायां नित्यकामविवेकः समाप्तः॥ ॥ संवत